IMPACT FACTOR : 2.735

ISSN : 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Peer Reviewed Sanskrit Research Journal

Vol. XI October, 2018 - March, 2019 Issue No. 2

वर्षम् ११ अक्टूबर २०१८ - मार्च २०१९ अङ्कः द्वितीयः

# प्राचीसुधा

# PRACI SUDHA

**A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL**

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च

प्रो. विश्वनाथस्वाईँ

सहसम्पादकाः

डॉ.युधिष्ठिरसाहुः

डॉ. विघ्नेश्वरमिश्रः

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

SARVODAYA NAGAR, PURI - 752002, ODISHA

Website : www.pracisudha.in

IMPACT FACTOR : 2.735 PRACI SUDHA ISSN 2249 - 2313

A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

**पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्**

**Purusottam Research Academy of Indology**

Sarvodaya Nagar, Puri - 752002 (Odisha) Ph. 06752-250588

E.mail: biswanathpuri@yahoo.com Pracisudha2013@gmail.com

**संरक्षकाः**

श्रीमहन्तः डॉ.वृन्दावनविहारिदासकाठियाबाबामहाराजः, सुखचरः कोलकाता

श्रीमहन्तः श्रीरामकृष्णदासमहाराजः, पुरी

श्रीमहन्तः श्रीश्रीनिवासदासमहाराजः, पुरी

त्रिदण्डी स्वामी भक्तिस्वरूपश्रीधरमहाराजः, पुरी

स्वामी श्रीत्र्यम्बकेश्वरमहाराजः, काशी

**परामर्शदातृमण्डलम्**

प्रो.अलेखचन्द्रषडङ्गी(पूर्वकुलपतिः), प्रो.अद्वैतचरणधलः,

प्रो.रघुनाथपण्डा, प्रो.गङ्गाधरपण्डा(पूर्वकुलपतिः),

प्रो.प्रफुल्लकुमारमिश्रः(पूर्वकुलपतिः), प्रो.चन्द्रशेखरमिश्रः,

प्रो.विन्ध्येश्वरप्रसादहिमांशुः, प्रो.ललितकुमारसाहुः, श्रीज्ञानेन्द्रत्रिपाठी,

प्रो.नागवरप्रसाद राव चन्द्रपाटी,

**पुनरीक्षणसमितिः (PEER REVIEW COMMITTEE)**

महामहोपाध्यायः प्रो.सुधाकराचार्यत्रिपाठी, चौ.च.वि.वि., मेरठ (यू.पी.)

प्रो.विक्रमकुमारः, पञ्जावविश्वविद्यालयः, चण्डीगड़

प्रो.सरोजकौशलः, जयनारायणव्यासविश्वविद्यालयः, जोधपुर (राजस्थान)

प्रो.कमलेश सि चोक्सि, अहमदाबादविश्वविद्यालयः, अहमदाबाद (गुजरात)

**सम्पादकमण्डलम्**

प्रो.प्यारीमोहनपट्टनायकः, प्रो.हरेकृष्णमहापात्रः,

प्रो.सूर्यमणिरथः, डॉ.कान्हुचरणपण्डा, डॉ.निर्मलापाणिग्राही, डॉ.शत्रुघ्नपाणिग्राही

प्रो.प्रभातरञ्जनमहापात्रः, डॉ.वसन्तकुमारमिश्रः, प्रो.विश्वनाथस्वाईँ

**सम्पादकः सञ्चालकश्च**

प्रो.विश्वनाथस्वाईँ

**सहयोगिसम्पादकाः**

डॉ.युधिष्ठिरसाहु

डॉ. विघ्नेश्वरमिश्रः

ISSN 2249 - 2313

## पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य प्रतिष्ठातृसदस्याः

| क्र.सं. | सदस्यानां नामानि, सङ्केताश्च |
|---|---|
| १. | प्रो.डॉ.विश्वनाथस्वाईँ(प्रतिष्ठाता, महासचिवः), सेवानिवृत्तः प्राचार्यः, श्रीज.वे.क.म., पुरी, ओडिशा |
| २. | प्रो.प्यारीमोहनपट्टनायकः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| ३. | प्रो.अद्वैतचरणधलः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| ४. | प्रो.अलेखचन्द्रषडङ्गी, पूर्वकुलपतिः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| ५. | प्रो.सूर्यमणिरथः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| ६. | डॉ.कान्हुचरणपण्डा, रा.सं.म.वि., ब्रह्मपुरम्, गञ्जाम, ओडिशा |
| ७. | श्रीज्ञानेन्द्रत्रिपाठी, वालिचन्द्रपुर, याजपुर, ओडिशा |
| ८. | प्रो.हरेकृष्णमहापात्रः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| ९. | प्रो.गौरप्रियादासः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| १०. | प्रो.प्रभातरञ्जनमहापात्रः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| ११. | श्रीविश्वमोहनमहारणा, पुरी, ओडिशा |
| १२. | डॉ.शत्रुघ्नपाणिग्राही, श्रीसोमनाथ सं.वि.वि., वेरावल, गुजरात |
| १३. | प्रो.रघुनाथपण्डा, उत्कलविश्वविद्यालयः, भुवनेश्वरम्, ओडिशा |
| १४. | प्रो.ललितकुमारसाहुः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| १५. | डॉ.वसन्तकुमारमिश्रः,श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा |
| १६. | प्रो.विक्रमकुमारः, पञ्जाब-विश्वविद्यालयः, चण्डीगढ, पञ्जाब |
| १७. | प्रो.गङ्गाधरपण्डा, कुलपतिः, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| १८. | प्रो.चन्द्रशेखरमिश्रः, ला.व.सा.स्मा.म.वि.आनन्दनगर, महाराजगञ्ज,यू.पी. |
| १९. | डॉ.युधिष्ठिरसाहुः, रेभेन्सा-विश्वविद्यालयः, कटक, ओडिशा |
| २०. | प्रो.अनुपमापृष्टिः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| २१. | डॉ.नरेशचन्द्रदाशः, नी.ना.आ.चतुष्पाठी म.वि., पुरी, ओडिशा |
| २२. | श्रीहृषीकेशदाशः, ब्रह्मपुरम्, गञ्जाम, ओडिशा |
| २३. | प्रो.प्रफुल्लकुमारमिश्रः, कुलपति, उत्तरओडिशा वि.वि., मयूरभञ्ज, ओडिशा |
| २४. | डॉ.देवराजपाणिग्राही, त्रिपुराविश्वविद्यालयः, अगरताला, त्रिपुरा |
| २५. | डॉ.पूर्णचन्द्रपाढी, श्रीज.सं.वि.वि., पुरी, ओडिशा |
| २६. | डॉ.भारतेन्दुपाण्डेयः, दिल्लीविश्वविद्यालयः, दिल्ली |
| २७. | प्रो.एम्.वसन्ता, एस्.एस्.यु.एस्., कोइलाण्डी, केरल |
| २८. | आचार्यः रामस्वरूपशास्त्री, राजकीयसंस्कृतमहाविद्यालयः, ग्वालियर्, म.प्र. |
| २९. | प्रो.छायारानी, दी.द.उ.गोरखपुरविश्वविद्यालयः, गोरखपुर, यू.पी. |
| ३०. | डॉ.जयन्तकुमारत्रिपाठी, गङ्गाधरमेहेरकॉलेज्, सम्बलपुर, ओडिशा |
| ३१. | प्रो.सङ्गीता अग्रवाल, आर्यकन्या पी.जी.कॉलेज, हापुड, यू.पी. |
| ३२. | प्रो.नागवरप्रसाद राव चन्द्रपाटी, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| ३३. | डॉ.मेधा कुमारी, संस्कृतविभागः, सामसीमहाविद्यालयः, सामसी, प.ब. |
| ३४. | डॉ.विष्णुप्रसाददाशः, संस्कृतविभागः, पात्रसायरमहाविद्यालयः, प.ब. |
| ३५. | प्रो.पूनमलखन पाल, रघुनाथ-कन्या पीजी कॉलेज्, मेरठ, यू.पी. |
| ३६. | डॉ.निर्मला पाणिग्राही, शिक्षाशास्त्रविभागः, रा.सं.सं., श्रीसदाशिवपरिसरः, पुरी, ओडिशा |

.............................. अवशिष्टांशः - ९९ पृष्ठाङ्के

IMPACT FACTOR : 2.735 PRACI SUDHA ISSN 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

**पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्**
**Purusottam Research Academy of Indology**
Sarvodaya Nagar, Puri - 752002 (Odisha) Ph. 06752-250588
E.mail: biswanathpuri@yahoo.com Pracisudha2013@gmail.com



## सम्पादकीयम्

ॐ "सरस्वती साधयन्ती धियं न इला देवी भारती विश्वतूर्तिः ।
तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पान्तु शरणं निषद्य ।।"
(ऋग्वेदः-२.३.८)

सुधियः !

शिशिरः अन्तर्हितः । धरायामधुना राजते ऋतुराजः । सूर्याचन्द्रमसौ यथाकालमनुकूलतापोषकौ । प्रफुल्लता सर्वत्र परिलक्षिता । श्रेष्ठस्य बुद्धिजीविनः मनुष्यस्य साम्प्रतिकी क्रिया प्रायः सत्त्वपरा । स्वाध्यायादिभिः पवित्रैः नित्यकर्मभिः शरीरावच्छिन्नः आत्मा परमानन्दप्राप्त्यनुकूलः भवेदिति एतदर्थं श्रद्धाशीलानां महान् अभिलाषः । तदनुकूलतायै सर्वदा अग्निः अग्रणिः अग्रणी एव आदौ शरणम् । सुधाधारैः सुधाकरैः आचार्यैः एतदर्थम् अर्च्चि-तपोमार्गः प्रदर्शितः समादृतश्च । एतेन मार्गेण प्रचोदिताः असारसंसारविरक्ताः शास्त्राभ्यासनिरताः व्रतचारिणः शब्दब्रह्मबिम्बतत्त्वदर्शिनः मण्डनखण्डनकारिणः अत्र दृष्टिगोचरीभूताः । अस्मत्पक्षपाताः एते वैदिकसंस्कृतिविचारविश्लेषणपूर्वकं यथासाध्यं शोधप्रक्रियानुसरणकारिणः प्रवर्त्तन्ते । एतेषां हृद्गतश्रद्धाभावपरिपूरिताः स्वस्वलेखनीप्रसूताः वैदिकशास्त्रसम्मताः मौलिकलेखाः यथा 'ऋषिरग्निः', 'कृदादिवृत्तिपरामर्शः', 'सृष्टिप्रक्रिया-विमर्शः', 'रामायणेषु रामावतारः', 'प्रदाय प्रधाय ...', 'कर्पूरमञ्जर्य्यां बिम्बविधानं', 'वैदिकसमाजे नारी', 'कैवल्ययोग.... ' चेत्यादयः सुधाकरसरोजरविप्रकाश विभूतिभूतैः पुनरीक्षिताः सन्तः अत्र अधुना **"प्राचीसुधा"** संस्कृतशोधपत्रिकायां विलसन्ति ।

सुखसञ्चारे नवनवप्रतिभासम्भारे प्रोक्ताः विचारधाराः अत्र पुनरीक्षितायाम् **अन्ताराष्ट्रिय-मूल्याङ्कितायां पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य षाण्मासिकिसंस्कृतशोधपत्रिकायां प्राचीसुधा**यां रमन्ते । "प्राचीसुधा" संस्कृतशोधपत्रिकायाः अयं द्वाविंशतितमबिन्दुः (वर्षम्-११, अङ्कः-२, अक्टूबर-२०१८ – मार्च्च-२०१९) । प्रकाशनमिदं सर्वजनहृद्यं भवेदिति ।

विदुषां वशंवदः
**प्रो.विश्वनाथस्वाईँ**
**सम्पादकः सञ्चालकश्च, प्राचीसुधा**
**तथा च महासचिवः,**
**पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा**

**श्रीजगन्नाथपुरी**
**ता.-३१.०३.२०१९**

IMPACT FACTOR : 2.735 PRACI SUDHA ISSN 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL
एकादशवर्षम् द्वितीयसंख्या

# विषयसूची


| विषयाः | लेखकाः | पृष्ठाङ्काः |
|---|---|---|
| सम्पादकीयम् | प्रो.विश्वनाथस्वाइँ | ३ |
| ऋषिरग्निः | महामहोपाध्यायस्त्रिपाठी डॉ.सुधाकराचार्यः | ५ |
| कर्मधारये एकार्थीभाव-सामर्थ्यपरामर्शः | डॉ.जयश्रीदाश | ६-१२ |
| विभिन्नदर्शनेषु कैवल्यखण्डनम् | डा. अशोककुमारमीणा | १३-१९ |
| ज्योतिषशास्त्रे वास्तुशास्त्रम् | डॉ.रमेशचन्द्र बि. शुक्लः | २०-२४ |
| कृदादिवृत्तिपरामर्शः | डॉ.विघ्नेश्वरमिश्रः | २५- ३० |
| सृष्टिप्रक्रियाविमर्शः | डा.नरेन्द्रकुमारः | ३१-३३ |
| योगशास्त्रे संयमसाध्य-विभूतीनां स्वरूपनिरूपणम् | मीनाक्षी मीणा | ३४-३६ |
| पद्मपुराणे आत्मस्वरूपम् | डा. उमा राहुल | ३७-३८ |
| पाद्मे सृष्टिखण्डे अर्थवर्गः | डॉ. चन्द्रशेखरमिश्रः | ३९-४१ |
| संस्कृतसाहित्ये जनजातिविचारः | डॉ. लक्ष्मीनारायणबेहेरा | ४२-४५ |
| धर्मशास्त्रे दण्डनीतिः | लङ्क. पार्थ सारथिः | ४६-४९ |
| श्रीपरशुरामविजयमहाकाव्ये वैदिकवाङ्मयविमर्शः | विकाश दाशः | ५०-५३ |
| प्रदाय, प्रधाय चेत्यादौ तुँगागमनिवृत्तिपूर्वकम् "ऊकालोऽज्झस्वदीर्घप्लुतः"-सूत्रार्थविश्लेषणम् (लघुशब्देन्दुशेखरस्य परिप्रेक्ष्ये) | प्रो.विनोदकुमार झा | ५४-५८ |
| वैदिकवाङ्मये वेदान्तदर्शनम् | किञ्जल गोरफाड | ५९-६० |
| न्यायाभिमतप्रमेयतत्त्वा-नुशीलनम् | डॉ. महेशझा | ६१-६८ |
| रामायणेषु रामावतारः | स्नेहलता महापात्र | ६९-७४ |
| कर्पूरमञ्जर्यां बिम्बविधानम् | डॉ० पूनम लखनपाल | ७५-७९ |
| धर्मशास्त्रे पुत्रभेदाः | डॉ. दयानिधिमिश्रः | ८०-८२ |
| वैदिकसाहित्ये सूर्यः | डॉ. शत्रुघ्नपाणिग्राही | ८३-८७ |
| सुवर्णस्तेयप्रायश्चित्तम् | डॉ. मानसीरथः | ८८-९० |
| वैदिकसमाजे नारीणां स्थानम् | सत्येन्द्रनाथ आदकः | ९१-९५ |
| भारतीयसम्प्रदाये सर्जनात्मकता | डॉ. सिङ्गराजु दक्षिणामूर्तिशर्मा | ९६-९८ |
| Declaration | | १०० |

# ऋषिरग्निः

**महामहोपाध्यायस्त्रिपाठी डॉ.सुधाकराचार्यः**

पुरत इह नु मञ्चे ये सभाध्यक्षवर्या
आतिथिरिह नु मुख्यः श्रोतृवर्यास्तथाग्रे ।
शृणुत नु नुतमग्निं तं हि सौधाकरीभि-
र्निगदगदितमेनं साधितं मालिनीभिः ।। १ ।।
अनल इलति वह्निर्वा वहत्यालवालं
दिशति ततितितिक्षां तेज इद्धं च वाऽत्र ।
ऋषिरयमथवेयं देवता वाऽथ भूतं
त्रिविध[१] इव स लोके ह्यग्रनीतः सदाग्निः ।।२।।
ऋषिरयमिति गाथा श्रूयतेऽस्मिन्पुराणे[२]
त्रिनिगदगदिताभी ऋग्[३]यजुः[४] सामभि[५]श्च।
प्रथममिदमतुल्यं ह्यग्निनाम्ना पुराणं
रचितकथितगीतं तच्छिखेवेह भाति ।।३।।
अचकथदयमग्निर्यत्परा चापरा च
द्विविध[६] इह नु विद्ये तेन चाग्नित्वमस्य ।
अत इममृषिरूपं सस्मरुर्नैव लोका -
अनुनयबहुला ये ते महान्तः सदैव ।। ४।।
श्रुतिधृतिकृतिवृद्धा भाति बृद्धिर्यशोभिः
करणशरणसिद्धं भाति वृद्धं मनश्च ।
सकलसुकलनाभिर्योऽग्निरेवं दिदेश
ध्वनितपदविचारैस्तं नमामि स्ववाग्भिः ।। ५।।

---

सन्दर्भाः -
१. अग्निपुराणम् १.१६
२. तदेव १.८., १.३०
३. ऋग्वेदः ९.१०९.१०.७९.१०.८०
४. यजुर्वेदः २७
५. सामवेदः II.३.१
६. अग्निपुराणम् ३८३.१-४

**सम्मानितः आचार्यः, संस्कृतप्राच्यभाषाविभागे, चौधरीचरणसिंहविश्वविद्यालये,**
**निवासः - 34,मयूरविहार फेज 2, शास्त्रीनगर, मेरठ (यू.पी.)**

# कर्मधारये एकार्थीभावसामर्थ्यपरामर्शः

डॉ.जयश्रीदाश

समुपसर्गात् सत्तार्थकाद् / क्षेपणार्थकात् अस् धातोः समस्यतेऽनेकपदमिति व्युत्पत्तौ "अकर्त्तरि च कारके संज्ञायाम्"[१] इत्यनेन कर्मणि, समसनमिति व्युत्पत्तौ "भावे"[२] इत्यनेन भावे, समस्यतेऽस्मिन्निति व्युत्पत्त्यौ "हलश्च"[३] इत्यनेन अधिकरणे वा घञि सति निष्पद्यते समासशब्दोऽयम्। एवञ्चानेकेषु पदेष्वैक्यसम्पादनमित्यर्थोऽवगम्यते। समासस्यास्य लक्षणविषये विविधानिमतानि विद्यन्ते (यानि यथावसरं चर्च्यन्ते) परं समासाधिकारपठितत्वं समासत्वमिति नव्यमतं समीचीनं प्रतीयते। अर्थात् "प्राक्डारात् समासः"[४] इत्यधिकारपठितसंज्ञात्वं समासत्वमिति फलितार्थः समासलक्षणे निर्दुष्टतया घटते। येन तत्पुरुषबहुव्रीह्यादीनां समासत्वं सम्भवति। "पृथगर्थानामेकार्थीभावः समर्थवचनम्"[५] इति भाष्यवार्त्तिकात्, "संसृष्टार्थं समर्थम्"[६] इति भाष्याच्च अनेकार्थस्य एकार्थत्वमेकार्थीभावः एवञ्च समासस्त्वेकार्थीभावरूपः इति व्यपदिष्टत्वात् अनेकपदानां यत्रैकपदीभवनं स समासः, भिन्नार्थवाचकतां प्राप्तोऽनेकपदानां समूहः समासः इति वा साधुप्रतीतिः। अत एव शक्तिसम्बन्धेन समासपदवत्त्वमेकार्थीभावापन्नपदसमुदायविशेषत्वं वा समासत्वमिति लक्षणं साधु घटते।

पदसम्बन्धिविधेः समर्थाश्रितत्वेन समासस्य पदविधित्वेन तत्र एकार्थीभावसामर्थ्यं स्वीकृतं वैयाकरणैः। एकार्थीभावसामर्थ्यवशात् समासादिविधौ सर्वत्र समुदायशक्तिः स्वीकृता। तत्पुरुषवत् तदन्तर्गते कर्मधारयेऽपि एकार्थीभावः स्वीकृतः। चप्रयोगद्वन्द्ववत् अत्रापि साहित्यं भासते इति उपपादितं पूर्वम्। कर्मधारये एकार्थीभावस्वीकारे काचित् शङ्का उदेति। तथाहि "कर्मणि द्वितीया"[७] इत्याद्यनुशासने कर्मादिवाचकेभ्यः शब्देभ्यः द्वितीयादयः विभक्तयः प्रवर्त्तन्ते। तेनैव कर्मादिना अभिहितत्वेन विशेषणवाचकात् कथं द्वितीयादयः प्रवर्त्तन्ते। कटं भीष्मं कुरु इत्यत्र कटशब्दोत्तरद्वितीयया एव कर्मणः अभिधानात् अनभिहिते कर्मणि द्वितीयायाः प्रवृत्त्या भीष्मशब्दात् विशेषणात् कथं द्वितीया इति आशङ्क्य "कटोऽपि कर्म भीष्मादयोऽपि"[८] इति भाष्ये समाहितम्। ततश्च कटस्यैव भीष्मस्यापि कर्मत्वेन द्वितीया सिद्ध्यति इति तदाशयः। सामर्थ्यसत्त्वे एव समासः प्रवर्त्तते। ससूर्यं पश्य इत्यादयः असमर्थसमासे सति गमके असामर्थ्येऽपि क्वचित् समासः प्रवर्त्तते। अन्यत्र

असमर्थसमास: दुष्ट एव। कर्मधारयेऽपि एकार्थीभावस्वीकारे कटोऽपि कर्म भीष्मादयोऽपि इति भाष्योक्तपक्षे परिनिष्ठतविभक्त्या समास: नोपपद्यते। समानविभक्तिकयो: "विशेषणं विशेष्येण बहुलम्"[९] इति कर्मधारयसमास: विधीयते। परमकारकेण कृतमित्यादौ पूर्वोक्तभाष्योक्तपक्षानुरोधेन करणस्यापि करणत्वं कारकस्यापि करणत्वम्। उभयो: अपि कृञ्धात्वर्थक्रियायामन्वयेन परस्वरमसामर्थ्यात् एकार्थीभावसामर्थ्यग्रहेण कर्मधारयसमासानुपपत्तिरिति तत्र समासे एकार्थीभावस्वीकार: दोषग्रस्त इति केचित् आक्षिपन्ति। कटं भीष्मं कुरु इत्यत्र विशेषणात् विभक्तिसम्पादनार्थं पक्षत्रयं प्रदर्शितमनभिहितसूत्रे भाष्ये। विशेषणविशिष्टस्य कर्मत्वमिति एक: पक्ष:। कटोऽपि कर्म भीष्मादयोऽपि द्वितीय:। कट एव कर्म तत्सामान्याधिकरणात् विशेषणात् विभक्तिरिति तृतीयपक्ष:। प्रागुक्ताक्षेप: विशेषणं विशेष्यञ्च उभयमपि कर्म इति द्वितीयपक्षे उत्थापित:। "अत्राहु:...."[१०] इत्यादिना मञ्जूषायां नागेशेन परिहृत:। कटं भीष्मं करोतीत्यत्र उत्पत्त्यनुकूलव्यापारजन्यफलाश्रय: न केवलं कट: अभिप्सित: किन्तु भीष्मादिगुणविशिष्ट इति "कर्त्तुरीप्सिततमं कर्म"[११] इति भीष्मादिगुणविशिष्टस्य कस्य कर्मत्वेन विशिष्टस्य शुद्धानतिरिक्तत्वेन कटपदोत्तरद्वितीयया कटगतस्य कर्मत्वस्यैव विशिष्टगतस्य कर्मत्वस्यापि अभिधानात् उक्तार्थानामप्रयोग इति न्यासेन विशेषणात् कथं कर्मणि द्वितीया इति आशङ्क्य कटपदोत्तरद्वितीयया कटगतकर्मत्वस्यैव विशिष्टगतकर्मत्वस्य अभिधानेऽपि शक्तिमत: कारकत्वेन भीष्मादिगतकर्मत्वशक्तेरनभिधानात् "उक्तार्थानामप्रयोग" इति न्यायस्य अत्र अप्रसक्त्या भीष्मादिभ्योऽपि तद्गतकर्मत्वप्रतिपादनाय द्वितीया भवतीति एकं समाधानमुक्तं भाष्ये। अत्र पक्षे परमकारकेण कृतमित्यादौ एकार्थीभावस्य अनुपपत्ति: नास्ति। तथाहि विशिष्टं कर्म, विशिष्टं करणमिति व्यवहारा: लोके दृश्यन्ते। तत् व्यवहारबलात् न केवलमेकदेशस्य कर्मत्वं वक्तुं शक्यते किन्तु उभयोरपि कर्मत्वादिकमङ्गीकार्यम्। एवञ्च उभयो: कर्मत्वलाभाय तत् प्रयोज्यद्वितीयाविभक्ति: उभयत्र प्रवर्त्तते। विशिष्टगतं कर्मत्वं तु एकमेव। भीष्मादिगुणश्रितकटाभिन्नं यत्कर्म इति बोधस्तु एक एव भवति। विशिष्टं कर्मेति व्यवहारनिर्वाहाय उभयत्र विभक्ति: अपेक्षते। भीष्ममिति द्वितीयान्तपदात् विशेषणवाचकात् कर्मत्वादि-अनालिङ्गित: भीष्मपदार्थ: उपतिष्ठते। कटपदोत्तरद्वितीयया तु भीष्मादिगुणविशिष्टस्य प्रतीतिर्भवति। तथा प्रतीतौ विशिष्टस्य एककर्मत्वबोधो जायते। एतादृशबोधजनने विशेषणपदोत्तरद्वितीयाया: सहकारित्वात् तयो: उभयो: परस्परापेक्षितत्वेन सामर्थ्यस्य अनुपपत्तिर्नास्ति। विशेषणपदात् द्वितीयासम्पादने कटोऽपि कर्म भीष्मादयोऽपि द्वितीयं समाधानम्। विशेषणवाचकात् तत् तत् विभक्तिसम्पादनाय कटोऽपि कर्म

भीष्मादयोऽपि द्वितीय: पक्ष: उपस्थापित: भाष्ये। कटगतकर्मत्वस्य उक्तत्वेऽपि भीष्मादिगतस्य तस्य अनभिधानात् अनभिहिते कर्मादौ तत् तत् विभक्ति: सिद्ध्यति इति तस्य पक्षस्याशय:। कर्मधारये सामर्थ्ये स्वीकारे अत्र पक्षे परिनिष्ठितविभक्त्या समास: अनुपपत्तिरिति आशङ्किता कैश्चित्। कटभीष्मपदार्थयो: पार्थक्येन क्रियान्वयात् परस्परापेक्षाया: अभावेन असामर्थ्यमिति तेषामाशय:। वस्तुतस्तु कटं भीष्मं कुरु इत्यादौ अस्मिन् पक्षेऽपि विशेषस्य कटस्य विशेषणस्य भीष्मादेश्च परस्परं विशेषणं विशेष्येणाभावेन अन्वयोत्तरमेव क्रियान्वयो भवति न तु तत: पूर्वमिति सामर्थ्यमक्षतमेवेति नास्ति शङ्काया: अवकाश:। न तु उक्तरीत्या विशेषणपदार्थस्य भीष्मादे: विशेष्येण कटादिना साकमन्वये कारकाणां क्रियान्वयनियमात् क्रियान्वयित्वं कारकत्वम् इति नियमस्य भङ्ग: स्यात्। अत: विशेषणविशेष्ययो: परस्परान्वयपूर्वकमेव क्रियान्वय: इति वक्तुं न शक्यते इति समास-अनुपपत्तिरूपदोष: तदवस्थ इति चेन्न। न हि क्रियान्वयित्वं कारकत्वं किन्तु करोति क्रियां निष्पादयति भाष्यप्रामाण्यात् क्रियाजनकत्वं कारकत्वमिति नव्यसिद्धान्त: कारकशब्दात् तथैवार्थ: लभ्यते। क्रियाजनकानां तेषां क्रियायामेवान्वय:। तत्र एतावान् विशेष: साक्षात् क्रियाजनकानां साक्षादेव क्रियायामन्वयो भवति। परम्परया क्रियाजनकानां तु इतरद्वारकैव क्रियान्वय:। यथा - अधिकरणकारकस्य कर्तृकर्मातिद्वारा क्रियाद्यन्वय:। एवञ्च प्रकृते इतरद्वाराकारकाणां साक्षात् क्रियाजनकद्रव्यद्वारा क्रियान्वय इति नियमस्य कल्पनात् कारकाणां भावनान्वय इति नियमस्य विरोधो नास्ति। कटभीष्मयो: कारकयो: अयमत्र विशेष:। कटरूपस्य द्रव्यस्य साक्षात् क्रियाजनकत्वभीष्मादे: गुणस्य द्रव्यद्वारा क्रियाजनकत्वमिति तयो: उभयो: वैलक्ष्यण्यं वर्त्तते। अत एव तयो: साम्यं नास्ति। कारकत्वेन साम्येऽपि क्रियाजनकत्वाजनकत्वाभ्यां वैलक्ष्यण्यात्। क्रियान्वयित्वेन तयो: गुणत्वेऽपि समत्वाभावात् गुणानाञ्च परार्थत्वात् असम्बन्ध: समत्वात् स्यादिति न्यायविरोधो नास्ति। कटस्य भीष्मादेश्च पृथक्कर्मत्वमिति द्वितीयपक्षेऽपि प्रथमपक्षवत् बोध: एकविध: एव भवति। भीष्मादिगुणविशिष्टकटकर्मक इत्यादिरीत्या विशिष्टस्य कर्मत्वेऽपि भीष्मादिगतस्य कर्मत्वस्य बोधनाय तत्र विभक्ते: साधुत्वमिति मन्तव्यम्। तावन्मात्रेण भीष्मकर्मकं कटकर्मकमिति बोधो न भवति। तथा अननुभवात्। एवञ्च कटोऽपि कर्म भीष्मादयोऽपि द्वितीयपक्षेऽपि विशेषणविशेष्ययो: परस्परान्वयपूर्वकक्रियान्वयात् समासप्रयोजक- सामर्थ्यमव्याहतमेव।

ननु अरूणया पिङ्गख्या क्रीणाति इति मीमांसकाभिमतं ज्योतिष्टमप्रकरणस्थवाक्यम् अस्य अरूणाधिकरणस्य समन्वयसन्दर्भे मींमासका: अरूण्यादिनाम् अरूणया क्रीणाति,

पिङ्गाख्यया क्रीणातीत्यादिरीत्या प्रार्थक्येन क्रियान्वयमुक्त्वा पश्चात् आरूण्यादिगुणविशिष्टगवा सोमं क्रीणातीति मानसिकबोधं स्वीकुर्वन्ति। प्राथमिकबोधे गुणद्रव्ययो: परस्परं सम्बन्धस्यैव अभावेन तेनाधिकरणेन प्रकृतसन्दर्भस्य विरोध: आपतति इत्याशङ्क्य नागेशभट्ट: स्वसिद्धान्तानुकूलतया अरूणाधिकरणस्य समन्वयं कृतवान्। तथाहि - ज्योतिष्टमप्रकरणे श्रूयते अरुणया पिङ्गाक्ष्यैकहन्या सोमं क्रीणाति इति। अरुणपिङ्गक्ष्यैकहायनीपदानां करणकारकत्वेन कारकाणां भावनान्वय: इति नियमेन त्रयाणामपि क्रयणक्रियायां करणत्वेनान्वयो वक्तव्य:। स च त्रयाणामेकदा न सम्भवति। अतो वाक्यभेदं प्रकल्पयित्वा अरुणया क्रीणाति, पिङ्गक्ष्या क्रीणाति, एकहायन्या क्रीणाति इति प्रत्येकं त्रयणां क्रयणक्रियायामन्वयो वक्तव्य:। पिङ्गक्ष्यैकहायनी शब्दौ बहुव्रीहिसमासौ। पिङ्गे अक्षिणी यस्या: सा, एका हायनी यस्या: सा इति। अत्र पिङ्गाक्ष्यैकहायन्यो: द्रव्यत्वेन ताभ्यां करणत्वं युज्यते, परन्तु अरूणादिशब्दा: केवलगुणमात्राभिधायिन:, अतस्तस्य क्रयणभावनायां करणत्वं कथमित्याशङ्क्य - अस्मिन् वाक्यघटकारूणपदमस्माद् वाक्याद् भित्त्वा प्राकरणिकसर्वद्रव्येषु निवेशे तस्मिन् प्रकरणे यानि द्रव्याणि वर्त्तन्ते तानि सर्वाणि आरूण्यविशिष्टानि वा, क्रीणातो सम्बध्य तदङ्गभूतैकहायन्यां निविशते वेति सन्देह: प्राकटयत। यद्यपि आरूण्यस्य प्राकरणिकद्रव्यमाने निवेश इत्यसङ्गतम्। अरूणयेत्यस्य करणकारकत्वेन कारकाणां भावनान्वय: इति नियमेन क्रियायामेवान्वयो वक्तव्य:। प्रकरणे निवेशे तु तेषआं द्रव्यत्वेन कारकस्य द्रव्येऽन्वयो न युक्त:। अत: क्रियायामेव तस्यान्वय: प्रतिपाद्य:। गुणस्यामूर्त्तत्वेन तत्रान्वयो न युज्यते, तथापि गुणस्याश्रयाकाङ्क्षया द्रव्यमाक्षिपति। आक्षिप्तद्रव्यद्वारा क्रियान्वयो युज्यते। उच्यते, केन क्रयणं भावयेदिति करणाकाङ्क्षायां श्रौतैकहायन्या:, पिङ्गाक्ष्या: वा तत्रान्वय: प्रतिपाद्यते। तेन त्राकाङ्क्षाया: निवृत्तावेककरणावरूद्धे करणान्तरान्वयोऽव्युत्पन्न: इति न्यायेन आक्षिप्तस्य विलम्बोपस्थितिकत्वेन च नात्ररूण्यस्यान्वय:। यद्यपि बलाबलविचारो द्रव्यस्य भिन्नत्वे अत्र तु द्रव्यस्यैकत्वेन विरोधस्यैवाभावेनाऽयं विचारो निष्फल एवेति वाच्यम्। केन क्रयणं भावयेदिति करणाकाङ्क्षायां तृतीयान्तपदं करणत्वेनान्वेति। तदानीं द्रव्यस्यैवानिश्चयेन कथं द्रव्यैक्यस्य ज्ञानमतोऽयं विचार आवश्यक एव। एवं चाविशेषादरूणापदलक्षितं तदर्थाक्षिप्तं द्रव्यं प्राकरणिकं सर्वमेवेति पूर्वपक्ष:।

"अर्थैकत्वे द्रव्यगुणयो: ऐक्यकर्म्यात् नियम: स्यात्"[१२] इति जैमीने: सिद्धान्तसूत्रम्। द्रव्यगुणवाचकशब्दयो: अर्थैकत्वे परस्परमभेदान्वयेनैकार्थबोधकत्वे सति ऐक्यकर्म्यात् विशिष्टस्यैकक्रियासम्वन्धात् नियम: परस्परावच्छेदरूप इति तदर्थ:।

लोकसिद्धाया आरूण्यविशिष्टैकहायन्याः क्रियानुवादेन विधानान्न वाक्यभेदः। आरूण्यस्य गुणत्वेऽपि, गुणस्य स्वाश्रयद्रव्येण तादात्म्यं स्वीक्रियते। तेन गुणवाचकोऽपि तादात्म्येन गुणिबोधकं भवति। तच्च द्रव्यं किम् ? इत्याकाङ्क्षायां सन्निहितत्वादेकहायन्येवेति निश्चीयते। तेनायं विशिष्टविधिरिति निर्णीयते। अत एव मन्त्रे स्त्रीयां टाबुपपन्ना। अत एव च कोशः सङ्गच्छते। तच्चैकहायनीत्यन्यपदार्थः क्रमप्राप्तत्वात्।

यद्यपि मीमांसकैः अरूणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति इति वाक्ये कारकाणां भावनान्वयनियमेन अरूणया क्रीणाति पिङ्गाक्ष्या क्रीणाति, एकहायन्या क्रीणातीति प्रथमतस्सर्वेषां क्रियायामन्वयस्तदनन्तरमारूण्यस्य क्रयसाधनत्वासम्भवेन आरूण्यविशिष्टपिङ्गक्ष्या, आरूण्यविशिष्टैकहायन्या सोमं क्रीणातीति बोधः। आरूण्यविशिष्टैकहायन्या पिङ्गाक्ष्या सोमं क्रीणियादिति वाक्यार्थः प्रतिपाद्यते। वस्तुतस्तु कारकाणां भावनान्वय इत्यस्यायमर्थः। साक्षात् क्रियाजनकानां साक्षादेव तदन्वयः। इतरद्वारा कारकाणां तु तदन्वयद्वारक एव क्रियान्वय इति। यथा - नीलघटमानयेत्यत्र गुणस्य (नीलमिति द्वितीयाकारकस्य) द्रव्यद्वारैवान्वयो वक्तव्यः। तन्मात्रस्य आनयनाऽसम्भवात्। नीलं घटं पश्येत्यत्र तु गुणस्यापि प्रत्येकं दर्शनकर्मत्वं युज्यते। यथावकाशं स स्वीकर्त्तव्यः। कारकाणां भावनायामेवान्वयो वक्तव्य इति न निर्बन्धः। अत एव परिनिष्ठितविभक्त्या समास इति भाष्यविचारस्सङ्गच्छते। तथाहि - तत्पुरुषे तुल्यार्थसप्तम्युपमानाव्यथद्वितीयाकृत्याः इति सूत्रे परमकारकमित्यस्य परमं कारकम्, परमकारकम्, परमेण कारकेण परमकारकेण, परमे कारके परमकारके इति परिनिष्ठितविभक्त्या अपि समासः भाष्ये प्रदर्शितम्। मींमासकोक्तरीत्या कारकाणां भावनायामेवान्वयेन परस्परमनयोरन्वयाभावेनाऽसामर्थ्यात् समासो न स्यात्। प्रकृते आरूण्यस्य गुणवाचकत्वेऽपि द्रव्यद्वारा एक एव बोधो भवति। तादृशावन्तरवाक्यप्रयुक्तबोधो न जैमिनिसम्मतः। सूचितश्चायमर्थाः अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् इति सिद्धान्तसूत्रेण।

"अर्थैकत्वे द्रव्यगुणयोः ऐक्यकर्म्यात् नियमः स्यात्"[१३] इति जैमीनिसिद्धान्तसूत्रे विशेषणान्वितस्य विशेष्यस्यैव क्रियायामन्वय इति सूत्रकारस्याशयः। द्रव्यगुणवाचकशब्दयोः अर्थैकत्वे परस्परमभेदान्वयेन एकार्थबोधकत्वे सति ऐक्यकर्म्यात् विशिष्टस्य एकक्रियासम्बन्धात् नियमः परस्परावच्छेदरूप इति सूत्रस्यार्थः। ततश्च अरूण एकहायनी पिङ्गाश्च च या गौः तया सोमं क्रीणातीति वाक्यार्थः फलति। अत्र गुणद्रव्ययोः गुणविशिष्टं द्रव्यं द्रव्यवृत्तिः गुण इति परस्परमवेच्छेद्यावच्छेदकभावः। इत्थं विशिष्टस्य

क्रियायामन्वय इति सिद्धान्ते जैमीनिसूत्ररीत्या अरूणाधिकरणन्यायोऽपि वैयाकरणानामनुकूल:। मींमासकक्तोरीत्या बोधद्वयस्य स्वीकारपत्त्या वाक्यभेद: आपतति। तन्मते प्राथमिकबोध: मानसिकबोध इति द्वयं स्वीकार्यम्। उक्तरीत्या व्याख्याने बोधद्वयस्वीकारापत्तिर्नास्ति। लोकसिद्धाया: आरूण्यविशिष्ट-एकहायन्या: क्रियानुवादेन विधानात् वाक्यभेदापत्ति: अपि नास्ति। एवञ्च कटोऽपि कर्म भीष्मादयोऽपि द्वितीयपक्षेऽपि सामर्थ्यमुपपद्यत एव। समानाधिकरणनामार्थयो: अभेदान्वयात् विशेषणविशेष्ययो: तथान्वय: कथित:। ननु कटं भीष्मं कुरु इत्यादौ विशेषणवाचकात् यथा विभक्ति: साधिता तथा तुल्ययुक्त्या नीलं घटमानय इत्यादौ नीलस्यापि कर्मवाचित्वेन समुदायस्य एव उपस्थित्या तत एव विभक्त्युत्पत्ति:। तेनैव नीलगतकर्मत्वस्यापि अभिधानात् न पुन: तत: विभक्त्यापत्ति:।

---

**सन्दर्भा:**

१. अ., ३-३-१९
२. अ., ३-३-१८
३. अ., ३-३-१२१
४. अ., २-१-३
५. म. भा., २-१-१
६. म.भा., २-१-१
७. अ. २-३-२
८. म.भा. २-३-२
९. अ. २-३-२
१०. ल.म. समासवृत्तिविचारप्रकरणे
११. अ. १-४-४९
१२. जै.सू., ३-१-६-१२
१३. जै.सू., ३-१-६-१२

**संकेताक्षरसूची –**

अ. – अष्टाध्यायी
म.भा. – महाभाष्यम्
ल.म. – लघुमञ्जूषा
जै.सू. – जैमिनीयसूत्रम्

**उपयुक्तग्रन्थसूची -**


१. **अष्टाध्यायी**, पाणिनि, श्रीशान्तिस्वरूप कपूर, श्री रामलाल कपूर ट्रस्ट प्रेस, बहालगढ (सोनीपत-हरयाणा), १९८५

२. **काशिकावृत्ति:**, वामन-जयादित्यप्रणीता-न्यासपदमंजरीसहिता - प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५

३. **प्रौढमनोरमा,** भट्टोजिदीक्षितप्रणीता, वाणीविलासप्रकाशन, वाराणसी
४. **वाक्यपदीयम्,** श्रीभर्तृहरि:, वामदेव आचार्य:, चौखम्बा कृष्णदासअकादमी वाराणसी, २०००
५. **व्याकरणशास्त्रेतिहासविमर्श:,** अशोकचन्द्रगोशास्त्री,भारतीयविद्यासंस्थान, वाराणसी, १९९७
६. **महाभाष्यसमीक्षणम्,** डा.गिरीशचन्द्र त्रिपाठी, श्रीवटुकाप्रकाशनम्, हरिद्वार, १९८७
७. **काशिका,** जिनेन्द्रबुद्धि, विवरणपञ्जिक (न्यास:), राजशाही, १९१३-१९२५
८. **वैयाकरणसिद्धान्तलघुमञ्जूषा,** चौखम्बाप्रकाशन, वाराणसी, १९६९
९. **वैयाकरणसिद्धान्तसुधानिधि:,** सत्यप्रकाशदुवे (सं), राजस्थानपत्रिका, जयपुर, १९८६
१०. **अष्टाध्यायी सहजबोध:,** पुष्पादीक्षित्, पाणिनीयशोधसंस्थान, छत्तीशगड, २००४
११. **निरुक्तम्,** श्रीमद्यास्कमुनिप्रणीतम्, चौखम्बा संस्कृतप्रतिष्ठान- ३८.यू.ए. - बंगलोरोड-जवाहरनगर-दिल्ली-७, १९८९

—०—

*अतिथि-अध्यापिका, संस्कृतविभाग:,*
*श्रीकृष्णचन्द्रगजपतिस्वयंशाशितमहाविद्यालय,*
*पारलाखेमुण्डि, गजपति, ओडिशा ।*

# विभिन्नदर्शनेषु कैवल्यखण्डनम्

डा. अशोककुमारमीणा

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चित्तिशक्तिः[१]। उपदिष्टस्य शास्त्रेण योगफलभूतस्य कैवल्यस्य असाधारणस्वरूपमुपदिश्यति । कृतभागोपवर्गाणां कार्यकारणात्मानां गुणानां प्रधाने प्रतिप्रसवः प्रलयः, कैवल्यं चित्तिशक्तिः कूटस्थ नित्याशुद्धासंङ्गचित्त-स्वभावाशक्तिस्वरूपप्रतिष्ठा पुनः बुद्ध्यादिः सम्बन्धविदुरा वा कैवल्यं भवत्युत्पत्तिशोभनम् । इति शब्दः शास्त्रापरिसमाप्तिद्योतनार्थः इति ।

योगाङ्गानां सामान्यतः समाधेश्च विशेषतः फलभूतकैवल्यस्या-साधारणस्वरूपप्रतिपादनावसरे कैवल्यस्य द्विविधं स्वरूपं परिकल्पितं सूत्रकारेण । पुरुषस्य भोगापवर्गरूपाप्रयोजनं सम्पाद्य कृतकृत्यानां गुणानां प्रतिलोमपरिणामेन क्रमशः स्वमूलभूतकारणे अव्यक्ते प्रकृतौ लयः प्रधानस्य कैवल्यमित्युच्यते । अथवा चेतनपुरुषस्य वृत्तिसारूप्यनिवृत्त्या शुद्धस्वरूपमात्रावस्थितरूपेणावस्थानं पुरुषस्य कैवल्यमित्युच्यते, तदवस्थायाः वर्णनं समाधिपादे तदा द्रष्टुः स्वरूपेऽवस्थानम् इति सूत्रे जातम् ।

भाष्यकारेणापि पुरुषस्य भोगापवर्गरूपपुरुषार्थसम्पादनानन्तरं कृतभोगाप-वर्गाणाम् अत एव पुरुषार्थशून्यकार्यकारणात्मकसत्त्वादिगुणानां स्वस्वकारेण लयः प्रधानस्य कैवल्यम्, तथा च बुद्धिसत्त्वेन सह सम्बन्धाभावे स्वरूपप्रतिष्ठचिच्छक्तिरूपपुरुषस्य सदैवावस्थानं पुरुषस्य कैवल्यमित्युक्तम[2] । वाचस्पतिमिश्रेणाऽपि प्रथमः प्रधानस्य मोक्षः[3] चरमस्तु पुरुषस्येति स्वीकृतम् ।

सांख्यकारिकार ईश्वरकृष्णमतेन तु बन्धमोक्षौ प्रकृत्याः, न तु पुरुषस्य[4] । तन्मते प्रकृतिः धर्माधर्माज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्यसंज्ञकसप्तबुद्धिगतभावैः स्वं बध्नाति ज्ञानरूपान्तिमभावेन च स्वयं मुञ्चतीति[5] । विज्ञानभिक्षुमतेन वास्तवतः भोगाभाव एव पुरुषार्थः, यः स्वयं दुःखाभावरूपः परम्परासम्बन्धेन च पुरुषार्थरूप[6] इति ।

भाष्यकारस्य मतं समर्थयता भोजवृत्तिकारेणाऽपि पुरुषस्य भोगापवर्गरूप-द्विविधप्रयोजनसिद्ध्यनन्तरं कृतार्थाः गुणाः प्रतिलोमपरिणामेन मूलकारणे प्रकृतौ तिरोहिताः

भवन्तीत्युक्तम् । कृतार्थानां गुणानामयं प्रतिप्रसव: कारणे तिरोभाव: विकाराणामनुत्पत्तिर्वा कैवल्यमित्युच्यते । अथवा चेतनपुरुषस्य प्रमाणविपर्ययादि-वृत्तीनां सादृश्यनिवृत्तौ स्वशुद्धचेतनस्वरूपे एवावस्थानं स्वरूपप्रतिष्ठं वा तस्य कैवल्यमित्युच्यते7 ।

योगसम्मतकैवल्यस्य प्रतिष्ठापनार्थं बौद्धजैनादिनास्तिकदर्शनसम्मतं वेदान्त-न्यायमीमांसाशैवागमाद्यास्तिकदर्शनसम्मतमात्मसिद्धान्ताधारित-मोक्षप्रकरणस्य समालोचनं विहितमाचार्य शिवेन्द्रसरस्वतीरामानन्दयतिश्च । परमतखण्डनपुर:सरं योगानुमोदितकैवल्यस्य स्थापनार्थं या युक्ति: आचार्यशिवेन्द्रसरस्वतीरामानन्दयतिश्चोपस्थापिता सा तु पातञ्जलयोगसूत्र-स्यान्यासु टीकासु सुविरला एव ।

**१. विज्ञानवादिबौद्धमतखण्डनम्—**

माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकभेदेन बौद्धदर्शने चत्वार: सम्प्रदाया: वर्तन्ते । तेषु योगाचारा: विज्ञानवादिन: । विज्ञानवादस्य प्रतिष्ठापक: आचार्य असङ्ग: आचार्यवसुबन्धु: जीवनस्यान्तिमावस्थायां विज्ञानवादस्य आसीत् समर्थक: । एतेषामाचार्याणां मतानुसारं संवित्पदार्थ एव आत्मा, यस्यस्य आलयविज्ञानप्रवृत्तिविज्ञानभेदेन भेदद्वयं स्वीक्रियते बौद्धदर्शने8 । तत्र अहमित्याकारा संविद्धारा आलयविज्ञानम् । आलयविज्ञानं स्वप्रकाशात्मकम् । विज्ञानसन्तानानामुच्छेद एव निर्वाणं मुक्तिर्वा ।

आचार्यशिवेन्द्रसरस्वतीमतेन आलयविज्ञानात्मकं क्षणिकविज्ञानमात्मा भवितुं नार्हति । संसारदशायामात्मन: कर्त्तृत्वभोक्तृत्वानुसन्धातृत्वरूपेण प्रतीतिर्जायते । आलयविज्ञानस्यात्मत्वस्वीकारे पूर्वापरानुसन्धातृशून्यज्ञान-क्षणानामात्मत्वाभावे नियतकर्मफलसम्बन्धो भावे कृतकर्मण अभाव:, अकृतस्यान्यकृतस्य कर्मण: फलप्राप्तिर्वा स्यात्9 । किञ्च अनुभवस्मरणयो: सामानाधिकरण्यसिद्धान्तस्योच्छेद: स्यात् । विज्ञान-रूपात्मन: सुखदु:खादीनां वास्तविकभोक्ता घटपटादिविषयाणाञ्च वास्तविकज्ञातेति-स्वीकारे तस्य परिणामित्वापत्ति: । यत: यस्मिन्नेव काले विज्ञानरूपात्मनि समवायसम्बन्धेन दु:खोत्पत्ति: तस्मिन्नेव काले तत्र न सुखानुभव: । अत: ज्ञानाद्यवस्थाभेदेन आत्मन्यपि भेदस्वीकारे आत्मन: परिणामित्वप्रसङ्ग:, येन चानित्य-त्वादात्मत्वरूपेण तस्याग्रहणम् । बौद्धसम्मतविज्ञानरूपस्यात्मनोच्छेदेन निर्वाणमप्ययुक्तमिति योगसिद्धान्त:, आत्मन: सदैवैकरूपत्वादिति ।

**२. जैनमतखण्डनम्—**

जैनानां मते आत्मा न अणुपरिमाणविशिष्टः न वा महत्परिमाणविशिष्टः प्रत्युत मध्यमपरिमाणविशिष्टः सः । हस्तिपिपीलिकादिशरीरावच्छेदेन तत्तदाकारं गृह्णाति आत्मा । अतः आत्मा स्वदेहपरिमाणवान् इत्युच्यते । एवमात्मनः अलोअलोकाकाशगमनमेव मोक्ष**10** इति । प्रसङ्गेऽस्मिन् श्रीशिवेन्द्रसरस्वती-रामानन्दयतिः चोक्तम् आत्मनः परिणामित्व-स्वीकारे तस्य अचेतनत्वप्रसङ्गः परिणामित्वाचेतनत्वयोरविनाभाव-सम्बन्धात् । परिणामशीलाः घटपटादिपदार्था अचेतनाः । आत्मनः जडत्वस्वीकारे तस्य आत्मरूपेण सिद्धिर्न सम्भवति**11** । अतः जैनसम्मतमात्मस्वरूपं न युक्तियुक्तम् । तथा च तदाधारितः मोक्षोऽप्ययुक्त इति ।

**३. वेदान्तमतखण्डनम्—**

वेदान्तमतानुसारम् आत्मा चिदानन्दस्वरूपः । अतः मोक्षावस्थायां तद्रूपेणैव प्रतिष्ठितः भवति सः ।

विषयेऽस्मिन् आचार्यरामानन्दयतिमहोदयस्य सहमतिः भवति । तन्मते मोक्षावस्थायामात्मा स्वचैतन्यरूपेणैव तिष्ठति, न त्वानन्दरूपेण । आनन्दः पुरुषस्य न स्वरूपं प्रत्युत आगन्तुकधर्मः । अखण्डस्वगतभेदहीनस्यात्मनः चिद्रूपत्वानन्द-रूपत्वयोः भेदसद्भावात् युगपदेकस्मिन् धर्मिणि उभयोः सत्त्वासम्भवात्**12** । सत्त्वगुणस्य कार्यमानन्दः । अयं बुद्धेः धर्मः, न तु पुरुषस्य । पुनश्च आत्मा न सुखात्मकः । सुखं सर्वदा ज्ञेयरूपम् । ज्ञेयताज्ञानं विना न तत्सम्भवति । अतः मोक्षावस्थायां ज्ञानज्ञेयरूपपदार्थद्वयस्वीकारे नाद्वैतवादसिद्धिः वेदान्तिनाम्**13** । अतः ज्ञानरूपता (चैतन्यरूपता) एव मोक्षावस्था पुरुषस्य । जीवात्मपरमात्मभेदेनात्मनः भेदद्वयमद्वैतवाद-सम्मतम्, आत्मत्वेनोभयोरेकरूपत्वात् । अतः यद्रूपेण जीवात्मनः सुखदुःखादिना वास्तव्विास्तविकभोक्तृत्वं तद्रूपेणैव परमात्मनः सुखदुःखाद्यनुभवस्वीकारे जीवात्मवत् परमात्मनोऽपि अज्ञानित्वपरिणामित्वादिस्वभावापत्तिः स्यात् । अतः आत्मानः न साक्षात्सुखदुःखादीनां भोक्तृत्वम् । अपि तु प्रतिसंक्रमितस्वप्रतिबिम्बवशात् बुद्धिगत-धर्माणामधिष्ठातृत्वस्वीकारे अद्वैतवेदान्तिनां योगाभिमतात्मवादे प्रवेशः । अज्ञानमपि जीवात्मनः न स्वरूपम् । अन्यथा अविद्यादुःखादिसकाशात् मुक्तिप्रतिपादकशास्त्राणां वैयर्थ्यापत्तिः, स्वभावस्य यावद्रव्यभावित्वात्, आत्मनः नित्यत्वे तस्य अविद्यात्वस्वरूपा नपायाच्च । एतेन वेदान्तिनामात्ममीमांसाधारितात्मनः मोक्षकालीनचिदानन्दस्वरूपं न सिद्धमिति ।

**४. न्यायमतखण्डनम्–**

ज्ञानमात्मनि समवायसम्बन्धेन तिष्ठतीति न्यायसिद्धान्तः । 9ज्ञानाधिकरण-मात्मा" न त्वात्मा ज्ञानस्वरूपम् । आत्मा स्वरूपतः जडपदार्थः । आत्ममनः-संयोगादात्मनि चैतन्यं समुदेति । मोक्षावस्थायां मिथ्याज्ञाननिवृत्त्या आत्मनि अविद्यामूलकज्ञानादिविशेषगुणानां निवृत्तिः । अतः जडरूपेण प्रतिष्ठितः भवति सः । आचार्यशिवेन्द्रसरस्वती-रामानन्दयतिमतेन च आकाशकालदिगादिनित्यद्रव्यसकाशादात्मतत्त्वं भिन्नमिति न्यायवैशेषिका-चार्याणामपि मान्यम् । अतः मोक्षावस्थायां द्रव्यान्तरसकाशादात्मतत्त्वस्य भेदसिद्धयर्थं तत्र नित्यत्वव्यापकत्वादिभेदकगुणानां सद्भावात् जडभूतेऽप्यात्मनि पदार्थान्तरसकाशात् न्यायवैशेषिकमान्यं भेदग्रहणं यथार्थम्, नित्यत्व-व्यापकत्वादिगुणानामाकाशादिष्वपि सद्भावात् । अतः आकाशादिद्रव्येभ्यो आत्मतत्त्वस्य सिद्धयर्थमात्मनः चिद्रूपत्वग्रहणमावश्यकम् । आत्मत्वजातियोगेनापि जडद्रव्यान्तरेभ्यः सकाशात् तस्य भेदः न सिद्धः, बद्धमुक्ताबद्धमुक्तात्मनोः साधारणधर्मत्वात् । अतः आत्मत्वजातिव्यतिरिक्तं तद् आत्मतत्त्वम्, यस्याधिष्ठातृत्वं चेतनस्वरूपस्वीकारे एव सम्भवतीति ।

**५. मीमांसामतखण्डनम्—**

भाट्टमीमांसकमते आत्मा स्वयंप्रकाशः । कर्त्तृकर्मरूपेण जडचेतनरूपेण चोभयथा तस्य ग्रहणम् । 9घटमहं जानामि" इत्यत्र 9अहम्" इति प्रत्ययेन आत्मन एव ग्रहणम् । अहमिति प्रतीतिस्थले ज्ञानाश्रयत्वादात्मनि कर्त्तृत्वं ज्ञानविषयत्वाच्च तत्र कर्मत्वमिति ।

तत्रोक्तम् आचार्यशिवेन्द्रसरस्वती-रामानन्दयतिश्च यदेकस्मिन् समये एकस्मिन्नेव पदार्थे प्रमातृत्वरूपकर्त्तृत्वं प्रमेयत्वरूपकर्मत्वञ्च न सम्भवति, ज्ञानज्ञेययोः कर्त्तृत्वकर्मत्वयोर्वा परस्परविरोधात्, भावाभावौ इव । यथा भूतलरूपाधिकरणे युगपत् घटस्तद्भावयोः परस्परविरुद्धधर्मयोः सम्भावना नास्ति, तथा 9अहम्" इति प्रत्ययस्य विषयभूते आत्मनि कर्त्तृत्वकर्मत्व-रूपविरुद्धधर्मयोरध्यासः न स्वीक्रियते । अतः आत्मनः अधिष्ठातृत्वमेव स्वीकार्यं यत्तु चिद्रूपात्मकमिति ।

आत्मनः साक्षात्कर्त्तृरूपत्वं स्वीकुर्वन्ति प्राभाकराः । तेषां मते विषयसान्निध्या-देव ज्ञानरूपक्रिया उत्पद्यते । ज्ञानक्रियायाः कारकरूपेणात्मनः प्रतीतिः । 9घटमहं जानामि" इत्यत्र घटस्य ज्ञेयरूपेण आत्मनश्च ज्ञातृरूपेण प्रतीतिः । क्रियासम्पादक-त्वादात्मनि यथा कर्त्तृत्वं तिष्ठति तथा भोक्तृत्वं तिष्ठति तथा भोक्तृत्वमपीति ।

आत्मनः कर्त्तृरूपत्वं न युक्तमिति आचार्यशिवेन्द्रसरस्वती-रामानन्दयतिश्च। भिन्नभिन्नसंवित्तीनां (ज्ञानानां) कर्त्तृत्वमात्मनि युगपत् सिद्धयति क्रमे क्रमेण वेति शङ्का तेन

उत्थापिता । युगपदात्मनि कर्त्तृत्वस्वीकारे सततपरिणामित्वात् क्षणान्तरे तस्य कर्त्तृत्वाभावः । क्रमशः कर्त्तृत्वस्वीकारे तस्य एकरूपताहानिः । एकस्वरूपेण तस्य कर्त्तृत्वस्वीकारे व्यापकत्वादात्मनः सर्वदा घटपदादिविषयसन्निधानात्सर्वमपि ज्ञानमेकरूपमेव स्यात् । अनेकरूपेणात्मनः ज्ञानाक्रियादीनां कर्त्तृत्वस्वीकारे तस्य परिणामित्वपत्तिः, फलतः चिद्रूपताहानिः । अतः चेतनस्वरूपविशिष्टस्यात्मनः प्रत्यक्षरूपेण कर्त्तृत्वं न स्वीकार्यम् । अतः कूटस्थनित्यचिद्रूपस्वरूपविशिष्टस्यात्मनः योगशास्त्राभिमतस्वरूपमेव समीचीनमिति।

उपर्युक्तविवेचनेन स्वयं प्रकाशस्वरूपस्यात्मनः विषयज्ञानद्वारा ग्राहकत्वमभिव्यज्यत इति औपनिषदैकदेशिमतमपि प्रत्याख्यातमभूदिति आचार्यशिवेन्द्रसरस्वतीरामानन्दयतेराशयः ।

**६. शैवमतखण्डनम्—**

विमर्शात्मकरूपेणैवात्मनः चेतनस्वरूपत्वं स्वीकुर्वन्ति शैवाः । तेषां मते विमर्शाभावे आत्मनः जगद्वैलक्षण्यरूपचिद्रूपप्रतिष्ठा न सम्भवति ।

राजमार्तण्डवृत्तिकारमते विमर्शात्मकमेवात्मनः चिद्रूपत्वसिद्धम् । 9विमर्श" शब्दस्यार्थः इदमित्थरूपविचारः, यः खलु अस्मितारूपविपर्ययज्ञानं विना नोत्पद्यते। 9अहमेवम्भूतः" इति बुद्धितत्त्वोत्पन्नविमर्शे 9अहम्" शब्दभिन्नस्यात्मनः प्रतीतिस्तु मिथ्याज्ञानमेव । निश्चयात्मिका हि बुद्धिः । पुरुषस्तु नित्यज्ञानस्वरूप सदैकरसः, न तस्य वृत्त्यात्मकपरिणामः । अतः पुरुषस्य नाहङ्कारे अन्तर्भावः । एतेन आत्मनः चिद्रूपत्वमेव सिद्ध्यति ।

**७. योगमते कैवल्यस्वरूपम्—**

वृत्तिकारमतेन अधिष्ठातृत्वमेवात्मनः स्वरूपं यत्तु चिद्रूपम् । चैतन्यरूपत्वात् जडपदार्थविलक्षणमात्मतत्त्वम् । चिद्रूपेणाधिष्ठितः पुरुषः प्रतिबिम्बविधया भोग्यरूपबुद्धिगतसुखदुःखादिधर्माणां स्वयं भोक्ता भवति ।

पुरुषस्य भोगापवर्गरूपद्विविधप्रयोजनसिद्ध्यर्थमेव त्रिगुणात्मिकायाः प्रकृतेः महदादिरूपेण परिणमनम् । प्रतिबिम्बविधया पुरुषस्य भोगं सम्पादयति बुद्धिः । सुखदुःखादिविषयाकारे बुद्धौ प्रतिबिम्बितः पुरुषः भ्रमवशात् तया सह तादात्म्यं संस्थाप्य स्वयं सुखी दुःखी वा भवति । स्वं कर्त्ता भोक्तेति मत्वा सुखप्राप्त्यर्थं दुःखपरिहारार्थञ्च शुभाशुभकर्मणि प्रवृत्तः पुरुषः शुभाशुभकर्माशयसञ्चयपूर्वकं जात्यायुर्भोगरूपविपाकं निष्पादयति । अविवेकिपुरुषस्योपाधिभूतचित्तेन सह सम्पर्कात् पुरुषस्य शुद्धताहानिः तस्य बन्ध इत्युच्यते । औपाधिकरूपबन्धस्य शाश्वतिकनिवृत्त्या स्वशुद्धस्वरूपेऽवस्थानं

पुरुषस्य कैवल्यमित्युच्यते । केवलस्य भाव: कैवल्यमिति व्युत्पत्त्यनुसारात् जपाकुसुमस्यापसरणेन स्फटिकस्य स्वशुद्धस्वरूपेऽवस्थानवदिति ।

वस्तुतस्तु योगमते बन्धमोक्षौ भोगापवर्गौ वा न पुरुषस्य14 । विषयाकाराकारिताचित्तवृत्ति: भोग:, स्वरूपकाराकारिताचित्तवृत्तिस्त्वपवर्ग: । वृत्तिरूपपरिणामस्तु चित्तस्यैव धर्म: । तथा च विषयोपभोग अपि चित्तस्यैव । तत्त्वसाक्षात्काराख्यं ज्ञानं विवेकख्यातिरूपज्ञानं विवेकख्यात्या: निरोध: तेन चोत्पद्यमान निरोधात्मकसंस्कारश्च चित्तस्यैव धर्म: । अत: परमार्थत: चित्तचित्तस्यैव बन्धमोक्षौ सम्भवत: । एतयो: पुरुषे व्यवहार: औपचारिक: स्वाश्रयप्रतिबिम्बितसम्बन्धेनैव पुरुषे बन्धमोक्ष-व्यवहार: ।

एवं तत्तत्पुरुषीयबुद्ध्याद्युपाधीनां पुरुषोद्देशकप्रयोजनं सम्पाद्य स्वमूलकारेण गुणानामात्यन्तिकरूपेण लय: पुरुषार्थशून्य: कैवल्यमिति15 । एवं जन्मौषधिमन्त्रतपादिप्राप्तसिद्धिभिन्नसर्वसिद्धीनां मूलभूतां समाधिसिद्धिं प्रतिपाद्य जात्यन्तरपरिणामे कारणरूपं वर्णयित्वा प्रकृतिपरिणामे आवरणस्वरूपाणामधर्मादीनां निवारणार्थं धर्मादीनां शक्तिं प्रदर्श्य योगिनिर्मितचित्तानामस्मितामात्रादेवोत्पत्तिं तेषाञ्च प्रयोजकत्वं निरूपितं मणिप्रभावृत्तिकारेण । तत: योगिचित्तस्य चित्तान्तरवैलक्षण्यं तत्कर्म अशुक्लाकृष्णरूपालौकिकत्वं प्रतिपाद्य शुक्ल-कृष्ण-शुक्लकृष्णादि-कर्मविपाकानुसारं वासनानामभिव्यक्तिसामर्थ्यं कार्यकारणयोरैक्यप्रतिपादनेन जातिदेशकालादिव्यवधानसत्त्वेऽपि हेतुफलाश्रयालम्बनमाध्यमेन वासनानामभावं वर्णयित्वा अतीतवर्त्तमानागतादिकालावस्थारूपे धर्मिणि धर्मणां स्थितिं संसाध्य बौद्धाभिमतविज्ञानवादस्य निराकरणपुर:सरं सत्कार्यवादं संस्थापितम् । क्रमश: पुरुषस्य ज्ञातृत्वं चित्तमाध्यमेन द्रष्टृत्वकर्त्तृत्वभोक्तृत्वादिसकलव्यवहारसिद्धिं पुरुषस्य सत्तासिद्ध्यर्थं प्रमाणानामुपदर्शनानन्तरं दशभि: सूत्रै: कैवल्यस्य यथार्थस्वरूपप्रतिपादनार्थ कैवल्योपयोगितत्त्वानां निरूपणपूर्वकं बौद्धजैनन्यायमींमासावेदान्तादिदर्शनेष्वपि कैवल्यस्वरूपं प्रतिपाद्य प्रस्तुतयोगशास्त्रे चिन्मात्रस्वरूपप्रतिष्ठा एव कैवल्यस्वरूपमिति निर्णीय कैवल्यपादसंज्ञकान्तिमपादस्य विवेचनं तेन प्रस्तुतमिति ।

---

## सन्दर्भा: -

१. योे.सू. ४/३४ । २. व्या.भा. ४/३४ ।

| | | | |
|---|---|---|---|
| ३. | त.वै.पृ. ५४४ । | ४. | सां.का. ६२ । |
| ५. | सां.का. ६३ । | ६. | यो.वा. पृ. ३७७-७८ । |
| ७. | रा.मा.वृ. ४/३३ । | ८ | सा.द.सं प । |
| ९. | रा.मा. पृ. ४/३३ । | १०. | स.द.सं. पृ. ८१ । |
| ११. | रा.मा.वृ. ४/३३ । | १२. | सां.सू. ५/६६ । |
| १३. | रा.मा.वृ. ४/३३ । | १४. | सांख्यकारिका । |
| १५. | यो.सू. ४/३४ । | | |

—०—

**सांख्ययोगविभागाध्यक्षः,**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**श्रीसदाशिवपरिसरः, पुरी ।**

# ज्योतिषशास्त्रे वास्तुशास्त्रम्

डॉ.रमेशचन्द्र बि. शुक्लः

सूर्यादिग्रहनक्षत्रतारानिहारिकाणां बोधकशास्त्रं ज्योतिषशास्त्रम् अर्थात् - सूर्यादिनवग्रहाणामश्विन्यादिसप्तविंशतिनक्षत्राणां, ध्रुवादितारानिहारिकाणां च यस्मिन् शास्त्रे आधारः दृश्यते तत् शास्त्रं ज्योतिषशास्त्ररूपेण गृह्यते । अत इत्थमपि वक्तुं शक्यते यत् सूर्यादिग्रहरश्मिद्वारा निर्मितं शास्त्रं ज्योतिषशास्त्रमभिधीयते ज्योतिषशास्त्रे स्कन्धत्रयं विद्यते - (१) सिद्धान्तज्योतिषं (२) संहिताज्योतिषं, (३) होराज्योतिषं च । तेषां परिचयः अधः प्रदीयते ।

(१) **सिद्धान्तपक्षः** - त्रुटिकालतः प्रलयान्तं यावत् कालस्य कलनं - गणना तथा पञ्चाङ्गादिनिर्माणं सिद्धान्तपक्षतः एव भवति । ग्रहनयने अपि वृहद्लघु च द्वे विधी स्तः । त्रुट्यादितः यदग्रहज्ञानं तत् सिद्धान्तमुच्यते, शकदेर्यद्ग्रहज्ञानं तत् करणमुच्यते एवं युगोदेर्यदग्रहज्ञानं तत् तन्त्रं कथ्यते । सिद्धान्ते, करणे, तन्त्रपक्षे च ग्रहानयनपञ्चाङ्गादिनिर्माणस्य विधिः पूर्वतः त्रिविधं प्रचलितः आसीत् तैनाऽधारेण ग्रहनक्षतारानिहारिकाणाञ्चाऽनयनं क्रियते। निर्मितपञ्चाङ्गद्वाराजनानांमहदुपकारो भवति । जन्माङ्गादिनिर्माणेऽपि इदं मूलरूपेण आधारो भवति ।

(२) **संहितापक्षः** - गर्गसंहिता, नारदसंहिता, बृहस्पतिसंहिता, बृहत्ससंहितादि-विविधसंहिताग्रन्थाः सन्ति, एतेषु संहिताग्रन्थेष्वपिवास्तुविद्याध्यायाः सन्ति । पक्षेऽस्मिन् वास्तुविषयकविचारः उपस्थितो भवति ।

(३) **होरास्कन्धः** - जन्माङ्गानुसेरेण मानवस्य चराचरसृष्टिस्थितसमस्तजीवानां भावग्रहयोः संयोगेन शुभाशुभं विचार्यते इति होरास्कन्ध । इत्थं त्रिविधष्कन्धाः भवन्ति । अतः संहितापक्षीयवास्तुविचारः क्रियते -

वास्तुः वास्तुः वास्तुः तदा किन्नां वास्तु इति ? वस्तुं योग्यः वास्तुः या वासयोग्यभूमिः भवति सा वास्तुसंज्ञया गृह्यते तदावास्तुस्थितस्वरूपं विचार्यते । सिद्धान्ततत्वविवेकग्रन्थे वास्तुस्वरूपस्थितवर्णनं यथा दृश्यते-

प्रमाणवाक्यम् -

ब्रह्माण्डोदरमध्यगाऽवनिजलाऽग्न्यूर्ध्वेन्दुपूर्वग्रहार्क्षोस्थप्रबहान्तगोल-रचनासृष्टिर्यथावतस्थिता ।

कालेऽस्मिन्गहनेव्ययेऽस्तिसततं यस्मादियं तज्जयत्याद्यं निर्गुणमीशमव्ययपर-

ब्रह्मैकतत्वं शुभम् ।।

एतदनुसारं ब्रह्माण्डस्य मध्ये-उदरे, आदौ अवनी - पृथ्वी, ततो जलं, ततः अग्निः ऊर्ध्वक्रमेण ग्रहाश्च वर्तन्ते । तदत्र यथा -

आवृत्तोऽयं क्रमाच्चन्द्र बुधशुक्राऽर्कभुभूवाम्।
गोलैर्जीवार्किभानां च क्रमादोध्वोर्ध्वसंस्थितैः ।।

अर्थात् ग्रहनक्षत्रकक्षाक्रमाः श्लोकेनानेनस्पष्टीभूताः । चक्रं यथा-




एतेषां जलाऽग्निग्रहनक्षत्रप्रबहादिवायुनां मध्ये यः तिष्ठति स एव पृथ्वी नाम्नाकथ्यते अस्यां पृथिव्यां यत् निवासयोग्यस्थानं भवति स एव वास्तुरूपेण गृह्यते । कारणं कस्मिस्चिद्स्थाने भूमेरूपरि मानवदानवपशुपक्षिजीवजन्तूनामुचित-स्थानान्यावश्यकानि सन्ति अतः वास्तुशास्त्रस्यावश्यकता भवति । मानवाः बुद्धिमन्तः विचारवन्तः ज्ञानमूर्द्धन्याश्च भवन्ति एतस्मात् कारणात् मानवानां कृते वा मानवसमीपस्थितपशुपक्ष्यादिजीवानां कृते स्वाऽनुकूल वास्तुरपेक्ष्यते तदोत्तमस्थाने गृहस्य निर्माणमपेक्ष्यतो भविष्यपुराणे गृहस्यावश्यकताविषये विचारितं यथा-

गृहस्थस्य क्रियाः सर्वा न सिद्ध्यन्ति गृहं विना ।
यतस्तस्माद् गृहारम्भप्रवेशसमयौ ब्रुवे ।।
परगेहे कृताः सर्वाः श्रौतस्मार्तक्रियाः शुभाः ।
न सिद्ध्यन्ति यतस्तस्माद् भूमीशः फलमश्नुते ।।

गृहस्थस्य क्रियाः गृहं विना न सिद्ध्यन्ति, एतस्मात् कारणात् गृहारम्भ-प्रवेशसमयौ च ब्रुवे । कारणम् श्रौतकर्म - वेदप्रतिपाद्ययागादियज्ञोपवीतादिसर्वाः क्रियाः एवं स्मार्त्त - स्मृत्यादिशास्त्रेषु प्रतिपाद्यशुभफलकामनया यागानुष्ठानादिद्वारा च यानि फलान्युत्पद्यन्ते तद् गृहं विना न सिद्ध्यन्ति फलानि तानि भूमिस्वामिने लभन्ते एतस्मात् कारणात् सर्वेषां कृते गृहस्यावश्यकता भवति सामान्यतया भौतिकसुखकामनयाऽपि, प्रकृतेः संरक्षणकामनयाऽपि समाजे मानसम्मानकृतेऽपि गृहस्याऽवश्यकता भवति ।

उपरोक्तगृहनिर्माणस्य अपरं साक्ष्यं यथा-

स्त्रीपुत्रादिकभोगसौख्यजननं धर्मकामप्रदम्
जन्तूनामयनं सुखास्पदमिदं शीताम्बुधर्मावहम् ।
वापीदेवगृहादिपुण्यमखिलं गेहात्संपद्यते
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः ।।

अनेनश्लोकेनापि उपरोक्तवाक्यं सिद्ध्यति । गृहनिर्माणे प्रयुज्यमानवस्तूनां फलवैशिष्ट्यं यथा-

किमपिपुण्यकार्य क्रियते तदा तस्य एकं पुण्यफलं भवति तथैव गृहनिर्माणे यदि तृणस्य गृहनिर्माणं क्रियते तर्हि तस्य कोटिगुणपरिमितं फलं लभ्यते मृण्मयगृहस्य निर्माणं क्रियते तदा दशकोटिगुणपरिमितं फलं लभ्यते इष्टिकाद्वारागृहनिर्माणे शतकोटिपरिमितं एवं प्रस्तरस्य गृहनिर्माणे अनन्तकोटिगुणपरिमिता पुण्यप्राप्तिर्भवति। ग्रन्थप्रमाणं यथा -

कोटिघ्नं तृणजे पुण्यं मृण्मये दशसंगुणम् ।
इष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृते ।।

इति गृहनिर्माणस्यफलं शास्त्रे निर्दिष्टमस्ति । अतः इत्थं गृहनिर्माणे एतादृशवस्तूनां प्रयोगः क्रियते तदोत्तरोत्तरपुण्यं जनाः प्राप्नुवन्ति । अतः कुत्रनिवासः करणीयः कुत्र न करणीयम् इति विचारः क्रियते स्वनामराशिवशात् यथा - यस्य वृषमिथुनसिंहमकरराशिः स्यात् तदा तेषां वृते ग्रामस्य मध्ये गृहनिर्माणं शुभं न भवति । तथा बृश्चिकमीनकन्याकर्कधनुतुलामेषकुम्भ राशिस्थितजनैः पूर्वादिक्क्रमेण वासः न करणीयः यथा - ग्रामस्य पूर्वक्षेत्रे वृश्चिकराशिः अग्निकोणे मीनराशिः, दक्षिणभागे कन्याराशिः, नैऋत्यकोणे कर्कराशिः, पश्चिमे धनुराशिः, वायव्यां तुलाराशिः, उत्तरे मेषराशिः, ईशाने कुंभराशिः । अतः लेखकस्य नामराशितुला अस्ति एतस्मात् कारणात् ग्रामस्य वायव्यां पश्चिमोत्तरदिशि वासः अमङ्गलप्रद इति, इत्थम् अन्यत्रापि विचारणीयम् -

ग्रन्थप्रमाणं यथा -

गोसिंहनक्रमिथुनं निवसेन्नमध्ये ग्रामस्य पूर्वककुभोऽलिझखाङ्गनाश्च ।
कर्कोधनुस्तुलभमेषघटाश्चचद्वद्वर्गास्वपञ्चमपरा बलिनः स्युरैन्द्याः ।।

वास्तुप्रदीपेयथा-

यदिगृहस्वामिनामराशितः यस्मिन् ग्रामे निवासः करणीयः अस्ति तद् २/५/९/१०/११ राशयः सन्ति तदा उत्तमम् । तथा १/३/४/७ राशयः सन्ति चेद् मध्यमम् एवं ६/८/१२ ग्रामराशिः चेत् अशुभं भवति अर्थात् तस्मिन् ग्रामे निवासः नेष्टः भविष्यति। प्रमाणं यथा-

यदग्राममं द्वयङ्कसुतेशकाष्ठामितं भवेल्लाभगतः शुभः सः ।

यद्धं शशाङ्काग्निनगाब्धितुल्यं मध्योष्टषट्‌काकर्मितं निषिद्धम् ।।

इत्थमपि काकिणीविचारमप्यावश्यकमस्ति यथा-

स्ववर्गसंख्याया: द्विगुणं कृत्वा ग्रामवर्गस्य योग: क्रियते तथैव ग्रामवर्ग संख्याया: द्विगुणं कृत्वा स्ववर्गस्ययोग: क्रियते । उभयो: स्थाने अष्टभक्तं शैषौ काकिण्यौ भवत: यस्य काकिण्यधिका स: ऋणी भवेत् एवं यस्य काकिणीन्यूना स: तदस्थानात् लाभं प्राप्नोति ।

उदाहरणं यथा - लेखकस्य अ,क,च,ट,त,प,य,श वर्गेषु सप्तमे र वर्ण: अस्ति । तथैव वेरावलस्थानस्य वर्ग: सप्तम य वर्गे "वे" वर्ण: अस्ति अत: "र" स्थाने वर्गसंख्या ७ एवं "वे" स्ताने वर्गसंख्या सप्त (७) वर्तते । अत: गणितक्रिया क्रियते यथा-

स्ववर्ग : र = ७ x २ =१४ + ७ =२९ / ८ =५ शेष:

ग्रामवर्ग : वे = ७ x २ =१४ + ७ =२९ / ८ =५ शेष:

अत उभयो: गणितक्रियायां लेखकस्य शेषसंख्या ५ एवं नमस्य शेष संख्या ५ द्वावपि समानौ । एतस्मात् कारणात् वेरावलनगरस्य काकिणीसमानौ । अत: नगरस्य हानि: न लेखकस्य, नगरात् लाभमेव भवति एवं भूमिग्रहणकाले अन्यस्थानेष्वपिविचारणीयम् । कस्मिंश्चिदपि ग्रामे लाभ: भवति तत्र भूमिक्रयणं कृत्वा गृहनिर्माणं विधेयम् ।

भूमिपरीणक्षे आचार्यवराहमिहिरानुसारेण वर्णित: प्रसङ्ग: उद्घाट्यते यथा-

आचार्यवराहेण चतुर्विधभूमिपरीक्षणं निर्देशितम् । तद्यथा - (१) गन्धविधि: (२) वर्णविधि: (३) रसविधि: (४) प्लवविधि: एते चत्वारो विधय: परीक्षणाय निर्दिष्टा सन्ति । तत्र गन्थविधि: - गन्धविषयेऽपि भेदा: सन्ति (१) ब्राह्मण: (२) ीत्रिय: (३) वैश्य: (४) शुद्र: इति चतुर्विधवर्णा: सन्ति गन्धमपि चतुर्विधं अस्ति यथा - (१) गन्धस्यपरीक्षा - (क) ब्राह्मणेभ्य: मधुगन्ध: (ख) क्षत्रियेभ्य: घृतगन्ध: (ग) वैश्येभ्य: अन्नगन्ध: (घ) शूद्रेभ्यश्च रक्तगन्धयुक्ताभूमि: सुखदायिनी भवति।

(२) वर्णपरीक्षा - (क) ब्राह्मणेभ्य: श्वेतभूमि: (ख) क्षत्रियेभ्य: रक्तभूमि: (ग) वैश्येभ्य: पीतभूमि: (घ) शूद्रेभ्य: कृष्णभूमि: प्रशस्ता भवति ।

(३) रसपरीक्षा - (क) ब्राह्मणानां कृते मधुरसयुक्तभूमि: (ख) क्षत्रियाणां कृते कटु - - कडुवी (सर्वपतैलसदृश:) (ग) वैश्यानां तिक्त: (घ) शुद्राणां कृते कषायस्वादयुक्तभूमि: श्रेयस्करी भवति ।

(४) प्लवपरीक्षा - प्रथमं किन्नाम प्लव: विचार्यते यस्यां दिशि जलं गच्छति सा भूमि: तद् दिग्प्लवा भवति अर्थात् भूमेर्यद्दिङ्नमत्वं तद्दिग्प्लवत्वं कथ्यते । (क) उत्तरप्लवभूमि: ब्राह्मणानां कृते प्रशस्या (ख) पूर्वप्लवभूमि: क्षत्रियाणां कृते श्रेयस्करी (ग) दक्षिणप्लभूमि: वैश्यानां कृते शुमङ्करी (घ) पश्चिमप्लवभूमिश्च शूद्राणां कृते सुख दायिनी भवति ।

भूमिपरीक्षणे वराहस्यवचनं यथा-

क्षेत्रमादौ परीक्षेत गन्धवर्णरसप्लवैः
सुमध्वाज्यान्नपिशितं गन्धं विप्रानुपूर्वकम् ।
सितेषदक्तहस्तिकृष्णवर्णा यथाकमात्
मधुरं कटुकं तिक्तं काषायरससन्निभम् ।।

एवं चतुर्विधवर्णानां कृते सामूहिकशुभादिग्प्लवत्वं विचार्यते यथा -

सामूहिकचतुर्विधवर्णानां उत्तरैशानपूर्वदिग्प्लवभूमिः चतुर्विधवर्णानां कृते बृद्धिकारिणी शुभकारिणी च भवति एवं अन्यदिग्प्लभूमिः सामूहिकदृष्ट्या हानिकारिणी भवति ग्रन्थप्रमाणं यथा-

अत्यन्तं वृद्धिदं नृणामीशानप्रागुदक्प्लवम् ।
अन्यदिक्षु प्लवं तेषां शस्वदत्यन्त्यहानिदम् ।।

एवं भूमिपरीक्षणे अन्यप्रकारः यथा - भवननिर्माणकामनया यथानिर्दिष्ट-स्थानोपरि एक हस्तात्मकं दीर्घ विस्तृतञ्च गर्त खनिन्त्वा शायङ्काले जलं पूरयित्वा प्रातर्दृष्टे जलम् अस्ति चेद् बृद्धिः, पङ्कः (कीचडम्) अस्ति चेद् समा, ब्रणम् (दरार) अस्ति चेद् क्षयं - अधमः (निषिद्धम्) भूमिर्भवति तदा भूमिरियं वासयोग्या न भवति । ग्रन्थप्रमाणं यथा-

तत्रारलिमितं गर्त खनित्वाऽन्तः प्रपूरयेत् ।
प्रातर्दृष्टे जले बृद्धिः समं पङ्के ब्रणे क्षयः ।।

एवं वराहसंहितायां प्रकारान्तरेण भूमिपरीक्षणं यथा - भूमौ विृणुकान्ता, जया, जयन्ती, जीवित्पुत्रादिलता एवं याज्ञिकवृक्षाः प्रसन्नमुद्रायां दृश्यन्ते तथा उच्चनीच्चविषमभूमिः मूषकादिविलस्पुटितादिदोषरहिता तथा मधुरस्वादसुगन्धप्रसन्नोन्मुखाभूमिः किञ्चित्कालस्थितमात्रेण श्रमजनितदोषं शमयति तथा अतिशयानन्दशान्त्यानुभूतिदात्रीर्भवति सा भूमिः वासयोग्या आचार्यैः कल्पितम्।

ग्रन्थप्रमाणम् -

शस्तौषधिद्रुमलता मधुरा सुगन्ध स्निग्धा समा न सुषिराच मही नराणाम्।
अप्यध्वनि श्रमविनोदमुपागतानां धत्ते श्रियं किमुत शाश्वतमन्दिरेषु ।।

यद्यपि बहूपयुक्तविचारास्सन्ति परन्तु संक्षेपेण ज्योतिषशास्त्रे वास्तुशास्त्रस्य सारत्तत्वं यथामति कल्पितम् । यदि कश्चित् जनः अध्ययने, अध्यापने, व्यवहारे गृहभूमिवरणे च लेखेनानेन साहाय्यं प्राप्नोति तर्हि स्वचिन्तनं धन्यं मन्ये । इति ।

—०—

*ज्योतिषशास्त्रविभागाध्यक्षः, वेदवेदाङ्गसङ्कायाध्यक्षश्च ।*
*श्रीसोमनाथसंस्कृतयुनिर्वसिटी, वेराबलम्, गुजरातराज्यम् ।*

# कृदादिवृत्तिपरामर्शः

डॉ.विघ्नेश्वरमिश्रः

वृत् धातोः - वर्त्तते यया, वर्त्तते अनया वेति व्युत्पत्तौ; अधिकरणे - वर्त्ततेऽस्मिन्निति; भावे -वर्त्तनं वृत्तिरिति व्युत्पत्तौ क्तिन्[१] प्रत्यये सति वृत्तिशब्दो निष्पद्यते। तत्र परार्थाभिधानं वृत्तिः[२] इति कृदादिवृत्तिस्वरूपम्। शक्त्यादिभेदेन वृत्तिस्त्रिधैत्यत्र वृत्तिस्वरूपनिर्णये प्राचीनाः - शाब्दबोधनिष्ठपदार्थोपस्थितिजनकत्वं वृत्तित्वमिति वदन्ति। नव्यास्तु - जन्यजनकभावकल्पने गौरवाच्छब्दानित्यत्वापत्तेश्च शाब्दबोधहेतुशब्दार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वं वृत्तित्वमिति लक्षणमाहुः। केचित्तु शब्दः तदर्थसम्बन्धत्वं वृत्तित्वमिति उचुः। सा च वृत्तिस्त्रिधा। शक्तिः, लक्षणा, व्यञ्जना चेति। वाच्यवाचकभावापरपर्याया शक्तिरेव वृत्तिरिति वैयाकरणानां सामग्रिकसिद्धान्तः। तत्र शब्दानित्यवादिनां कृत्तद्धित- समासैकशेषसनाद्यन्तधातुरूपान्यतमरूपवृत्तिसंज्ञकेषु याथार्थ्यबोधाय महाभाष्य- कारेणापरं वृत्तिलक्षणं प्रतिपादितम् परार्थाभिधानं वृत्तिरिति[३]। प्रागुक्तवृत्त्यपेक्षया इयं वृत्तिः भिन्ना।

तथाहि - वैयाकरणनये शब्दस्य नित्यत्वात्समासादौ परार्थाभिधानात्मिकावृत्तेः नास्ति गतार्थता। यतो हि भाष्यकारः[४] किं पुनर्नित्यः आहोस्वित् कार्यः ? इति प्रश्नमुपस्थाप्य तत्समाधानाय संग्रहे तावत् प्राधान्येन परीक्षितम्, नित्यो वा स्यात् कार्यो वेति। तत्रोक्ताः दोषाः प्रयोजनान्यप्युक्तानि। तत्र त्वेषः निर्णयः यद्येव नित्यः अथापि कार्यः, उभयथापि लक्षणं प्रवर्त्त्यमिति व्याडिकृतसंग्रहनाम्ना ग्रन्थस्योद्धरणमुदधरत्। एवञ्च नाना युक्तिभिः पक्षद्वयमुपस्थाप्य अन्ते नित्यत्वपरीक्षणाय कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोजनविकारिभिः[५] इत्यस्य विकल्पे नित्यत्वस्य[६] लक्षणत्वेन तदपि नित्यं यास्मिंस्तत्वं न विहन्यते इति जगाद। सिद्धे शब्दार्थसम्बन्धे[७] इति कात्यायनवचनेन शब्दस्य, अर्थस्य, तयोः सम्बन्धस्यापि नित्यता प्रकटी भवति। एवं सति परार्थाभिधानादिकल्पने किं मानम्? इति जिज्ञासया भाष्यकारः[८] अथ ये वृत्तिं वर्त्तयन्ति किं त आहुः - परार्थाभिधानं वृत्तिरिति कथयामास। हरिरपि[९] -

अबुधान् प्रतिवृत्तिञ्च वर्त्तयन्तः प्रकल्पिताम्

आहुः परार्थवचने त्यागाभ्युच्चयधर्मताम्।।

इति परार्थाभिधायिकावृत्तेः व्याख्यानं तत्तदाचार्यैस्तत्तद् ग्रन्थेषु विविधरूपेण विहितम्। तथाहि -

**नागेशः**[१०] - परस्योपसर्जनार्थकस्य राजपुरुष इत्यत्र राजरूपस्य शब्दान्तरेण प्रधानार्थकपुरुषशब्देनार्थप्रत्यायनं स्वार्थविशेषणत्वेन यद् ग्रहणं सा वृत्तिः। अथवा परार्थस्य प्रधानार्थस्य पुरुषस्याप्रधानराजादिपदैर्यत्र स्वार्थविशेष्यत्वेन ग्रहणं सा वृत्तिरिति अन्वाचष्टे।

**कैयटः**[११] - परस्य शब्दस्य योऽर्थस्तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरिति। यथा - राजपुरुष इत्यत्र राजशब्देन वाक्यवस्थायमनुक्तः पुरुषार्थोऽभधीयते।

**वासुदेवः**[१२] - विग्रहवाक्यावयवपदार्थेभ्यः परोऽन्यो योऽयं विशिष्टैकार्थस्तत्प्रतिपादिका वृत्तिरिति।

**हेलाराजः**[१३] - परस्यान्यस्य प्रधानस्य पदस्य योऽर्थः, तस्योपसर्जनपदेन प्रत्यायनं परार्थाभिधानम्।

**भट्टोजिदीक्षितः**[१४] - परः - विशिष्टः, यः अर्थः, तदभिधानम् - शक्त्या, लक्षणया, अकाङ्क्षादिवशात्संसर्गमर्यदया वा यत्र सा वृत्तिः। एकार्थीभावे शक्त्या, व्यपेक्षायां लक्षणया तदभिधानमस्ते व इति भावः।

**भर्त्तृहरिः**[१५] - अधोन्यस्तकारिकया त्यागाभ्युच्चयधर्मतां वृत्तिं शब्दानित्यत्ववादिनाम् अबुधानां बोधाय इति वदति।

अबुधान् प्रतिवृत्तिञ्च वर्त्तयन्तः प्रकल्पिताम्
आहुः परार्थवचने त्यागाभ्युच्चयधर्मताम्।।

**ज्ञानेन्द्रसरस्वती**[१६] - प्रत्ययान्तर्भावेन पदार्थान्तर्भावेन वा यो विशिष्टोऽर्थः स परार्थः, स चाभिधीयते येन तत्परार्थाभिधानमिति व्याचख्ये।

परार्थाभिधानात्मिकायाः वृत्तेः एवं विध व्याख्यानादवगम्यते यत्ततत्तदर्थाभिधान-त्मिकया वाच्यवाचकभावापरपर्यायाख्यया शक्त्या समन्विताः शब्दाः लोके तत्तदर्थेष्वेव प्रयुञ्जन्ते। अत एव शास्त्रकारैः शब्देनार्थस्य विलक्षणसम्बन्धो वृत्तिपदेनाभिहितः। ततोऽन्यार्थप्रत्यायनाय वृत्तिरियं परिकल्पिता। एवमुक्तरूपेण व्याख्याता परार्थाभिधायिका वृत्तिः कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपेषु कथं सङ्घटते इति जिज्ञासायमुच्यते यत् "समर्थः पदविधिः"[१७] इति महर्षिपाणिनेः परिभाषासूत्रस्य व्याख्यानादेव परार्थाभिधानलक्षणायाः वृत्तेः प्रारम्भः। तस्मात् पदसम्बन्धिनो ये विधयः ते

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपा वृत्तिपदवाच्या भवन्ति। यः कश्चिदिह शास्त्रे पदविधिः श्रूयते स समर्थो वेदितव्यः। विधीयते इति विधि, पदानां विधिः पदविधिः। सः समासादिः। इह सूत्रे समर्थशब्दः शक्तार्थबोधकः। विग्रहवाक्यार्थाभिधाने यः शक्तः सः समर्थो वेदितव्यः इति। अथवा समर्थपदाश्रयत्वात् समर्थः इति। अर्थात् विग्रह- वाक्यार्थाभिधानरूपावृत्तिः समासे तद्धिते च वर्त्तते। परं पराङ्गवद्भावविभक्तिविधानयोः न सा वृत्तिः दृश्यते विग्रहवाक्यार्थानभिधानात्। वस्तुतस्तु समर्थानि पदान्याश्रयो यस्य सः समर्थपदाश्रयः, तद्भावः समर्थपदाश्रयत्वम्। अनेन प्रकारेण समासादिः समर्थो जायते। यस्याश्रयः समर्थः सोऽपि आश्रयधर्मारोपात् समर्थ एव भवति। तच्च सामर्थ्यं द्विविधम्- एकार्थीभावव्यपेक्षेति भेदेन। तत्र न एकार्थोऽनेकार्थस्यैकार्थत्वमेकार्थीभावः इति व्युत्पत्त्या "पृथगर्थानामेकार्थीभावः समर्थवचनम्"[१८] इति वार्त्तिककारोक्त्या च यदा एकार्थीभावसामर्थ्यं तदा सङ्गतार्थः समर्थः, संसृष्टार्थः समर्थः इति विग्रहः जायते। एकार्थीभावसामर्थ्यविषये प्रदीपकारेण[१९] तु एवं न्यगदि - यत्र पदान्युपसर्जनीभूतस्वार्थानि, निवृत्तस्वार्थानि वा प्रधानार्थोपपादनाद्, व्यर्थानि अर्थान्तराभिधायीनि वा सः एकार्थीभावः इति। मञ्जूषाकारस्तु[२०] - यत् किञ्चित् पदजन्यपृथगुपस्थितिविषयार्थकत्वेन लोके दृष्टानां शब्दानां विशिष्टविषयकशक्त्यै वोपस्थितिजनकत्वमेकार्थीभावः इति। वाक्ये हि राज्ञः पुरुषः इत्यत्र राजशब्दो राजार्थमेवाचष्टे, पुरुषशब्दोऽपि पुरुषार्थमेव। वृत्तौ तु राजपुरुष इत्यत्र राजशब्दो पुरुषार्थमेवाचष्टे इति द्वयोः एकार्थीभावः भवति। अर्थात् राजपुरुषः इति समुदाये विशेषणविशेष्यभावापन्नस्य विशिष्टस्य राजसम्बन्धिपुरुषः इत्यस्य एकार्थस्य बोधनशक्तिः वर्त्तते। असौ एव शक्तिः एकार्थीभावसामर्थ्यपदेन उच्यते। अयमेकार्थीभावः यद्यपि राजपुरुषः इत्यादिवृत्तौ एव तिष्ठति तथाप्यलौकिकविग्रहवाक्ये आरोप्यते। स्वार्थपर्यवसायिनां पदानामाकाङ्क्षावशात् यः यः परस्परान्वयस्तद् व्यपेक्षाभिधं सामर्थ्यं न इह सङ्घटते। दृश्यते हि तावत् राज्ञः पुरुषः इत्युक्ते राजा पुरुषमपेक्षते ममायमिति, पुरुषोऽपि राजानमपेक्षते अहमस्येति। अतः समर्थशब्देन वाक्ये व्यपेक्षालक्षण- सामर्थ्यमवगन्तव्यम्। एवमुक्तस्य सामर्थ्यस्यास्य पञ्चसु कृत्तद्धितसमासैकशेषसनाद्यन्तधातुवृत्तिषु सङ्घटनप्रकारः इत्थं वर्त्तते। यथा -

**कृत्** -"तत्रोपपदं सप्तमीस्थम्"[२१] इति सूत्रेण उपपदसंज्ञा उक्ता। सुबन्ते उपपदे"आतोऽनुपसर्गे कः"[२२] इत्यादिभिः कृत्प्रत्यायानां विधानात् तेषां पदविधित्वं स्पष्टमेव। तथा तत्सहचरितत्वेन उपपदरहितानामपि कृत्प्रत्ययानां पदविधित्वं बोध्यम्, तेन च वृत्तिः सिद्धा।

**तद्धित**: -"स्वार्थे परिपूर्णं पदमर्थान्तरेण उपसंक्रामते"[२३] इति "कुत्सिते"[२४] इति सूत्रभाष्योक्त्या सार्थकतद्धितानां सुबन्तात् उत्पत्त्या तेषामपि पदविधित्वं स्पष्टम्।

**समास**: -"सुबामन्त्रितेपराङ्गवत्स्वरे"[२५]"सहसुपा"[२६] इत्यनुवर्त्त्य समासविधानात् समासे पदविधित्वं फलितम्।

**एकशेष**: - "अपवाद एकशेषो द्वन्द्वं वाधिष्यते"[२७] इति भाष्यवचनात् द्वन्द्वविषये तस्य विधानात् पदविधित्वमवगम्यते।

**सनाद्यन्तधातुरूप**: -"सुपः आत्मनः क्यच्"[२८] इत्यादिनां सुबन्तात् विधानात् पदविधित्वं सिद्धमेव।

अनेन प्रकारेण कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपेषु परार्थविधानरूपा वृत्तिः सिद्धा। एवञ्च एषा परार्थाभिधानरूपावृत्तिः अवयवशक्तिसहकृतसमुदायशक्तिसाध्या। तत्रावयव- शक्तिः समासादौ लोकसिद्धा, तद्धितादौ तत्तदर्थे विहितप्रत्ययानां शास्त्रसिद्धा इति।

---

## सन्दर्भाः


१. स्त्रियां क्तिन्, अ., ३-२-९४
२. म.भा., २-१-१
३. म.भा., २-१-१
४. म.भा. पस्प.
५. म.भा. पस्प.
६. म.भा. पस्प.
७. म.भा. पस्प.
८. म.भा., २-१-१
९. वा. प., ३-१४- ९४
१०. म.भा., उ. टी., २-१-१
११. म.भा., प्र.टी., २-१-१
१२. बा. म.टी., सर्वसमासशेषप्रकरणे
१३. प्रकाशटीका
१४. म.म.टी

१५. वा.प., ३- १४- ९४
१६. त.बो.टी ,सर्वसमासशेषप्रकरणे,
१७. अ.,२-१-१
१८. म.भा., २-१-१
१९. म.भा., प्र.टी., २-१-१
२०. वै.सि. ल.म., वृत्तिविचारप्रकरणे
२१. अ. ३.१.९२
२२. अ., ३-२-३.
२३. म.भा. ५.३.७४
२४. अ. ५.३.७४
२५. अ., २-१-२
२६. अ., २-१-४
२७. म.भा., १-२-६४
२८. अ., ३-१-८

**संकेताक्षरसूची –**

अ. – अष्टाध्यायी
म.भा. – महाभाष्यम्
प्र.टी – प्रदीपटीका
वै.सि.ल.म. – वैयाकरणसिद्धान्तलघुमञ्जूषा
बा.म.टी – बालमनोरमाटीका
त.बो.टी – तत्त्वबोधिनिटीका
उ.टी – उद्योतटीका
वा.प. – वाक्यपदीयम्

**सहायकग्रन्थसूची -**

1. **अष्टाध्यायी**, पाणिनि, श्रीशान्तिस्वरूप कपूर, श्री रामलाल कपूर ट्रस्ट प्रेस, बहालगढ (सोनीपत-हरयाणा), 1985
2.**काशिकावृत्तिः**, वामन-जयादित्यप्रणीता-न्यासपदमंजरीसहिता - प्राच्यभारतीप्रकाशनम्,

वाराणसी, 1965

3. **प्रौढमनोरमा,** भट्टोजिदीक्षितप्रणीता, वाणीविलासप्रकाशन, वाराणसी
4. **वाक्यपदीयम्,** श्रीभर्तृहरिः, वामदेव आचार्यः, चौखम्बा कृष्णदासअकादमी वाराणसी, 2000.
5. **व्याकरणशास्त्रेतिहासविमर्शः,** अशोकचन्द्रगोशास्त्री,भारतीयविद्यासंस्थान, वाराणसी, 1997
6. **महाभाष्यसमीक्षणम्,** डा.गिरीशचन्द्र त्रिपाठी, श्रीवटुकाप्रकाशनम्, हरिद्वार, 1987
7. **काशिका,** जिनेन्द्रबुद्धि, विवरणपञ्जिक (न्यासः), राजशाही, 1913-1925
8. **वैयाकरणसिद्धान्तलघुमञ्जूषा,** चौखम्बाप्रकाशन, वाराणसी, 1969
9. **वैयाकरणसिद्धान्तसुधानिधिः,** सत्यप्रकाशदुवे (सं), राजस्थानपत्रिका, जयपुर, 1986
10. **अष्टाध्यायी सहजबोधः,** पुष्पादीक्षित्, पाणिनीयशोधसंस्थान, छत्तीशगड, 2004
11. **निरुक्तम्,** श्रीमद्यास्कमुनिप्रणीतम्, चौखम्बा संस्कृतप्रतिष्ठान- 38.यू.ए. -बंगलोरोड-जवाहरनगर-दिल्ली-7, 1989

—०—

*आसिष्टाण्ट प्रोफेसर संस्कृतविभागः,*

*श्रीकृष्णचन्द्रगजपतिस्वयंशाशितमहाविद्यालय,*

*पारलाखेमुण्डि, गजपति, ओडिशा ।*

# सृष्टिप्रक्रियाविमर्शः

डा.नरेन्द्रकुमारः

प्रथममुपसृजति गगनमनिलमथ
विकसदनलगतिरलति भुवनमपि ।
सलिलसरणरतिरवति विशदयति
पुनरपि पुनरपि पुनरपि पुनरपि ।।१।।
कलकलमलति समलमलिनमिलति
सकलकलिलमपि धुवति धवलमपि ।
जवरवसवनमवत उदयत इव
रथचरगतिरिह न वदति न वदति ।।२।।
अधिगतविषमिह हि ऋषिपदमिव
समनुचरित सदयनमनुपदमिव ।
प्रकरणमिदमयत लहरिचरमिव
सृजति सकलजगदिदमिह पुरमिव ।।३।।
स्वतिसृभिरनुपदगतिभिरयत इह
विाति च विषयमिदमनिल इव खलु ।
प्रथयति कथयति रथयतिपदमिव
सुविहितसुनिहितपदमिव विकसति ।।४।।
ऋषिचरकृतिरिह विलसति विकसति
झषवचनसरिदुदितमिह विदलति ।
प्रकुरूत इह सृजति च नववनमिव
वसुशशिमितमिह पुरति च चितमिव ।।५।।
प्रकुरूत इह पुरति सृजति फलति च
विशदयति सपदि दृभति च झश इह ।

स्वकृतसुकृतमनुवदति सकलमपि
विसृजति सृजति परिसृजति यतिरिव ।।६।।
अनिति नु झश इह सकलपुरणमिव
मतिविमतिमलति परिणमति फलति ।
उपमितिकृतमतितरति परिचरित
परिकरपरिचरपरिहरपतिरिव ।।७।।
अहमहमिकमतिमपनुदति नुहृदि
तदनुवदति निजमतिमिह गदति च ।
व्यचरदनवरतसलिलतरणमिव
निरणयदविकलफलमिह फलमिव ।।८।।
असितमपि मसति सितमिति समति च
विकुरूत इह सततमिव सपति खलु ।
प्रयुयुज इव खकरणभुजयुतमिव
बहुविध तनुजनिजगति निहितमिव ।।९।।
श्रितमिव वृतमिव घृतमिव चितमिव
कृतमिव हृतमिव धृतमिव भृतमिव ।
फलमिव घटयति वलयति चलमिव
यतिरिव वयति वयनचलमतिरिव ।।१०।।
स्थितिजनितमनिति सृजति सुविसृजति
बृहदिति मितमिति करणवरणमिति ।
प्रभुमितममिथुनमिथुनवयनमिति
विकसति कसति निशितसितहितमिति ।।११।।
चयनवयनशयनमयनहितमिव
सरित सरणरणरणितमणितमिव ।
बहुफलमलति सुविदुरभिदुरमिव
दृगिव मसृणरसजनितसुफलमिव ।।१२।।
इतरमितरमितरमितिरमितरति

रिति रतिरिव रतिरयसृतिगतिरिव ।
तुलितदुलितमतिचलितमलितमिव
बृहदिति सुहृदिति घटयति मितमिव ।।१३।।
प्रहरति विहरति विपुलपुलिन इव
सुविपुलवपुरलिरलितचलित इव ।
परिहृतिसुविहृतिकृतकृतिधृतमिव
फलति नियतिकृतिनिहितसुफलमिव ।।१४।।
प्रकृतिविकृतिपरिकृतिनिकृतिरसकृ
दतिलघुकृतिरियमिह परिविलसति ।
शुचिरुचिरचितसरिदुचितपदगति-
रिह पुरत उदयन इलति रविरिव ।।१५।। इति ।।

—०—

**अध्यापकः, संस्कृतप्राच्यभाषाविभागे,**
**चौधरीचरणसिंहविश्वविद्यालयः, मेरठ (यू.पी.)**

# योगशास्त्रे संयमसाध्यविभूतीनां स्वरूपनिरूपणम्

**मीनाक्षी मीणा**

"ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते"[1] । दिव्यशब्दग्राहकं श्रोत्रं यदास्य योगिनो भवति, तदा तस्य श्रोत्रस्य श्रावणमिति तान्त्रिकी संज्ञा भवति ।

"ते समाधावपसर्गा व्युत्थाने सिद्धयः"[2] । ते प्रातिभादयः समाधावपवर्गफले उपसर्ग विघ्नाः भवन्ति । अतो मोक्षमाकाङ्क्षता ते तावदुपेक्षणीयाः। तत्रापेक्षा स्यात्तदा मोक्षाद् भ्रष्टः कथं कृतकृत्यतानित्यात् ? न हात्मप्रत्ययमन्तरेण कृतकृत्यता समस्ति । न चैते स्यात्मज्ञानमुपकुर्वन्ति । अपितु व्युत्थाने सिद्धयो भवन्ति । एतदेवाभिप्रेत्योक्तम्– द्रव्यमन्त्रक्रिया -कालशक्तयः साधुसिद्धिदाः ।

प्रतिभादिषट्सिद्धयः पुरुषसाक्षात्कारस्य हेतुभूतासम्प्रज्ञातसमाधेः विघ्नरूपाः व्युत्थानकाले तु सिद्धिरूपा इत्युच्यन्ते । यथा आजन्मदरिद्रपुरुषः स्वल्पधनलाभेन स्वं धनवान् इति मत्वा भवति कृतार्थः, तथा स्वस्वरूपसाक्षात्काररूपमहत्फलापेक्षया प्रतिभादितुच्छैश्वर्यलाभेन व्युत्थितपुरुषः भवति कृतकृत्यः, न तु समाहितचित्तयोगी, आत्मसाक्षात्कारस्य कारणभूतासम्प्रज्ञातसमाधेरन्तरायरूपत्वात् ।[3] अतः स्वरूप-दर्शनार्थमेतेषां विघ्नानां परिहारार्थं प्रयासः कर्त्तव्यः साधकैः ।

**१. बन्धकारणप्रचारविषयकसंयमसाध्यविभूतयः—** "बन्धकारण-शैथिल्यात्प्रचार-संवेदनाच्च चित्तस्य परशरीरावेशः"[4] । सर्वत्र व्याप्तिशीलस्य चित्तस्य स्वशीरमात्रे सङ्कोचेन स्थितिबन्धः । तस्य कारणं धर्माधर्मौ । तयोः संयमेन यच्छैथिल्यं भवति । बन्धकारणभूतानां धर्माधर्मरूपकर्मसंस्काराणां शैथिल्यात्प्रचारगत्यादिविषयकज्ञानलाभेन च चित्तस्य शरीरान्तरे प्रवेशः सम्भवति । फलतः स्वातन्त्र्येण शरीराद् बहिः विचरति चित्तम् ।[5] चित्तस्य परशरीरे प्रवेशानन्तरं चित्तानुसरणशीलसाधकस्येन्द्रियाण्यपि शरीरान्तरे गृह्णन्ति स्वस्वस्थानम् ।

वृत्तिकारमतेन रसप्राणादिवहानाडीभ्यः चित्तवहानाडी भिन्ना ।[6] मधुकरराज-मक्षिका इव चित्तस्य शरीरान्तरबन्धनेन इन्द्रियाण्यपि चित्तमनुगच्छन्ति येन परशरीरं स्वशरीरवद् व्यवहरति योगी इति ।[7]

**२. उदानवायुविषयकसंयमसाध्यविभूतय:—** ‌9उदानजयाज्जलपङ्क-कण्टकादिष्वसङ्ग उत्क्रान्तिश्च"[8] । समस्तेन्द्रियाणां युगपत्तूल ज्वालादुत्पन्नाया वृत्तिजीवशब्दवाच्या, सा क्रियाभेदेन प्राणापानादिसंज्ञाभिर्व्यपदिश्यते। उदानादिपञ्चप्राणा: शरीरस्य जीवनीशक्तिरूपा:। नासिकाग्र्याद् हृदयं यावत् मुखनासिकादिना प्रवहमानवायु: प्राण:,[9] अन्नादिना शरीरधारणकर: । नाभिदेशात्पादतलं यावदवस्थित: मलमूत्रादीनां बहिर्नि:सरणकर: वायु: अपान:[10] । नाभिदेशं परिवेष्ट्य भुक्तपीतान्नरसादीनामेकीकरणकर: शरीरं व्याप्य समानरूपेण यथोचितस्थाने नयनात् समान: । नासिकाग्र्याद् मस्तकं यावद्रसादीनां प्रवहमानवायु: उदान: । शरीरस्यापादमस्तकगामिवायु: व्यान: । उदानजयाच्छरीरं निधूर्ततूलीकासदृशं भवति येन जलपङ्ककण्टकादिषु निर्बाधगमनशक्ति: प्रयाणकाले देवयानमार्गेण ऊर्ध्वगतिश्च प्राप्नोति साधक: । उदानजय: उदानविषयकसंयमस्य फलमिति शास्त्रकाराणामाशय:[11] ।

**३. समानवायुविषयकसंयमसाध्यविभूतय:—** "समान-जयाजयाज्ज्वलनम्"[12] । आ हृदयादानाभिस्थित: समान: । तस्य वंशीकारान्नाभिनिकटस्थानेर्ज्वलनं भवति । येनासौ योगी ज्वलन्निव दृश्यत् इत्यर्थ: । उदरस्थजठराग्निमावृत्य समानवायोरवस्थानम् । तत्र संयमेन जठराग्नि: आवरणरहित: निर्मुक्त: ऊर्ध्वाभिमुखी भूत्वा दीप्तिमान् भवतीति प्रतीयते। प्रज्वलितस्यास्य अग्ने: प्रभावेण योगिशरीरं तेजोयुक्तं प्रतीयते ।

भाष्यकारोक्त "ज्वलति"[13] इति पदेन समानवायुविषयकविभूते: स्वरूपं साधकस्य शरीरे प्रद्योतितं भवति । यत: "ज्वलति" पदं दीप्त्यर्थकाकर्मकधातो: "ज्वलदीप्तौ" इत्यस्मान्निष्पन्नम् । विज्ञानभिक्षुप्रभृतयस्तु "ज्वल्" धातो: प्रयोग: दहनार्थे उद्दिष्ट इत्यामनन्ति। विभूते: एतत्स्वरूपं भाष्यविरुद्धत्वात् नादरणीयम् । अत: संयमितसाधक: समानजयात् तेजोयुक्त: भवतीति वृत्तिकारमतं समीचीनमिति ।

**४. श्रोत्राकाशसम्बन्धविषयकसंयमसाध्यविभूतय:—** "श्रोत्राकाशयो: सम्बन्धसंयमादिव्यं श्रौतम्[14] । अहङ्कारिकस्यापि श्रोतस्याकाशेनाधाराधेयभाव: सम्बन्धोऽस्ति। तत्र संयमादिव्यं श्रौतेन्द्रियं भवति । तेन दिव्यशब्दान्युगपज्जानातीत्यर्थ: । श्रोत्रेन्द्रियाकाशयो: सम्बन्धविषयकसंयमनेन दिव्यं भवति श्रोत्रमित्यत्र महाभारतीयमुपाख्यानं प्रमाणम्[15] ।

शब्दग्राशब्दग्राहकमिन्द्रियं श्रोत्रमहङ्कारात्समुत्पन्नम्, यस्य आधार: आकाश: । आकाशोऽप्यहङ्कारजन्यसूक्ष्मशब्दतन्मात्रादुत्पन्न: । शब्दगुणकमाकाशम् ।

अत: आकाशश्रोत्रेन्द्रिययोर्मध्ये आधाराधेयभावसम्बन्ध: । तत्र संयमेन श्रोत्रे दिव्यशक्तिरुदेति येन सूक्ष्मव्यवहितविप्रकृष्टादिशब्दश्रवणसामर्थ्यं प्राप्नोति साधक: इति ।

---

**सन्दर्भा:**

१. योे.सू. यो.सु. ३/३८
२. यो.सू. यो.सु. ३/३९
३. व्या.भ
४. यो.सू. ३/४०
५. त.वै. पृ. ३५६
६. व्या.
७. रा.मा.वृ. ३/३८
८. यो.सु. ३/४१
९. व्या.भा. ३/३९
१०.व्या.भा. ३/३९
११.त.वै. पृ. ३५८, यो.वा. पृ. ३५८
१२.रा.मा.वृ
१३.व्या.भा. ३/४०
१४.यो.सू. ३/४३
१५ पा.र. पृ. ३५८

—०—

**शोधच्छात्रा, सांख्ययोगविभाग।**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**श्रीसदाशिवपरिसर:, पुरी, ओडिशा**

# पद्मपुराणे आत्मस्वरूपम्

**डा. उमा राहुल**

देव गरुडध्वज: स विष्णु:
शुभ्रं करोति सदैव चक्रपाणि: ।
श्रेष्ठं विमलं विधुं स्वभक्त्या
नारायणञ्च नामामि माधवं तम् ।। १ ।।
विज्ञा: सदनेऽत्र कोविदा ये,
व्यासोत्सवे विबुधाश्च राजमाना: ।
वाण्या मनसा प्रमोदभावै:
श्रेष्ठान् हृदा प्रणमाम्यहं बुधान् तान् ।।२।।
तर्कैर्मथितं विचारितं यद्
ह्यात्मस्वरूपयुतं मुदात्मभावै: ।
सन्दर्भयुतं तथैव गोष्ठ्यां
प्रस्तौम्यहं सरलं नु शोधपत्रम् ।।३।।
देही[१] कथितस्तथा शरीरी,
जीव:[२] स संसरतीह कर्मगत्या[३] ।
आत्मा[४] परमात्माऽऽत्मनो[५] य:,
सोऽहं स्वैर्भुवि शाश्वत: सजीव: ।।४।।
प्रेतै:[६] पितृभिस्तथा[७] पिशाचै:[८] -
र्लोके सृतं प्रथितं नु चात्मतत्त्वम् ।
भ्रान्त्या भ्रमतीह मोहभावै[९] -
स्तत् कर्मभि: सततं हि कालचक्रे ।।५।।
पद्मेऽतीति संसृत: स जीव:,
काये[१०] रत: शुभयात्मतत्त्वरूपे ।

स्वार्थै: सहितो विभाति कर्ता,
चर्चायुत:[११] करणेन बिम्बसूच्याम् ।।६।।
देहेऽतति योऽत्र गर्भवासे[१२] -
ऽधिष्ठानभावयुतो नु भाति लोके ।
दैवै रहित: कथं स पद्मे,
गत्या सदैव सरत्यहो पुराणे ।।७।।

---

**सन्दर्भा: -**


पद्मपुराणे-१ -१.१७.४०, २.१.६, १.१७.५३ ।
२ - २.१.४३, २.१.२९ ।
३ - २.१.२९ ।
४- १.१.८, १.१.३८, २.५२-७१, २.५२.१४८, १.१२.१४७, १४८, १४९ ।
५ - २.१३.७१, २.५२.७३, १.१२.१४६, १.१.३० ।
६ - २.४७.२५, २.४७.२३, २.४७.३२, २.४८.८३ ।
७ - २.५.२, १.१४.३४, २.५.२, २.४८.८३ ।
८ - २.४७.२३ ।
९- १.२.२ ।
१०-१.१.४९, २.५२.७१, १४८, १.३.२ ।
११- १.१.२९, १.१.१५, १.१.३८, १.१.५०, १.२.९, १०, १.२.१८, ३१, ७२, ७८, १.३.१, २.१.२९, २.१.६६, २.११.८, २.१२.८, २.४७.२३, २५, ३२, २.४८.८३ ।
१२- १.१.३७, १.१.२, १.२.१२ ।


—०—


L - ब्लक्,शास्त्रीनगर,
मेरठ (यु,पी)

# पाद्मे सृष्टिखण्डे अर्थवर्गः

डॉ. चन्द्रशेखरमिश्रः

पाद्मे उल्लिखितमस्ति यत् परिश्रमेण प्राप्ता श्रीः स्थयिनी भवति। सपातहस्तगता श्रीः स्थायिरूपेण शोभते। श्रीविष्णुरत्रोदाहरनमस्ति। समुद्रमन्थनं प्रमाणमस्ति। पाद्मे विष्णुरेव प्रधानः समुद्रमन्थनकाव्ये । अत एव ब्रह्मा उक्तवान् यत् भवानेव लक्ष्मीपतिः भवतु। न तु दैव्यो दानवो वा ।[१] सृष्टिः पुल्यस्त्य उवाच - हे राजन् भीष्म! श्राद्धकर्मणा प्रसन्नतायुक्तः पितृवर्गोधनाहिकं ददाति ।[२] यज्ञेनापि ऐश्वर्यं मिलति। विष्णुध्यानपरश्चन्द्रश्चिरकालं यावत् महत्तपः अकरोत्। एतेन प्रसन्नात्मा नारायण उक्तवान् - वरं ब्रूहि।चन्द्रदेव : कथितवान् यत् अहामिन्द्रलोके राजसूययज्ञइ कर्त्तुमिच्छामि। विष्णोराज्ञां प्राप्यचन्द्रो यज्ञं कृतवान्। अत एव स चन्द्रो दुर्लभमैश्वर्यं सौन्दर्यञ्च प्राप्तवान्। अर्थं लक्ष्मीं वा आप्तवान्।[३]

विष्णिरूवाच- हे शंकर! दानवेषु धनं न शोभते। हे भगवन्! दानवानां धनमाहृत्य पार्थकेभ्यः ब्राह्मणेभ्यः तथा च आर्तजनभ्यः दातव्यम्। दानवमर्नावृत्तिर्लाकिहितकरी न भवति। धनमर्थं वा प्राप्य ते दानवा मत्ता भवति। अर्थस्य प्रतिग्रहविषये अतिरूक्तवान् यत् धनवोहलोके एव प्रीत्यै भवति। प्रेत्ये वै कटुकोदयं प्रतीयते । तस्मात् यहि कश्चित् आनन्त्यं सुखमिच्छन्ति चेत् तेन धनं न ग्राह्यम्।[४]

वसिष्ठ उवाच- इहलोके धनसंचयस्यापेक्षया तपः संचयः करणीयः। धनसंग्रहकर्त्ता सुखं न लभ्यते। कश्यप उवाच- धनद्वारा मोहो वर्धते। मोहः नरके पातयीते। परस्य कृते धनपरित्यागोह्य क्षयधर्मप्रदानकारणं भवति। तत् परित्यागरूपकर्म एव मौक्षफलं ददाति। गौतम उवाच- लोभग्रस्तेऽन्तः कारणे जनाः संकटापन्ना भवति। यस्यचित्ते सन्तोषस्तस्य कृते सुखमेव सुखम्। अतः सन्तोषभाव एव परं सुखप्रदः[५]।

ब्रह्मोवाच- हे नारद! स्वर्गे वासं कृत्वा इह लोके पुन ये आगच्छन्ति तेषां हृदये इये सद्गुणाः सर्वदा वसन्ति। १. प्रशस्तं दानम् २. मधुरावाणि ३. देवार्चनम् ४. ब्राह्मणतर्पण ञ्च । ये जनाः नरकवसात् आगता भवन्ति तेषां हृदये प्रोक्ताः सद्गुणाः न भवन्ति।[६]

योगस्याष्टाङ्गिकमार्गे यमः परिगम्यते। एतस्मिन् अस्तेदमपि अन्तर्भवति। अत एव ब्रह्मावाच- हे नारद! श्रोत्रिय धनं देवस्य गुरो र्वा धनं न हर्तव्यम्। राजस्वं-तपस्विधनं-

पंगुधनम् अन्धम्धनं तथअ नारीधनमपि न हर्तवयम्।[७]

श्रीभगवानुवाच- हे नरोत्तम ब्राह्मण! धनस्य प्रपञ्चकारणत्वं कथयामि । धनस्यरक्षणे कष्टम्। यथा यथअ लार्भा भवति तथा तथा लोभ: संजायते । लोभयुक्तनर: सर्वदानरके वसति। गुणहीन द्रव्यस्य धनस्य वा गृहवासकारणात् परिवारजनेषुन्माह उद् भवति । उन्माह: कामजनितविकारो भवति ।बुद्धिभ्रमो जायते। भ्रमात् मोहोऽऽहंकारश्च उत्पद्यते। एताभ्यां क्रोधोलोभश्च प्रादुर्भवत: तत: तेषा नाशो भवति। तप: क्षयकारणात् चित्ते मोहजन्यमालिन्यं संजायते। मलिनतारूपश्रृङ्खलाद्वारा आबद्धकारणात् जीव: क्रमश: पतति विविधयोनिषु।[८] क्षपणकरूपी भगवानद उवाच- यस्य समीपे धनं भवति तस्य पार्श्वे मित्रं वसति। यस्य पार्श्वे धनं तस्य कृते बान्ध्वा: सन्नद्धा भवानो कुल,शील। पाण्डित्य,रूपं, भोगो, यश:,सुखञ्चैतानि धनिके पुरूषे एव विलसन्ति। धनहीनस्य सन्निकटे परिवारोऽपि न शोभते। स: स्वधर्मानुष्ठानमपि कर्त्तुं न शक्नोति। धनाभावे ईष्टापूर्तिकर्म अपि नसंभवति। धनिकस्य कृते दानरूपकर्म अपि एव स्वर्गसोपानं भवति। परन्तु निर्धनस्य कृते एतदपि साधनं न स्यात्। व्रतादिकस्यानुपालनं धनाभावे न भवति। धर्मोपदेशश्रवणार्थं दुरयान्नपि न सिद्धयति। रोगनिवारणं, पथ्यसेवनं स्वकीयशरीररथा, शत्रृविजयादिकर्म अपि धनाभावे न संभवति।[९]

तपस्विसाधक उवाच- कामनात्यागाद् एव समस्तव्रतपालनं भवति। क्रोधपरित्यागाद् एव तीर्थसेवनं भवति। दयाभाव एव जप इव भवति। सन्तोष एव शुद्धं धनम्। अहिंसा एव सर्वोत्तमासिद्धि:। शिलोञ्छवृत्तिद्वारा जीव्स्यापनम् उत्तमं भवति। शााकभोजनम् एव अमृतभोजनं मन्यते। उपवासो हि उत्तमइ तप:। सन्तोष एव वृहद्भोग:। परदारा मातृसमासंमाननीया। परधनं मृत्तिका इव प्रतीयतते। एतद् एव सर्वं मम यज्ञभूतम्।[१०]

निष्कर्षरूपेण यद्यापि धनम् आवश्यकं तथापि तत् श्रेयस्करं न भवति। तत् केवलं प्रयोमार्गत्वेन एव रोचते, श्रेयोमार्गस्त्वे न। अत एव सत्यमुक्तं यतोऽभ्युदयनि:श्रेयससिद्धि: स धर्म:

१. पद्मपुराणम्/अध्याय:०४/सम्पूर्णम् नागपब्लिशर्स[११]अ जवाहरनगर, दिल्लीनगरम्।
२. क. अध्याय: ०९/ श्लोकांश: १८५
   ख. अध्याय: १०/ श्लोकांश: ९५
३. पद्मपुराणम्/अध्याय: १/श्लोकांश: १६ त: २२ पर्यन्तम्।
४. क. पद्मपुराणम्/अध्याय: १९/श्लोकांश: २३६ त: २४३पर्यन्तम्।
   ख. भगवद्गीता/अध्याय: १६/श्लोकांश:०४

५. पद्मपुराणम्/अध्याय: १९/श्लोकांश: २५९ त: २६१पर्यन्तम्।
६. क. पद्मपुराणम्/अध्याय: ५०/श्लोकांश: १२९त: १३२पर्यन्तम्।
ख. भगवद्गीता/अध्याय: १६/श्लोकांश:१८
७. क. पद्मपुराणम्/अध्याय: ४९/श्लोकांश: ९७त: ९९पर्यन्तम्।
ख. योगसूत्रम्/साधनपाद/२९
८. क. पद्मपुराणम्/अध्याय: ५३/श्लोकांश: २५त: ३७पर्यन्तम्।
ख. श्रीमद्भागवतम्/स्कन्ध:११/ अध्याय: २३ श्लोकांश:१६ त:१९ पर्यन्तम्।
ग.भगवद्गीता/अध्याय: ०२/ ४२ तथा ४४ श्लोकांश:६२ तथा६३।
९. पद्मपुराणम्/अध्याय: ५३/श्लोकांश: ५३त: ५९पर्यन्तम्।
१०. क. पद्मपुराणम्/अध्याय: ५३/श्लोकांश: ६०त: ६३पर्यन्तम्।
ख.भगवद्गीता/अध्याय: १४/२४
ग. पद्मपुराणम्/१९/३३६।
११. वैशेषिकधर्शनम्/प्रथामाध्याय:। प्रथमाह्निकम्/सूत्रम्-०२।

—०—

**प्राप्तावसर: प्राचार्य:**
**लालबहादुरशास्त्री स्मारक पी. जी. कलेज**
**आनन्दनगरम् महाराजगंजनपदे, (यू.पी)**

# संस्कृतसाहित्ये जनजातिविचार:

**डॉ. लक्ष्मीनारायणबेहेरा,**

विविधाचारसंस्कृतिभि: सम्पोषिता परिपुष्टा चेयमस्माकं परमोपासनीया संस्कृतभाषा। भारतस्य सामाजिक-राजनैतिक-अर्थनैतिकादिषु सर्वविधविषयेषु तथ्योपस्थापनार्थं संस्कृतभाषा महत्त्वपूर्णं स्थानमभिदधाति। समाजशास्त्रदृष्टया परिशील्यते चेत् संस्कृतवाङ्मये तत्कालीन- भारतीयसमाजस्य सुविस्तृतचित्रं यत्र कुत्रापि समुपलभ्यते। अत्र ब्रह्मणक्षत्रियादीनां वर्णविशेषाणाम् उपवर्णानाञ्च सामाजिकचरित्राधारितं वर्णनं सारल्येन समुपलभ्यते एव। तद्भिन्नानां द्राविडानां वनवासीनामपि विषये चर्चा केषुचित् स्थलेषु संवृत्ताऽस्ति। प्रामुख्येन संस्कृतसाहित्ये कवय: स्वकीयकाव्येषु जनजातिचरित्राणां वर्णनं कुर्वन्ति स्म। आलङ्कारिकैरपि विविधोदाहरणप्रसङ्गे जनजातिचरित्रस्यावतरणम् अकुर्वन्।

अमरकोषे जनजातिवर्गस्य कृते कानिचन पर्यायपदानि निर्दिष्टानि वर्त्तन्ते। यथा-

क) चण्डाल-प्लव-मातङ्ग-दिवाकीर्त्ति-जनङ्गमा:।
निषाद-श्वपचावन्तेवासि-चाण्डाल-पुक्कसा।[१]

ख) भेदा: किरात -शवर–पुलिन्द -म्लेच्छजातय:।[२]

ग) व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि स:।[३]

अर्थात् किरात-शवर-पुलिन्द-म्लेच्छ-पव-मातङ्ग-चण्डाल-चाण्डाल-दिवाकीर्त्ति-जनङ्गम-निषाद- श्वपच-पुक्सक-व्याध-मृगवधाजीव-मृगयु-लुब्धकेति पदानि वनवासीनां जनानां कृते प्रयुक्तानि। एतत्तु सुविदितं यत् लौकिकसंस्कृतसाहित्यस्य आदिकवि: वाल्मीकि: सर्वादौ रत्नाकरनामधेय: आसीत्। स: च वनवासी रत्नाकर: दस्युवृत्तिमवलम्ब्य कुटुम्बं परिपोषयति स्म। कालान्तरे कठोरतपस: प्रभावेन कवित्वशक्तिमलभत। कथनस्यायमभिप्राय: यत् वाल्मीकि: अपि वनचर: वनवासी वा आसीत्।
वाल्मीके: प्रथमकवित्वस्फरणे श्लोक: निरगच्छत् यत् -

मा निषाद प्रतिष्ठां त्वमगम: शाश्वती: समा:।
यत्क्रौञ्चमिथुनादेकमवधी: काममोहितम्।।[४] इति।

अत्र वाल्मीकि: शोकसन्तप्तस्य क्रौञ्चस्य वैक्लव्येन असह्यमान: निषादस्य कृते अभिशापं ददाति। स: च निषादोऽपि वनवासी एवासीत्।

संस्कृतसाहित्यजगति ख्यातनामान: कवय: अपि स्वकीयग्रन्थेषु वनवासीनां विषये चर्चितवन्त:। किरातार्जुनीयम् इत्याख्ये काव्ये प्रथमश्लोके दैत्यवनवासी वनचर: कुशली गुप्तचरो भूत्वा दुर्योधनस्य शासनवृत्तान्तं युधिष्ठिराय न्यवेदयत्। एतेन सुस्पष्टं यत् तदानीन्तनकाले गुप्तचरवृत्तौ अपि वनवासीन: नियोजिता: भवन्ति स्म। पुनश्च काव्येस्मिन्

महादेव: शिव: किरातवेशेन अर्जुनेन साकं युद्धमकरोत्। अत्र भगवत: शिवस्य किरातचरित्रावतरणं वनवासीनां संग्रामपाटवतामभिव्यनक्ति। भट्टनायककृतवेणीसंहारनाटके पाण्डवै: सह वनवासीनां मित्रताविषये वर्णनं प्राप्यते। अत्र द्वितीयपाण्डव: भीम: स्वस्य दैन्यभावं युधिष्ठिरं निकषा उपस्थापयति यत्-

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्यधै: सार्द्धं सुचिरमुषितं वल्कलधरै:।
विराटस्यावासे स्थितमनुचितारम्भनिभृतंगुरु:
खेदं खिन्ने मयि भजति नाद्यापि कुरुषु।।[५]

अत्र तृतीये पादे वल्कलधरै: व्याधै: सह पाण्डवा: वहुकालं यावत् वने उषितवन्त: इति ज्ञायते। एतेन पाण्डवै: सह वनवासीनां सहावस्थानत्वं मित्रत्वं च प्रमाणितं भवति।

कालिदास: स्वकीयविरचितस्य कुमारसम्भवस्य प्रथमसर्गे हिमालयवर्णनप्रसङ्गे वनचराणां सुरतकालीप्रकाशव्यवस्थाविषये श्लोकमुपस्थापयति -

वनेचराणां वनिता सखानां दरीगृहोत्सङ्गनिषक्तभास:।
भवन्ति यत्रौषधयो रजन्यामतैलपूरा: सुरतप्रदीपा:।।[६]

अर्थात् हिमालये विद्यमाना: औषधपादपा: स्वप्रकाशै: वनचरगृहाभ्यन्तरमपि प्रकाशयन्ति, येन सुरतकाले तैलप्रदीपस्य आवश्यकता नानुभूयते। अत्र कालिदासस्य श्रृङ्गारचर्चायां वनचरवधू: एवालम्बनम्। मेघदूते अपि यक्ष: मेघं सूचयति यत् गमनवेलायां जलाभिलाषिण्य: कृषिकर्मप्रवृत्ता: वनचरवध्व: त्वां दृष्ट्वा प्रसन्ना: भविष्यन्ति। परन्तु ता: भ्रूविलासे अनभिज्ञा: भवन्ति। अत्र कालिदास: वनचरवधूनां श्रृङ्गारविद्यायाम् अनभिज्ञतां प्रतिपादयति। यथा- त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञै:

प्रीतिस्निग्धैवनचरवधूलोचनै: पीयमान:।
सद्य: सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण।।[७]

नीतिसाहित्ये अपि किरातादीनां वर्णनं समुपलभ्यते। किरातनायिका दुर्मूल्यानां रत्नानां महत्त्वविषये अनभिज्ञा भवतीति श्लोके वर्णितमस्ति। य: यस्य महत्त्वं जानाति स एव तस्यादरं करोति इति नीतिपरकोऽयं श्लोक: -

न वेत्ति यो यस्य गुणप्रकर्षं
स तं सदा निन्दति नात्र चित्रम्।
यथा किराती करिकुम्भजातां
मुक्तां परित्यज्य विभर्त्ति गुञ्जाम्।।[८]

अत्र किराती करिकुम्भजातमुक्ताया: मूल्यविषये अनभिज्ञा वर्त्तते। सा वने मुक्ताफलं परित्यज्य मयूरपक्ष्यसंग्रहणे दत्तचित्ता दृश्यते।

व्याधा: कोमलस्वरेण गानं कृत्वा मृगादीन् पशून् अपि आकर्षयन्ति इति ज्ञायते। वनचारीण: व्याधस्य सङ्गीतपाटवता श्लोकेस्मिन् प्रातिपदिताऽस्ति -

यस्य चाप्रियमन्विच्छेत्तस्य कुर्यात्सदाप्रियम्।

व्याधा: मृगवधं कर्त्तुं सम्यग्गायन्ति सुस्वरम्।।[९]

कस्यचित् अप्रियं भवतु इति कश्चित् वाञ्छति चेत् तं प्रति आदौ प्रियभावं प्रदर्शनीयम्। यथा व्याध सुस्वरगीतावृत्तिं कृत्वा मृगान् आकर्षयति शराघातं च करोति।

कथासरित्सागरे व्याधस्य मृगयाविषये नीतिपरककथा सुप्रसिद्धा वर्त्तते। तद्यथा-

अग्रे व्याध: करधृतशर: पार्श्वतो जालमाला
पृष्ठे वह्निर्दहति नितरां संनिधौ सारमेया:।
एणी गर्भादलसगमना बालकै: रुद्धपादा
चिन्ताविष्टा वदति हि मृगी किं करोमि क्व यामि।।[१०]

अत्र वनचर: व्याध: सशावकहरिणीं दृष्ट्वा वनप्रदेशस्य एकस्मिन् पार्श्वे अग्निसंयोगं करोति, द्वितीये पार्श्वे कुक्कुरान् नियोजयति, अपरत्र जालं संयोजयति, अन्तिमे पार्श्वे सशस्त्रो भूत्वा दण्डायमान: भवति। मृगी किं करिष्यामीति भगवन्तं प्रार्थयति। अत्र दैवात् सर्वविधसमस्या: समाधिता: अभवन्, मृगी च मुक्ता जाता। परन्तु मृगयाविषये व्याधस्य पाटवता, व्यूहरचनायां कुशलता वा प्रमाणिता भवति।

एकस्मिन् पद्ये वर्णितमस्ति यत् किरात: कस्तुरिमृगस्य गुणप्रकर्षविषये अनभिज्ञ: भवति। स: मांसलोलुपो भूत्वा मृगान् मारयतीति कारणात् दु:खित: कवि: मृगमुपदिशति-

कस्तुरिकां हरिणमुञ्चवनोपकण्ठं मा सौरभेण ककुभ: सुरभि: कुरुस्व।
आस्तां यशो ननु किरातशरामिघाता स्त्रातापि हन्त भविता भवतो दुराप:।।[११]

अत्र वनचरव्याधस्य निर्बोधता प्रमाणिता भवति।

वनचररमणी अकान्तियुक्ता अनाकर्षणीया सत्यपि प्राणेश्वरस्य वनचरस्य मन: हरति, इति विषये अन्त्यानुप्रासाच्छादितं सुन्दरमेकं पद्यं यथा-

मध्येन क्रशिमा स्तने न गरिमा देहे न वा कान्तिमा
श्रोणौ न प्रतिमा गतौ न गरिमा नेत्रे न वा वक्रिमा
लास्ये न द्रढिमा न वाचि पटिमा हास्ये न वा स्फीतिमा
प्राणेशस्य तथापि मज्जति मन: मय्येव किं कारणम्।।[१२]

सा च वनचरवधू: कृशोदरी न भवति, शरीरे कान्ति: नास्ति, वाचि पटुता नास्ति, नायिकासुलभगुणा: न सन्ति । तथापि सा किरातस्य प्रेयसी भवतीति श्लकस्याभिप्राय:। ध्वन्यालोके स्वत:सम्भविवस्तुना अर्थशक्त्युद्भवध्वनिप्रसङ्गे पदप्रकाशस्य उदाहरणं वर्त्तते -

वाणिजकं हस्तिदन्ता: कुतोऽस्माकं व्याघ्रकृत्तयश्च।
यावल्ललितालमुखी गृहे परिष्वक्कते स्नुषा ।[१३]

श्लोकस्यास्य अनुशीलनेन कामातुरव्याधस्य रतेराधिक्यकारणात् कृशता, व्याधवध्व: रतिश्रान्तत्वहेतो: केशशय्यां प्रति अनवधानता च प्रकाशिते भवत:। पुनश्च व्याधजनजाति: हस्तिदन्तविक्रियेण, व्यघ्रचर्मविक्रयेण च कुटुम्बपोषणं करोति इति श्लोकेनानेन सूच्यते।

तत्रैव ध्वन्यालोके स्वत:सम्भविवस्तुना अथशक्त्युद्भवध्वनिप्रसङ्गे वाक्यप्रकाशताया: उदाहरणं प्राप्यते-

शिखिपिच्छकर्णपूरा वधूर्व्याधस्य गर्विणी भ्रमति।
मुक्तफलरचितप्रसाधानानां मध्ये सपत्नीनाम्।।[१४]

अत्र व्यधस्य नवपरिणीता वधू: शिखिपृच्छादिभि: सुसज्जिता भूत्वा सपत्नीनां मध्ये सगर्वं भ्रमति। श्लोकस्यानुशीलनेन ज्ञायते यत् वानवासीनां सामाजिकव्यवस्थायां बहुविवाहप्रथा प्रचलिताऽसीत्। तत्रापि नवागताया: पन्त्या: कृते व्याघपति: सर्वविधसौविध्यं परिकल्पयति स्म।

नलचम्पूकाव्ये चन्द्रिकावर्णनप्रसङ्गे भ्रन्तिमान्-अलङ्कारसंयुक्तं पद्यमेकं वर्त्तते-

मुग्धा: दुग्धाधिया गतां विदधते कुम्भानधो वल्लभा:
कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि।
कर्कन्धूफलमुच्चिनोति शवरी मुक्ताफलाकाङ्क्षया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका।।[१५]

अत्र तृतीये पादे शुभ्रचन्द्रालोकेन भ्रमिता शवरी वने मुक्ताफलसंग्रहावसरे कर्कन्धुफलानि उच्चिनोति। अत्र वनवासीवधू: शवरी पदवाच्या वर्त्तते।

साहित्यदर्पणकार: विश्वनाथ: प्रतिपादयति यत् यत्र भिल्लनायिकाविषये शृङ्गारचर्चा भवति तत्र शृङ्गाररस: न भवति, अपितु श्रृङ्गाररसाभास: भवति। तृतीये परिच्छेदे श्रृङ्गाराभासस्य उदाहरणं वर्त्तते यत् -

जघनस्थलनद्धपत्रवल्ली गिरि मल्लीकुसुमानि कापि भिल्ली।
अवचित्य गिरौ पुरो निषण्णा स्वकचानुत्कचयाञ्चकार भर्त्ता। [१६]

इत्थं संस्कृतवाङ्मये विविधप्रसङ्गेषु जनजातिजीवनधारा विवर्णितास्ति। सम्यगनुसन्धानेन विषयेऽस्मिन् वहुविधतथ्यानि समुद्घाटितानि भवितुं शक्नुवन्ति। इति।

---


सन्दर्भा:

१.अमरकोष:, शूद्रवर्ग: -५५ ।
२. अमरकोष:, शूद्रवर्ग: -५६ ।
३.अमरकोष:, शूद्रवर्ग: -५७ ।
४. रामायणम् ।
५.वेणीसंहारम् ।
६.कुमारसम्भवम् -सर्ग: -१ ।
७.पूर्वमेघ:, श्लोक: -१६ ।
८.सुभाषितसौरभम्, श्लोक: -५८ ।
९.सुभाषितसौरभम्- श्लोक-११९ ।
१०.सुभाषितरत्नभाण्डागारम् ।
११.सुभाषितरत्नभाण्डागारम् ।
१२.शृङ्गाररसविमर्श: ।
१३.ध्वन्यालोक:, द्वितीय-उद्योत: ।
१४.ध्वन्यालोक:, द्वितीय-उद्योत: ।
१५.साहित्यदर्पणम्, दशमपरिच्छेद: ।
१६.साहित्यदर्पणम्, दशमपरिच्छेद: ।


—०—


***अध्यापक: शिक्षाशास्त्रविभाग:,***
***श्रीजगन्नाथसंस्कृतविश्वविद्यालय:, पुरी , ओडिशा ।***

# धर्मशास्त्रे दण्डनीतिः

लङ्क. पार्थ सारथिः

धर्मशब्दः धृञ् = धारेण इति धातोः मन् प्रत्यये कृते सति निष्पन्नो भवति । ध्रियते लोकःअनेन इति, धरति धारयति वा लोकं , ध्रियते च यः सः धर्मः ।

धर्मलक्षणम् -

श्रुतिप्रमाणको धर्मः । श्रुतिश्च द्विविधा - वैदिकी, तान्त्रिकी च । भविष्यपुराणे उक्तम् -

''धर्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयलक्षणम् ।
स तु पञ्चविधः प्रोक्तो वेदमूलः सनातनः ।।
अस्य सम्यगनुष्ठानात्स्वर्गो मोक्षश्च जायते ।
इहलोके सुखैश्वर्यमतुलं च खगाधिप ।।'' [१] इति ।

श्रेयःसाधनकारणं धर्मः इत्यर्थः । धर्मराजेन कथितम्-

श्रुतिर्विभिन्ना स्मृतयो विभिन्ना नैको मुनिर्यस्य मतिर्न भिन्ना ।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः सः पन्था ।। [२]इति ।

महाभारते धर्मस्य स्वरूपं महामतिना भीष्मोणोक्तम् -

''श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।।'' इति ।

अर्थात् आत्मकल्याणानुरूपं विश्वकल्याणं येन साधितं स्यात् स एव धर्मः । अन्यत्र ''धारणाद्धर्ममित्याहुः'' इत्यादि प्रोक्तम् । जीवने यो धार्यते स एव धर्मः । किं जीवने धार्यते इति जिज्ञासायां मनुप्रोक्तः धर्मः वस्तुतो जीवने धार्यः । तद्यथा - ''आचारः परमो धर्मः ।'' इति । महर्षिः जैमिनिः धर्मलक्षणवर्णनक्रमे कथयति - ''चोदनालक्षणोऽर्थो धर्मः''[३] । इति । मनुष्यस्य शुभमाचरणं धर्मशब्देनोच्यते । धर्मस्य ज्ञापकहेतवः उत्त्काः सन्ति ते यथा। पुनश्च उक्तम् - ''वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ।।[४]। श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ।।'' [५] इति । धर्मस्य कारकलक्षणम्– ''धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।''

[६] । इति । गोविन्दराजस्तु कथयति - इह संसारे किं परमार्थतः सुखसाधनमिति जिज्ञासायां विद्वद्भिः उक्तं धर्मएव सुखसाधनम् । मीमांसाशास्त्रे यः श्रेयस्करः स एव धर्मशब्देन उच्यते । यावत्कालपर्यन्तं धर्मस्य पालनमभवत् तावत्पर्यन्तं मानवाः सुखेन स्वजीवनं यापयिन्ति स्म, यतो हि पुरुषार्थचतुष्टये धर्मस्य प्राधान्यं तथा च मोक्षस्य प्रसिद्धं सोपानम् । अन्यथा धर्मेण हीनं मानवस्तु पशुरेव । तदुक्तं यथा हितोपदेशे -

''आहारनिद्राभयमैथुनंच सामान्यमेतत्पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ।। ''इति।

वस्तुतस्तु आहारनिद्राभयमैथुनादिभिः कर्मभिः पशुरपि संयुतो भवति । परन्तु पशुतो मनुष्यस्य विशेषता केवलं धर्मसम्पादनादेव भवति । अतः यदि धर्मेण हीनो मानवः स्यात् तार्हि नास्ति किंचित्तस्य वैशिट्यं पशुभ्यः । उदाहरणस्वरूपं - महाभारतयुद्धे धर्मेणाधर्मोपरि विजयो लब्धः । भगवता कृष्णेन धर्मस्योपदेशः कृतः पाण्डवैश्च तस्य पालनं कृतम् । अतस्तेषां दुःखानां विनाशोऽभवत् । तथा च दुर्योधनेनोक्तम् - ''जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः ।'' इति । उक्तञ्च–धर्म यो बाधते धर्मो न स धर्मः कुधर्मस्तत् । आविरोधी तु यो धर्मः स धर्मः सत्यविक्रम ।। धर्मेण हन्यते व्याधिः धर्मेण हन्यते ग्रहः । धर्मेण हन्यते शत्रुर्यतो धर्मस्ततो जयः ।।इति ।

धर्मशास्त्रे आचारः व्यवहारः प्रायश्चित्तं चेति त्रयः विभागाः सन्ति । एतेषु व्यवहोरभागे दायभागः अन्यतमः विषयः । स च अधुना वर्ण्यते । तत्र दायशब्देन यद्धनं स्वामिसंबन्धादेव निमित्तादन्यस्य एव भवति तदुच्यते । स च द्विविधः– अप्रतिबन्धः, सप्रतिबन्धश्च । तत्र पुत्राणां पौत्राणां च पुत्रत्वेन पौत्रत्वेन च पितृधने पितामहधने च स्वं भवतीति अप्रतिबन्धो दायः । पितृव्यभ्रात्रादीनां तु पुत्राभावे स्वाम्यभावे च स्वं भवतीति पुत्रसद्भावः स्वामिसद्भावश्च प्रतिवन्धस्तद्भावो पितृव्यत्वेन भ्रातृत्वेन च स्वं भवति इति सप्रतिबन्धः दायः । विभागो नाम द्रव्यसमुदायविषयणामनेकस्वाम्यानां तदेकदेशेषु द्रव्यस्य व्यवस्थापनम् । दायविभागवर्णनक्रमे द्वादशपुत्राणां नामोल्लेखपरमावश्यकः। तदुक्तं यथा -

औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च । कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ।।
पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा ।स्वयं चोपागतः पुत्रा द्वादशैते प्रकीर्तिताः ।।इति।

दण्डस्य महत्त्वम् -

प्रजापालनं राष्ट्रमुख्यस्य परमो धर्मः। दण्डसहायेन प्रजापालनं सुकरं भवति । मनुस्मृतिसप्तमेध्यायें दण्डस्य आवश्यकता विषये एवं कंथतम् –

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।

दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ।। [७]इति।

दण्डनीतिः –

आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनं दण्डनीतिः । दण्डनीत्यामेव सर्वविद्यारम्भाः प्रतिबद्धाः भवन्ति । इयं विद्या अलब्धलाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धिनी, वृद्धस्य पात्रेषु प्रतिपादिनी च । तस्यामायत्ता लोकयात्रा । अतः लोकयात्रार्थी सर्वदा उद्यतदण्डः स्यात् । न हि एवंविधम् वशोपनयनम् अस्ति भूतानां यथा दण्डः इति आचार्याः वदन्ति । किन्तु कौटल्यस्य मतमस्ति यत् तीक्ष्णदण्डो हि भूतानाम् उद्वेजनीयः । अतः यथार्हं दण्हः भवेत् । सुविज्ञातः प्रणीतो हि दण्डः प्रजाः धर्मार्थकामैः योजयति । दुष्प्रणीतः कामक्रोधाभ्याम् अज्ञानात् वानप्रस्थिपरिव्राजकानपि कोपयति । किं बहुना पुनर्गृहस्थान् । अप्रणीतो हि मात्स्यन्यायम् उद्भावयति । बलीयानबलं हि ग्रसते दण्डधराभावे । तेन गुप्तः प्रभवतीति - चतुर्वर्णाश्रमो लोके राज्ञा दण्डेन शासितः । स्वधर्मकर्मभिरतो वर्तते स्वेषु वेश्मसु ।। इति । दण्डस्य प्राधान्यं मनुना प्रतिपादितम् – यच्चापि धर्मसमयात् प्रच्युतो धर्मजीवनः । दण्डेनैव संसाधयेत् स्वकाद धर्माद्धि विच्युतम् ।।[८] दण्डव्यवस्थापने च सुविचारः कार्यः। अतएव तत्र व्यवस्थायां याज्ञवल्क्येन एवं निर्देशः कृतः – ज्ञात्वाऽपराधं देशञ्च कालं बलमथापि वा । वयः कर्म च वित्तं च दण्डं दण्ड्येषु कल्पयेत् ।। इति। मनुनापि प्रतिपादितम् -अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः । सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ।।[९] मनुना च तत्र एवं विशेषः प्रदर्शितः – वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम् । तृतीयं धनदण्डञ्च वधदण्डमतः परम् ।।[१०] मनुना दण्डस्य दशस्थानानि प्रदर्शितानि - उपस्थमुदरं जित्वा हस्तौ पादौ च पञ्चमम् । चक्षुर्नासा च करौ च धनं देहन्तथैव च ।।[११]इति । पुरुषार्थचतुष्टयस्योपलब्धिरपि धर्मादेव संजायते । प्राचीनकाले ऋषयो राजानश्च धर्मपथानुयायिनो भवन्ति स्म । ये राजानः स्वं स्वं धर्मं न त्वक्तवन्तः तेषामजरममरं च यशःशरीरे अद्यापि वर्त्तते । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः । तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ।। इत्थं भगवता बहुधा बोध्यमानः अर्जुनः युद्धाय सज्जो बभूव । दण्डभावात् सर्वाः प्रजाः शुभे कर्मणि प्रवर्तन्ते न जातुचिदशुभे कर्मणि । तदुक्तं भगवता मनुना – दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति । दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ।। यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः । शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः।। [१२]इति। अर्थात् दण्डभयादेव सर्वाणि भूतानि स्थावराणि च भोगाय कल्पते । पुरा यदा प्रजावत्सला

रामादिनृपा आसन् तदा तेषां प्रजा अपि तादृश्य एवाभवन् ।अद्यत्वे तु भिन्ना दशा सत्यमुक्तं विचारजुषा विदुषा – राज्ञि धर्मिणि धर्मिष्ठाः पापे पापं समे समाः ।राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ।।इति ।

---

**सन्दर्भाः –**

१. मनुस्मृति - मन्वर्थमुक्तावलीटीकायाम् - २/१।
२. महाभारते ।
३. पूर्वमीमांसायाम् - १/१/२।
४. मनुस्मृतौ - २/१२
५. तत्रैव - ४/१५५
६. तत्रैव - ६/९२
७. तत्रैव - ७/१८
८. तत्रैव - ९/२७३
९. तत्रैव - ८/१२६
१०. तत्रैव - ८/१२७
११. तत्रैव - ८/१२५
१२. तत्रैव - ७/१८,२०

**उपयुक्तग्रन्थसुची –**

१. भविष्यपुराणम्
२. महाभारतम्
३. जैमिनीदर्शनम्
४. हितापदेशः
५. मनस्मृतिः

—०—

*शोधच्छात्रः,संस्कृतविभागः*
*मार्गदर्शकः - डॉ० डि.यन्. दीक्षितः*
*हैदराबाद केन्द्रिय विश्वविद्यालयः,तेलङ्गाना*

# श्रीपरशुरामविजयमहाकाव्ये वैदिकवाङ्मयविमर्शः

विकाश दाशः

विद्ज्ञाने, विद् सत्तायाम्, विदृलाभे, विद्विचारणे-एतेभ्यो धातुभ्यो "हलश्चेति" पाणिनि-सूत्रेण करणाधिकरणयोः घञ्प्रत्यये कृते सति वेदशब्दः सिद्ध्यति । प्रोक्तञ्च ऋग्वेदभाष्यभूमिकायाम् -सत्तायां विद्यते ज्ञाने वेति विन्ते विचारणे ।

विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्वदः क्रमात् ।।

अत्र सत्तया सदिति ज्ञानेन चिदिति प्राप्त्यानन्दश्चेति सच्चिदानन्दरूपो वेद- इत्यर्थो लभ्यते । वेदविषये तु विख्यातं सत्यानुप्राणितवचनं यद् "भूतं भवद्भविष्यच्च सर्वं वेदात् प्रसिद्ध्यति" । अन्यच्चवेदोऽखिलो धर्ममूलम् - इति।

वैदिकवाङ्मयम् -

मन्त्रात्मकसंहितास्वरूपो वेदः । स च ऋग् - यजुः सामाथर्वभेदैश्चतुर्धा। विषयमिमं स्फुटीकर्त्तुं आपस्तम्बसूत्रे प्रोक्तम् - "मन्त्रब्राह्मणयोर्वेदनामधेनम्" । मननात् त्रायते इति मन्त्रः । मन्त्रैरेव देवतानां स्तुतयो यज्ञयागाश्च सविधि सम्पन्नताम् आप्नुवन्ति । मन्ये ऋग्वेदे तु स्तोत्रात्मकमन्त्राणां पारावारो विविधभव्य-भावाऽभङ्गतरङ्गैर्विलसतितराम्। यद्यपि भगवता पतञ्जलिना व्याकरण-महाभाष्ये ऋग्वेदस्यैकविंशतिशाखाः प्रोक्ताः किन्तु साम्प्रतं तु पञ्चशाखा एव प्रमुखरूपेण प्राप्ताः सन्ति । ताश्च - शाकल - वाष्कलाश्वलायन - शांखायन- माण्डकायन-नामभिर्जेगीयन्ते। यत्रार्थवशेन पादव्यवस्था छन्दसां ते मन्त्राः ऋग् इति नाम्ना प्रसिद्धाः । ऋचां समूह एव ऋग्वेदत्वेन व्यवहारपथमवतीर्णः। यजुर्वेदः प्रमुखतया यज्ञविधानानां निदर्शनम् । "यज्" धातोः "उस्" - प्रत्यये कृते सति "यजुः" शब्दो निष्पद्यते । यत्र च यज्ञभागीयविधिसम्पादकानां मन्त्राणां समाकलनं सञ्जातं विराजते स तु यजुर्वेद इति नाम्ना विश्वविश्रुतः । एष यजुर्वेदः शुक्लयजुर्वेदः, कृष्णयजुर्वेदः इति भेदाभ्यां द्विविधः । अत्रेदमाकूतम् यत्रविशुद्धानां यज्ञीयमन्त्राणामेव समाकलनं स शुक्लयजुर्वेदनाम्ना प्रसिद्धः। यत्र च यज्ञीयमन्त्रैः सह ब्राह्मणभागस्य सम्मिश्रणमवाप्यते स कृष्णयजुर्वेदनाम्ना प्रथितः। शुक्लयजुर्वेदस्य तावद् द्वे शाखे प्रसिद्धे माध्यन्दिनशाखा काण्वशाखा चेति । कृष्णयजुर्वेदस्यानेकशास्त्रेषु पञ्चाशीतिशाखानामुल्लेखः समुपलभ्यते किन्तु तासु साम्प्रतं चतस्रःशाखा एव सम्प्रायन्ते- तैत्तिरीयशाखा, मैत्रायणीशाखा, कठशाखा कपिष्ठल-शाखा चेति । सामवेदविषये तु लोके प्रसिद्धं - "गेवं साम" इति । भगवता श्रीकृष्णेनापि सामवेदस्य महत्त्वं प्रतिपादितं गीतायाम् - "वेदानां सामवेदोऽस्मि" इति कथयता। योऽत्र लोके सामवेदं जानाति स एव वेदतत्त्वं जानातीति प्रोच्यते धीधनैः । उपासनापरोऽयं सामवेदः । यत्र गेयात्मकोपासनात्मकाश्च मन्त्राः संकलिताः सन्ति स वेदः समावेद इति नाम्ना जेगीयते । चतुर्षुवेदेषु "अथर्ववेदस्य माहात्म्यं लौकिकसुखसमृद्ध्यर्थं विविधानुष्ठान-प्रतिपादनादतिशयेन वरीवर्ति । मानवजीवनं यैरुपायैः सुखसुविधासम्पन्नं स्यात् तेषामुपायात्मकविधानामत्र वर्णनं प्राप्यते । भगवता पतञ्जलिना व्याकरण-महाभाष्ये- "नवधा-अथर्वाणः" इति विलिख्यास्य नवशाखाः निर्दिष्टाः किन्तु साम्प्रतं समुपलभ्यते

शाखद्वयमेव। एका पैप्पलादशाखा, द्वितीया च शौनकशाखेति ।

**ब्राह्मणसाहित्यम् -**

वैदिकवाङ्मये ब्राह्मणसाहित्यमतीव समृद्धं महत्त्वपूर्णं वर्तते । साहित्यमेतद् गद्यात्मकमस्ति । यज्ञविधानं केन विधिना कदा च कर्त्तव्यमिति विषयमवलम्ब्यात्र विशदा चर्चा सम्प्राप्यते । वैदिकज्ञानविज्ञानतत्त्वार्थबोधकं ब्राह्मणसाहित्यमस्तीति न तिरोहितम्प्रेक्षावताम् । सम्प्रति समुपलब्धेषु ब्राह्मणग्रन्थेषु शतपथब्राह्मणं विशिष्टरूपेण महत्त्वमावहति । प्राप्तानां ब्राह्मणग्रन्थानां नामानि तु चेत्थम् -१.ऐतरेयब्राह्मणम्, २. शाङ्खायनब्राह्मणम्-ऋग्वेदीयम्, ३. शतपथब्राह्मणम् -शुक्लयजुर्वेदीयम्, ४. तैत्तिरीयब्राह्मणम्- कृष्णयजुर्वेदीयम्, ५. ताण्ड्यब्राह्मणम्, ६.षड्विंशम्, ७. सामविधानम्, ८. आर्षेयम्, ९. दैवतम्, १०. उपनिषद्ब्राह्मणम्, ११. संहितोपनिषद्ब्राह्मणम्, १२. वंशब्राह्मणम्, १३. जैमिनीयब्राह्मणम्सामवेदीयम्, १४. गोपथब्राह्मणम्- अथर्ववेदीयम्। एतेषु ब्राह्मणग्रन्थेषु यज्ञानुष्ठानतत्त्वानां वर्णनमस्ति । शतपथ-ब्राह्मणस्य स्वरूपं विषयवर्णनमपि महत्त्वपूर्णं विशालञ्चास्ति । त हि सम्यग्रूपेण स्पष्टग्रूपेण स्पष्टरीत्या साङ्गोपाङ्ग वर्णनमस्ति।

अरण्यकसाहित्यम् -

वेदवाङ्मयेषु आरण्यकसाहित्यमपि विशालं समृद्धमस्ति । अत्र हि प्रमुख रूपेण आत्मचर्चा, अध्यात्मचर्चा वर्तते । एतेषां व्यापकविवेचनविषयमधिकृत्यैवो-पनिषद् विद्या सम्प्रवृत्ता । वस्तुतस्तूपनिषदामन्तर्भावः आरण्यकेषु सञ्जायते । अथवा उपनिषदः आरण्यकस्यैवाङ्गत्वेन विराजन्ते । उपनिषत्सु दशोपनिषदोऽतीव प्रसिद्धाः सन्ति ।

वैदिकी राष्ट्रभावना-

ऋग्वेदीयैतरेयब्राह्मणग्रन्थे वैदिककालस्य अनेकराज्यानां नामानि वर्णितानि सन्ति। तेषु-साम्राज्यभौजराज्यस्वराज्यवैराज्यपारमेष्ठ्य राज्यमहाराजाधिपत्य राज्यादीनि नामानि प्रमुखानि सन्ति । वैदिककाले भारतीयशासनव्यवस्थायाम् एतासां साम्राज्यादिशासनव्यवस्थानां परिपूर्णरूपेण सञ्चालनं सुसज्जीरीत्या प्रचलितमासीदिति विज्ञायते । पूर्वमेव यदि भारतं विविधशासनप्रणालीभिः परिचचिमासीत् तदा स्वतन्त्रे भारते "संविधान-निर्माणकाले तासां शासनव्यवस्थानां विचार एव न कृत इति कीदृङ्मोहविजृम्भितम् ? वैदिककालेऽपि जनाः स्वराष्ट्रं प्रति श्रद्धानाः आसन् । राष्ट्रोन्नतिविषये जागृताः, राष्ट्रभावनाभारितास्ते भागवन्तं सदैव प्रार्थितवन्तः - आब्रह्मान् ! ब्राह्मणो ब्रह्मवर्चसी जायताम्, आराष्ट्रे राजन्यः, शूर इषव्योऽतिव्याधी, महारथो जायताम्, दोग्ध्री धेनुः वोढाऽनड्वान्,आशुः सप्तिः, पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः, सभेयो युवाऽस्य यजमानस्य वीरो जायताम्, निकामे निमाके नः पर्जन्यो वर्षतु, फलवत्यो न ओषधयः पच्यन्ताम्, योगक्षेमो नः कल्पताम् ।।अन्यश्च ऋग्वेदमन्त्रेऽपि राष्ट्रभावनायाः स्वरूपं दृरीदृश्यते- ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पत्तिः । ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ।। "एते वरुण-बृहस्पतीन्द्राग्रयो देवाः, अस्माकं राष्ट्रं सुस्थितं सुदृढं कुर्वन्त्विति" प्रार्थनातत्परा वैदिककालीना जनाः राष्ट्रभावनाभाविता आसन्- इति विषये न संशीतिगन्धः। समाजस्य स्थापना, विकासश्च कथं सञ्जातौ ? राष्ट्रस्यावधारणायाः विकासः केन प्रकारेण प्रवृत्तः

इति प्रश्नानां समाधानं ज्ञातुं वेदानां समाजशास्त्रीय दृष्ट्यापि महत्त्वं जागर्ति ।
सांस्कृतिकं महत्त्वम्-

भारतीयसंस्कृतेर्मूलस्वरूपं वेदेष्वेव सम्प्राप्यते । वेदेु समेषां प्राचीनभारतीयानां जीवनपद्धतिः, सदाचारविचाराश्च समुपलभ्यन्ते । वैदिकसंस्कृतिरेव वस्तुतः संसारस्य प्रथमा संस्कृतिरस्ति । वैदिकसंस्कृतेरेव सर्वासां संस्कृतीनां सभ्यतानाञ्च विकासः सञ्जातः। प्रोक्तञ्च यजुर्वेदे - सा प्रथमा संस्कृतिर्विश्ववारा । वैदिकानामार्याणां यज्ञे विश्वासः, ईश्वरे महती श्रद्धाः, अनास्था च भौतिकवादप्रपञ्चेषु वेदानुशीलनम् ज्ञायते । मुक्तिधनेनैव वैदिकानां चीवनोद्देश्यमिति वेदाः संगिरन्ति । वेदेषु मानवानां कर्त्तव्यनिर्धारणं प्राप्यते । प्रोक्तञ्च भगवता मनुना -सर्वेषां स तु नामानि, कर्माणि च पृथक् पृथक् । वेदशब्देभ्य एवादौ, पृथक् संस्थाश्च निर्ममे ।। वेदा आचारसंहितारूपेण प्रामाणिकाः सन्ति । वेदेषु सर्वेषां धार्मिकानां नैतिकानां, सामाजिकानां च कर्त्तव्याणां निर्देशः आदेशश्च लभ्यते । "वेदाः प्रमाणमिति" कथनेन सर्वश्रेष्ठां प्रामाणिकतां स्वीकुर्वन्ति सदसद्व्यक्ति-विवेकिनो विद्वासः। महाभाष्यकारेण पतञ्जलिना सकलतत्त्वार्थनिरूपका वेदा इति स्वीकुत्योन्मुक्तकण्ठेन कथितम्-

ब्राह्मणेन निष्कारणो षडङ्गोऽध्येयो गेयश्च । भगवता मनुना तु प्रोक्तं यद् सर्वज्ञानमयो हि वेदः - य कश्चिद् कस्यचिद् धर्मो मनुना परिकीर्त्तितः । स सर्वोऽभिहितो वेदे, सर्वज्ञानमयो हि सः ।। शास्त्रीयं महत्त्वं वेदानां प्रतिपादयतां भरतमुनिना नाट्यशास्त्रे सारल्येन कथितम्- जग्राह पाठ्यं ऋग्वेदात्, सामभ्यो गीतमेव च । यजुर्वेदादभिन्यान् रसानाथर्वणादपि ।। भाषाया विविधाश्रयक्रमनुशीलनपरैर्भाषावैज्ञानिकैरपि वेदानां महत्त्वं स्वीकृतमास्ते। भाषावैज्ञानिकं महत्त्वं विशेषतः तुलनात्मकभाषाविज्ञानाय परिलक्ष्यते । विविधभाषशणामुत्पत्ति क्रमावबोधाय वेदानुमनुशीलनं नितान्तमनिवार्यमस्ति ।
वैज्ञानिकं महत्त्वम् -

वैदिकमन्त्रेषु सूक्ष्मरूपेण वैज्ञानिकसङ्केताः सन्निहिताः सन्ति । ब्राह्मणग्रन्थेष्वपि गद्यात्मकमन्त्रेषु वैज्ञानिकं रहस्यं दरीदृश्यते । मन्ये, वैदिकयुगे परमर्षयो विशेषरूपेण विज्ञानं प्रति जागृता आसन् । अतएव सङ्केतमात्रेण परमविज्ञानं ज्ञातुं समर्थाः सञ्जाताः । तस्मिन् समये विस्तृतव्याख्यानस्य अपेक्षा नासीत् किन्तु कालचक्रेण सा विज्ञानविबोधिनी शक्तिर्जनेषु क्षीणतां प्राप्ता । वेदमन्त्राणां देवस्तुतिपरकमेवार्थं स्वीकुर्वन्ति जनाः । विद्यावाचस्पतिभिर्मधुसूदन-महोदयैर्विशेषरूपेण देवस्तुतिपराणां मन्त्राणां विज्ञानविषयप्रतिपादनतत्त्वरहस्यं समुदघाटितम् । तैः "समुद्घाटितेषु वेदविज्ञानेषु केन्द्राकर्षणशक्तिविज्ञानस्वरूपं तावदत्रोदाहरणरूपेण प्रस्तूयते-

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योर्नि परिपश्यन्ति धीरास्तस्मिन् हतस्थुर्भुवनानि विश्वा ।।

मन्त्रेऽस्मिन् प्रजापतिशब्दाद् ईश्वरो देवश्चार्यो अभिव्यक्तौ भवतः । ईश्वर शब्दादिव्यक्तिश्चेत्तदावतारवादस्य सिद्धिर्भवति । यदा च प्रजापतिदेवार्थो एतद्ददातु केन्द्राकर्षणशक्तिविज्ञानं प्रकटितं भवति ।

मन्त्रस्य सामान्यार्थोऽस्ति यत् प्रतिपातिदेवः सकलानां वस्तूनामन्तर्भे - केन्द्रे

संचरति । स तु स्वम्भूः, किन्तु स विभिन्नानां पदार्थानां जनकः । वैज्ञानिका एव तस्य प्रजापतेर्योनिं समुद्रभवस्थान-मवलोकयितुं समर्थाः सन्ति । तत्रैव सर्वेषां पदार्थानामवस्थितिः।

सम्यक्प्रकारेण यदा वयमस्य मन्त्रार्थस्य विमर्शं कुर्मः तदा जानीमहे यत् प्रथमं तावत् केन्द्रं विनिश्चित्य सर्वपदार्थानां निर्माणं प्रसारश्च भवतः । कोऽपि साधारणो जनः केन्द्रशक्तिं ज्ञातुं शक्नोति याज्ञिका वैज्ञानिका वा केन्द्रशक्तिं द्रष्टुं ज्ञातुं वा प्रभवन्ति । कस्यापि वृत्ताकारस्य पदार्थस्य केन्द्रं तु सारल्येन ज्ञातुं शक्यते किन्तु चतुरस्र-त्रिकोण-दीर्घ-तिर्यक् पदार्थानां केन्द्रज्ञानं दुर्वेद्यमस्ति । आधुनिका वैज्ञानिका अपि स्पष्टरूपेण व्याहरन्ति यत् केन्द्रे विज्ञाते सति महद्भारवतः पदार्थस्य हस्तोत्तलनं कतर्तु शक्यते वयं प्रत्यक्षतोऽपि पश्यामो यद् लम्बाकारं वंशं सामान्य-बलवान् अपि केन्द्रं गृहीत्वा उत्तोलयितुं हस्तेनोत्थापयितुं शक्नोति। इदमेव कथयति मन्त्रोऽयं यत् प्रजापतिः प्रतिपदार्थं केन्द्रे तिष्ठति ।

एवमेव विप्रकृष्टावलरोकनविज्ञानं सौरविज्ञानं, प्राणविज्ञानं वृष्टिविज्ञानमन्त्र मनोविज्ञानमित्यादिविषयाणां वर्णनेन वेदानां वैज्ञानिकं महत्त्वं समेषां विज्ञानजिज्ञासूनां जनानां समक्षं स्फुटीभवति । वयमत्र निश्चप्रचत्वेन वक्तुं शक्नुमो यद् वेदविज्ञान-स्याधुनिकविज्ञानेन सह तुलनात्मकमध्ययनेन वेदेषु विज्ञानतत्त्वमन्थनेन च विश्वस्मिन् विश्वे नवयुगावतारो भवितुमर्हति।अनेकेषामनिर्णीतविषयाणां निर्णयमपि सम्यक्प्रकारेण साधु संगत्या भवितुमर्हति।

साहित्यिकमहत्त्वम् -

वैदिक सूक्तेषु मन्त्रेषु च रसालङ्कारसौन्दर्ययोजनानां माधुर्यमपि समुल्लसति। श्रृङ्गारसयोजना यथा- इषुर्न श्रिय इषुधे रसना गोषा शतसा नरं हि
उषः सूक्ते तु सरसं कवित्वं संस्फुरति । तद् यथा-

अव स्यूमेव चिन्वती मघोन्युषा याति स्वसस्य पत्नी ।
स्वर्जनन्ती सुभगा सुदंसा आन्ताद् दिवः पप्रथ आपृथिव्याः ।।

एवं वयं पश्यामो यद् वेदे रसानां चारुचर्वणा काव्यशोभाकराणामलङ्काराणां सरसयोजना, सौन्दर्यच्छटा मधुरभावाभिव्यञ्जना च विलसतितराम् । येन वेदानां साहित्यिकमहत्त्वमतिरोहितं प्रेक्षावताम् । सत्यानुसंधातृभिर्मन्त्रात्मात्मकरूपेणानुभूताः वेदाः, संसारे स्वीकीयं वैशिष्ट्यमावहन्ति स्वकीयैः भावात्मकैः सौन्दर्यैः, वाङ्मयप्रस्तुभिः, राष्ट्रियावधारणाभिः, सामाजिकमहत्त्वस्थापनाभिः, सांस्कृतिकमहत्त्वैः वैज्ञानिकमहत्त्वैः, साहत्यिकमहत्त्वैश्च । एते वेदाः, विश्वाशान्तिस्थापनायां पर्यावरणसंरक्षणे च साम्प्रतमपि हितकारकाः सन्ति । वस्तुतो वेदानां महत्त्वमपारं वर्तते । नैकेन पुरुषेणैकस्मिन् जन्मनि चैतेषां वर्णनं कर्त्तुं शक्यते वर्षशतेनापि । प्रोक्तं भगवता मनुना -

वेदमेव सदाऽभ्यस्येत्, तपस्तप्यन् द्विजोत्तमः । वेदाभ्यासो हि विप्रस्य, तपः परमिहोच्यते।।

—०—

*शोधच्छात्रः,*
*साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, मानिवविश्वविद्यालयः*
*तिरुपति, (आ.प्र.)*

# प्रदाय, प्रधाय चेत्यादौ तुँगागमनिवृत्तिपूर्वकम् "ऊकालोऽज्झ्रस्वदीर्घप्लुत:"- सूत्रार्थविश्लेषणम् (लघुशब्देन्दुशेखरस्य परिप्रेक्ष्ये)

**प्रो.विनोदकुमार झा**

**सूत्रार्थ:** - ह्रस्वदीर्घप्लुतसंज्ञाविधायके "ऊकालोऽज्झ्रास्वदीर्घप्लुत:" इति त्रिपदात्मके प्रकृतसूत्रे ऊकाल: - १/१, उच् - १/१, ह्रस्वदीर्घप्लुत: -१/१ इति त्रीणि पदानि सन्ति। उश्च ऊ३श्च ऊश्च इति व: (इतरेतरयोगद्वन्द्व: समास:)। वां काल इति ऊकाल: (षष्ठीतत्पुरुष: समास:)। "कालशब्दो मात्रापर्याय: कालसदृशे लाक्षणिक:" अर्थात् कालशब्दस्य अत्र "मात्रा" अर्थ: तथा कालशब्द: कालसदृशेऽर्थे लाक्षणिको विद्यते। ऊकाल: कालो यस्य स ऊकाल: (बहुव्रीहि: समास:)। अथवा उश्च ऊश्च ऊ३श्च इति व: (इतरेतरयोगद्वन्द्व: समास:)। व: ("ऊ" स्वस्वोच्चारणकाल इव अर्थे लाक्षणिक: अर्थात् त्रिविध उकार: स्वस्वोच्चारणकालसदृशम् अर्थं लक्षणाशक्त्या कथयति) काल: (उच्चारणकाल:) यस्य स ऊकाल: (बहुव्रीहि: समास:)। ह्रस्वश्च दीर्घश्च प्लुतश्च तेषां समाहार इति ह्रस्व-दीर्घ-प्लुत: (समाहारद्वन्द्व: समास:)। यद्यपि ह्रस्वश्च दीर्घश्च प्लुतश्च इति ह्रस्व-दीर्घ-प्लुत: (इतरेतरयोगद्वन्द्व समास:), एवम्प्रकारेण इतरेतरयोगद्वन्द्वसमासेऽपि सौत्रमेकवचनं वक्तुं शक्यम्, तथापि "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" इति नियमेन तत्र तत्र वार्तिकोक्तेर्लिङ्गस्य लौकिकत्वात्तद्व्यत्ययकल्पनमेवोचितं, न तु शास्त्रीयवचनव्यत्ययकल्पनम्। अत एव उच्यते - उश्च ऊश्च ऊ३श्च = व: । वां काल इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञ: स्यात्।

न च सादृश्यं भेदमूलकं भवति, अर्थात् भिन्ने पदार्थद्वये समानता दृश्यते च, तस्माद् एकमात्रिकस्य उकारस्य, द्विमात्रिकस्य ऊकारस्य त्रिमात्रिकस्य ऊ३कारस्य च

उच्चारणकाल इव उ, ऊ, ऊ३ इति त्रिविधस्य उकारस्य उच्चारणकालत्वाभावात् स कथं क्रमशः ह्रस्व-दीर्घ-प्लुतं-संज्ञको भवितुं शक्नोतीति वाच्यम्, कुक्कुटरुते उकारे एकद्वित्रिमात्रत्वप्रसिद्धेः, तस्यैवात्र ग्रहणाच्च। अत एव अकारादादयो नोक्ताः।

न च उकालो ह्रस्वः, ऊकालो दीर्घः, ऊ३कालो प्लुतः इत्यत्र उकालो ह्रस्वः इति प्रथमवाक्ये आगतस्य "उ" इत्यस्य अविधीयमानाऽणत्वेन "अणुदित्सवर्णस्य चाऽप्रत्ययः" इत्यनेन सवर्णबोधकत्वात् ह्रस्व इव दीर्घप्लुतानामपि अचां ह्रस्वसंज्ञकत्वात् प्रदाय, प्रधाय इत्यादौ पिति कृति यकारे परे ह्रस्वसंज्ञकस्य आकारस्य "ह्रस्वस्य पिति कृति तुँक्" इत्यनेन तुँगागमस्य प्राप्तिरिति वाच्यम्, उच्चारितसम्बन्धिकालसदृशकालस्यैव सञ्ज्ञा, न तु तेन गृहीतसम्बन्धिकालसदृशकालस्यापि इत्यर्थेन अदोषात् अर्थात् उकालः इत्यत्र कालेन सह उच्चारितस्य अकारस्य यः कालः अर्थात् एकमात्रिकः कालो विद्यते तत्कालसदृशस्यैव एकमात्रिककालयुक्तस्य अकारस्य ह्रस्वसंज्ञा भवति, न तु तेन = उकारेण "अणुदित्सवर्णस्य चाऽप्रत्ययः" सूत्रद्वारा गृहीतसम्बन्धिएकमात्रिकद्विमात्रिक-त्रिमात्रिककालसदृशस्य त्रिविधकालसहितस्य अष्टादशविधस्यापि उकारस्य, इत्यर्थेन अदोषात्। तथाहि - "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" इत्यस्य स्थाने यदि "ऊअज्झ्रस्वदीर्घप्लुतः" इति सूत्रं क्रियते तर्हि "ऊअज्झ्रस्वदीर्घप्लुतः" इत्यवस्थायां "ऊ" इत्यस्य स्वयमेव अच्त्वाद् अच् ग्रहणस्य का आवश्यकता ? एवम्प्रकारेण अचः ग्रहणम् अनावश्यकस्य स्थितौ तिष्ठति, अतः अच्ग्रहणसामर्थ्याद् ऊकारासदृशस्य अचः ग्रहणं भवति तथा च सादृश्यं कालकृतमेव गृह्यते व्याख्यानानुरोधेन। एवम्प्रकारेण "ऊअज्झ्रस्वदीर्घप्लुतः" इति सूत्रद्वारैव उश्च ऊश्च ऊ३श्च = वः। वां काल इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यादित्यर्थस्य लाभात् "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" सूत्रे कालग्रहणं व्यर्थीभूय ज्ञापयति - उच्चारितसम्बन्धिकाल-सदृशकालस्यैव सञ्ज्ञा, न तु तेन गृहीतसम्बन्धिकालसदृशकालस्यापि। तेन उकालः इत्यत्र एकमात्राकालिकस्य उसदृश्यस्य एकमात्राकालिकस्य अचः ह्रस्वसंज्ञा, ऊकाल इत्यत्र द्विमात्राकालिकस्य ऊसदृशस्य अचः दीर्घसंज्ञा, ऊ३कालः इत्यत्र त्रिमात्राकालिकस्य उसदृशस्य अचः प्लुतसंज्ञा जायते। एवम्प्रकारेण उकालो ह्रस्वः इति प्रथमवाक्ये एकमात्राकालिकस्य उसदृशस्य एकमात्राकालिकस्य अच अकारस्य एव ह्रस्वसंज्ञाकारणात् प्रदाय, प्रधाय इत्यादौ पिति कृति यकारे परे दीर्घस्य आकारस्य "ह्रस्वस्य पिति कृति तुँक्" इत्यनेन

तुँगागमस्य प्राप्तिर्न भवति। तदुक्तं भाष्ये - यावत्तपरकरणं तावदत्र कालग्रहण् अर्थात् तपरकरणद्वरा यावत्कार्यं सिद्धं भवति तावदेव कार्यं कालग्रहणद्वारा अपि सिद्धं भवति। अत एव तपरकरणद्वारा यथा "अदेङ् गुण:" इत्यनेन ह्रस्वस्य अकारस्य गुण-संज्ञा भवति, तपरकारणद्वारा यथा "अतो भिस् ऐस्" इत्यनेन ह्रस्वाकारात् परस्यैव भिस: स्थाने ऐस् आदेशो भवति तथैव अर्थात् उकाल: इत्यत्र कालेन सह उच्चारितस्य उकारस्य य: काल: अर्थात् एकमात्रिक: कालो विद्यते तत्कालसदृशसस्यैव एकमात्रिककालयुक्तस्य उकारस्य ह्रस्वसंज्ञा भवति।

(**विशेष**: - प्रगृह्यसंज्ञाविधायके "निपात एकाजनाङ्" इति सूत्रे एकवचनान्तस्य "अच्" पदस्य ग्रहणेनैव एकस्य अच: ग्रहणात् एकग्रहणं व्यर्थीभूय ज्ञापयति - "वर्णग्रहणे जातिग्रहणम्"। अत एव "दम्भ्+स" इत्यत्र "दम्भ+इच्च" इति सूत्रेण इत्वानन्तरं "दिम्भ्+स" इत्यवस्थायां "हलन्ताच्च" इत्यनेन मकारभकारयोरेकेन हल्त्वेन ग्रहणाद् इक: इकारात् पर: हल् विद्यते हल्त्वजात्यवच्छिन्नरेक: हल् "म्भ्"ए तस्मात्पर: सन: सकार: किद्भवति तथा च अन्यद् अभीष्टं कार्यं सम्भूय दिप्सति इति रूपं सम्पन्नतां प्राप्नोति।)

न च य: शब्दो वर्णबोधको भवति तेन शब्देन जातेर्ग्रहणं भवति अर्थात् "वर्णग्रहणे जातिग्रहणम्"। एवम्प्रकारेण "ऊकालोऽज्झ्रस्वदीर्घप्लुत:" इति सूत्रे वर्णबोधकेन अच् - शब्देन जातिग्रहणद्वारा अच्त्वजात्यवच्छिन्नानाम् अनेकेषाम् अचाम् एकाच्त्वेन ग्रहणं भवति तथा च तितउच्छत्रम् इत्यत्र तकारोत्तवर्तिन: अकारस्य उकारस्य च उच्त्वजात्यवच्छिन्नेन एकेन अच्त्वेन ग्रहणात् अकारोकारयोरेकैकमात्रत्वेन मात्राद्वयस्य दीर्घत्वात् "पदान्ताद्वा" इति सूत्रेण विकल्पेन तुँगापत्तिरिति वाच्यम्, ज्ञापकसिद्धस्य "वर्णग्रहणे जातिग्रहणम्" इत्यस्य असार्वत्रिकत्वात्। अर्थात् ज्ञापकसिद्धं सार्वत्रिकं न भवति अर्थात् सर्वत्र न प्रवर्तते।

"वर्णग्रहणे जातिग्रहणम्" इत्यस्य सार्वत्रिकत्वस्वीकारे द्वितीयम् उत्तरं प्रस्तूयते यत् "पदान्ताद्वा" इत्यनेन प्रवृत्तं बहिरङ्गं वैकल्पिकं तुँकं बाधित्वा "छे च" इत्यनेन अन्तरङ्गो नित्य: तुँगागमो भविष्यति, अन्तर्भूतनिमित्त्वेन वैकल्पिकतुँगागमापेक्षया नित्यतुँगागमस्य अन्तरङ्गत्वात्।

"ऊकालोऽज्झ्रस्वदीर्घप्लुत:" इति सूत्रे अज्ग्रहणात् क्यप्प्रत्ययान्ते प्रतक्ष्य इत्यादौ

अर्द्धार्द्धमात्राकालिकयो: ककारषकारयो: संयोगस्य क्षकारस्य एकमात्रत्वेन, एकमात्रिकस्य क्षकारस्य ह्रस्वसंज्ञकत्वेऽपि तस्य अच्त्वाभावात् पिति कृति यकारे परे ह्रस्वसंज्ञकस्य क्षकारस्य "ह्रस्वस्य पिति कृति तुँक्" इत्यनेन तुँगागमो न भवति।

---

**सन्दर्भा: -**

१. "ऊकालोऽज्झ्रस्वदीर्घप्लुत:" सूत्रे "ओ" इत्यनन्तरम् अवग्रहस्य चिह्नं प्रदर्शयति यद् "ओ" इत्यत्र एकमात्रिकोऽकारो मिलितो विद्यते।

२. "ऊ" इति एकद्वित्रिमात्राणां क्रमेण प्रश्लेषनिर्देशो व्याख्यानात्। (आचार्य-विश्वनाथमिश्रेण लिखिते सुबोधिनीहिन्दीव्याख्योपेते लघुशब्देन्दुशेखरे, पृष्ठ-संख्या-७८)

३. "सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यो वा चोत्तरपदलोप:" वार्तिकेन समास: उत्तरपदलोपश्च।

४. उकार: कस्यापि कालो न भवति, तेन त्रिविधस्य "ऊ" वर्णस्य कालेन सह सामानाधिकरण्यभावाद् मुख्यार्थबाधे "व: कालो यस्यासौ ऊकाल:" इति बहुब्रीहि-समासे "ऊ" वर्णस्य स्वस्वोच्चारणकालसदृशेऽर्थे लक्षणा क्रियते।

५. तेन स्वोच्चारणकालसदृशो लिख्यते। (आचार्यविश्वनाथमिश्रेण लिख्यते सुबोधिनीहिन्दीव्याख्योपेते लघुशब्देन्दुशेखरे, पृष्ठ-संख्या-७८)

६. "जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्" इति सूत्रेण जातौ एकवचनं बोध्यम्।

७. स कालो यस्येति बहुव्रीहि: (फलितार्थकनम् - "व: कालो यस्यासौ ऊकाल: इत्यस्य)। (आचार्यविश्वनाथमिश्रेण लिखिते सुबोधिनीहिन्दीव्याख्योपेते लघुशब्देन्दुशेखरे, पृष्ठ-संख्या-७८, ७९)"

८. सौत्रत्वात् पुँल्लिङ्गम्।

९. प्रकृतसूत्रोपरि शब्दरत्ने (प्रौढमनोरमायाम्)

१०. एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चाऽर्धमात्रिकम्।

११. पाणिनि-अष्टाध्यायी-सूत्रपाठ: -१.१.६९

१२. पाणिनि-अष्टाध्यायी-सूत्रपाठः -६.१.७१
१३. पाणिनि-अष्टाध्यायी-सूत्रपाठः -१.१.२
१४. पाणिनि-अष्टाध्यायी-सूत्रपाठः -७.१.९
१५. पाणिनि-अष्टाध्यायी-सूत्रपाठः -१.१.१४
१६. पाणिनि-अष्टाध्यायी-सूत्रपाठः -७.४.५६
१७. पाणिनि-अष्टाध्यायी-सूत्रपाठः -१.२.१०
१८. पाणिनि-अष्टाध्यायी-सूत्रपाठः -६.१.७६
१९. पाणिनि-अष्टाध्यायी-सूत्रपाठः -६.१.७३

—०—

*अध्यक्षः, व्याकरणविभागः*
*श्रीसोमनाथसंस्कृतयुनिवर्सिटी*
*वेरावलम्, गुजरातराज्यम्*

# वैदिकवाङ्मये वेदान्तदर्शनम्

किञ्जल गोरफाड

दृश्यते ज्ञायते परमं तत्त्वमिति दर्शनम्। भारतीयविद्यासु दर्शनविद्याऽन्यतमा। दर्शनम् आस्तिकदर्शनं नास्तिकदर्शनं चेति भेदेन द्विविधं परिगण्यते। आस्तिकदर्शनेषु वेदान्तदर्शनं परां प्रसिद्धिं लभते। वेदान्तदर्शनं नाम वेदानाम् अन्तः अर्थात् शिर्षभागः इति कथ्यते। जीवः जगत् ब्रह्म चेति तत्त्वत्रयमाधारीकृत्य एतद्दर्शनं प्रवर्त्तते। "भोक्ता भोग्यं प्रेरितारं च मत्त्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्" इति श्वेताश्वतरश्रुतेः एतत् प्रमाणं प्राप्यते। अत्र भोक्ता जीवः कथ्यते। भोग्यं जगत् कथ्यते। प्रेरयिता परं ब्रह्म इति कथ्यते। एतस्य अपरं नाम परमात्मा पुरुषोत्तमः ईश्वरश्चेत्यादि भवति। "द्वा सुपर्णा सयुजा सखाया समानं वृक्षम्" इति ऋग्वेदमन्त्रांशः प्रोक्तस्य एतस्य वेदान्ततत्त्वस्य मूलस्रोतः भवति। जीवः परमात्मनः एव स्फुलिङ्गरूपेण प्रादुर्भवति। अद्वैतवेदान्तमते जीवब्रह्मणोः ऐक्यं प्रतिपाद्यते। द्वैताद्वैतमते तु यद्यपि जीवः परब्रह्मणः अंशविशेषः भवति तथापि उपाधिभेदात् भिन्नः भवति। सांख्यमते तु अयमीश्वरः न प्रकृतिभूतः न वा विकृतिभूतः भवति। यद्वा भवतु आस्तिकदर्शनं तु सर्वशक्तेः परमात्मनः ईश्वरस्य सर्वव्यापकतां सर्वत्र विद्यमानतामुपदिशति "ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्" इत्यादि श्रुतेः। परमेश्वरेस्य अंशभूतत्वात् जीवः "ममैवांशो जीवलोके जीवभूतः सनातनः" इति भगवद्गीतोक्तेः नित्यः विराजते। जीवः काममयः भवति, "काममयोऽयं पुरुषः" इति श्रुतेः। परमपुरुषस्तु "अकामः आप्तकामः" इति श्रूयते।

"नित्यो नित्यानां चेतनश्चेतनानाम्
एको बहूनां यो विदधाति कामान्।"

इति श्रुतेः परमपुरुषः जीवस्य कृते नानाविधान् भोगान् विदधाति इति ज्ञायते। किन्तु जीवः प्रायः अज्ञानवशीभूतत्वात् काममोहितत्वात् एतं सर्वेश्वरं न तावत् परिचिनोति। स्वयम् अल्पशक्तिः अस्वतन्त्रः अपि एषः स्वात्मानं सर्वशक्तिं मत्वा केवलं दुःखं शोकं वा अनुभवति। "समाने वृक्षे पुरुषो निमग्नोअनीशया शोचति मुह्यमानः" इति अथर्ववेदीयमुण्डकश्रुतेः। जीवः विकारग्रस्तः भवति इति हेतोः मोहमनुभवति शोकं च

अनुभवति। स्वसत्ताविख्यापनार्थं स: परमसत्तांशभूतमपरं जीवमपि स्वेच्छानुसारं व्यवहरति। स्वात्मन: तम् अपरम् इति मत्वा विभिन्नात् एतस्मात् कारणात् स: कामी दु:खदुर्दशाग्रस्त: भवति। किन्तु सर्वे जीवा: अपि परमेश्वरस्य अंशभूता: नित्या: नित्यवच्च सम्माननीया: भवन्ति इति जीवेन ज्ञातव्यम्। यदि सर्वत्र ब्रह्मदर्शनं सर्वेश्वरसाक्षात्कार: सर्वत्र परमपुरुषानुभव: तेन क्रियेत तर्हि तस्य कृते समस्या नायाति। तस्य शोक: दु:खं वा न जायेत।

यस्मिन् सर्वाणि भूतानि आत्मैवाभूद् विजानत:।
तत्र को मोह: क: शोक एकत्वमनुपश्यत:।।

इति शुक्लयजुर्वेदश्रुति: नित्यम् उपदिशति।

जुष्टं यदा पश्यत्यन्यमीशं
तदा महिमानमिति वीतशोक:।।

इत्यपि मुण्डकश्रुति: उपदिशति। "तमात्मस्थं येऽनुपश्यन्ति धीरा: तेषां शान्ति: शाश्वती नेतरेषाम्" इत्यपि श्रुति: उपदिशति। "तरति शोकमात्मवित् इत्यपि छान्दोग्यश्रुति:" उपदिशति।

आत्मसाक्षात्कार: एव जीवेन कर्त्तव्य:। "अथाऽतो ब्रह्मजिज्ञासा" "जीवस्य तत्त्वजिज्ञासा" इति यथाक्रमं न्यायात् स्मृतेश्च। आत्मसाक्षात्कारात् शोकनाशनं भवति इति वैदिकऋषिदर्शितवेदान्तदर्शनस्य डिण्डिमघोष:। एतावद्धि वेदान्तदर्शनस्य शोकनाशनत्वं सर्वप्रसिद्धं भवति इति।

—०—

*शोधच्छात्र:, वेदविभाग:*
*श्रीसोमनाथसंस्कृतयुनिवर्सिटी*
*वेरावलम्, गुजरातराज्यम्*

# न्यायाभिमतप्रमेयतत्त्वानुशीलनम्

डॉ. महेशझा

परमकारुणिको मुनिगौतमः अष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं दु:खपङ्कनिमग्नानां जनानामुद्धारकामनया प्रणिनाय । तत्रादौ षोडशपदार्थानां नामोल्लेखप्रदर्शनपुरस्सरप्रथमं सूत्रम् - 'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क - निर्णय - वाद - जल्प - वितण्डा - हेत्वाभास - च्छल - जाति - निग्रहस्थानानां - तत्त्वज्ञानान्नि:श्रेयसाधिगमः' इति विरचितम्[१] । तत्राप्यादौ 'मानाधीना मेयसिद्धिः' इति सिद्धान्तमवलम्ब्य प्रथमं प्रमाणतत्त्वं परिशीलितम् । यतो हि प्रमाणपरिज्ञानानन्तरमेव प्रमाणाधीना जायमानायाः प्रमेयस्य सिद्धिसम्भवः । तच्च प्रमाणतत्त्वं प्रमाकरणत्वरूपम् । यद्यपि प्रमाणपदं प्रमीयते इति भावव्युत्पत्त्या प्रमास्वरूपबोधकं भवति । परन्तु प्रकृते प्रमीयतेऽनेनेति व्युत्पत्या प्रमाकरणत्वरूपं प्रमाणतत्त्वमेव प्रमाणपदबोध्यमस्ति । तच्च प्रमाणं 'प्रत्यक्षानुमानोपमानशब्द' भेदेन अत्र शास्त्रे[२] चतुर्विधमभ्युपगतम् । तत्रापि इन्द्रियकरणकं ज्ञानं प्रत्यक्षम् । तच्च निर्विकल्पक - सविकल्पकभेदेन द्विविधम् । यद्यपि इन्द्रियकरणकज्ञानत्वं नित्यभूते परमेश्वरप्रत्यक्षे अव्याप्तम्, तथापि ज्ञानाकरणकत्वविशिष्टज्ञानत्वं प्रत्यक्षलक्षणत्वेन विवक्षितम् । तच्च लक्षणं जीवेश्वरप्रत्यक्षसाधारणं भवति । एवं व्याप्तिज्ञानकरणकत्वविशिष्ट-ज्ञानत्वमनुमितित्वम्, सादृश्यज्ञानक- रणकत्वमुपमितित्वम्, पदज्ञान-करणकत्वं शाब्दबुद्धित्वञ्च निरूपितम् ।

प्रमाणतत्त्वनिरूपणानन्तरं महर्षिणा तत्साध्यस्य प्रमेयस्यापि निरूपणं कृतम् । तच्च प्रमेयत्वं प्रमाविषयत्वरूपं, सा च प्रमा तद्वद्विशेष्यकत्वविशिष्टतत्प्रकारकत्वरूपा । अस्यायमाशयः - यद्वस्तु येन सम्बन्धेन यादृशधर्मवद्भवति तेनैव सम्बन्धेन तद्धर्मवत्त्वमेव प्रमात्वम् । यथा - समवायसम्बन्धेन रजतत्त्ववति समवायसम्बन्धेन रजतत्वप्रकारिका या रजते इदं रजतमित्याकारिका प्रतीतिः सैव प्रमा, तद्विषयीभूतस्य रजतादेः प्रमेयत्वं भवति ।

प्रमाणेन प्रमात्मकज्ञानविषयतया सिद्धानां पदार्थानां प्रमेयसंज्ञकानां कियन्तो भेदाः एतद्विषये महर्षिणा उक्तं यद् - 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभाव-फलदु:खापवर्गास्तु प्रमेयम्'[३] इति । एतद्प्रमेयमध्ये प्रथममात्मस्वरूपं प्रमेयं प्रदर्शितम् ।

तादृशप्रमेयान्तर्गतो हि आत्मा सर्वस्य द्रष्टा भोक्ता अनुभविता च भवति । आत्मन: लक्षणं चकार केशवमिश्र: 'आत्मत्वसामान्यवानात्मा' इति । तर्कभाषायां बुद्ध्याश्रयत्वरूपेण परिशेषानुमानेन आत्मन: सिद्धि: कृता । तथाहि - 'तस्मादेभ्योऽष्टभ्यो व्यतिरिक्तो बुद्ध्यादीनां गुणानामाश्रयो वक्तव्य: स आत्मा । स चात्मा विभु: व्यापक: प्रतिशरीरं भिन्नो देहातिरिक्तो नित्य: मानसप्रत्यक्षविषयश्च । अन्नम्भट्ट: 'ज्ञानाधिकरणमात्मा' इत्यात्मानं परिभाषितवान् । तथा च समवायेन य: ज्ञानाधार: स एव आत्मा इति । महर्षिगौतमस्तु 'दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्[४]' इति सूत्रे दर्शनस्पर्शनादिक्रियाणामेकेन कर्त्राभाव्यमित्यात्मपदार्थसिद्धौ युक्तिं प्रदर्शयामास । योऽसौ मया दृष्ट: स स्पर्शेनाप्यनुभूयते । यश्च स्पर्शेनानुभूत: स एव चक्षुषापि गृह्यते । इत्येवं ज्ञानेन्द्रियैस्तत्तत्क्रियाणां सम्पादयित्रा एकेन भवितव्यम्, स एव आत्मा । अनेकैरिन्द्रियैरनुभविता अनुसन्धाता एक एवेत्यर्थ: । स समेषामिन्द्रियाणां कार्यकलापाननुभवति । किञ्च सर्वोऽपि अहमस्मि इत्येवं रूपेण आत्मानमनुभवति । तस्य आत्मन: भोगसाधनानि चक्षुरादीन्द्रियाणि भवन्ति । तथा भोगस्याधिष्ठानमाधारभूतं शरीरं भवति । तदुक्तम् आत्मनो भोगायतनमिदं शरीरम्[५] । चेष्टेन्द्रियार्थाश्रय: शरीरम्[६] । चेष्टाश्रयो वा शरीरम्[७] । तथा च हिताहितावाप्तिपरिहाराभ्यां चेष्टानां यदाश्रय: तदेव शरीरम् । यदि हस्तादौ शरीराङ्गभूतेन शरीरत्वव्यवहार: तदा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्वं शरीरस्य लक्षणं कर्तव्यम् । शरीरावच्छेदेनैवात्मनि सुख - दु:खादिकमुत्पद्यते, न तु शरीरानवच्छिन्नात्मनि । अत: सुखदु:खान्यतरसाक्षात्का- ररूपभोगायतनत्वस्य शरीरेऽभ्युपगम: क्रियते ।

इन्द्रियाणि तावत् वहिरन्तरभेदेन द्विविधानि । तत्र घ्राण-रसन-चक्षु-श्रोत्र - त्वक् चैतानि पञ्च वहिरिन्द्रियाणि, अन्तरिन्द्रियं केवलं मन एव भवति । भोगविषया: अर्था:, अर्थात् विषया: भवन्ति रूपरसादय:, समस्तविषयोपलब्धौ नहि इन्द्रियाणि करणानि भवन्ति । अपितु चक्षुषा रूप-रूपवदादिविषयकं ज्ञानमेव जायते । एवं घ्राणेन गन्ध:, गन्धत्वादिजातय: गृह्यन्ते, न तु गन्धाश्रयस्य ज्ञानं घ्राणेन्द्रियेण भवति । एवं रसत्वादिसहितरसस्य ज्ञानं रसनया जायते । एवं शब्दत्वादिसहितशब्दस्य ग्रहणं श्रोत्रेन्द्रियेण जायते । इत्थमेव चक्षुषा ग्राह्यं रूपरूपत्वभिन्नं यत्किञ्चिदपि वस्तु विद्यते, तेषां सर्वेषां वस्तूनां तथा स्पर्शत्वसहित-स्पर्शाणां च प्रत्यक्षं त्वगिन्द्रियेण जायते । अत: चक्षुरिन्द्रियं त्वगिन्द्रियं च द्रव्यग्रहणेऽपि समर्था: एवं तद्वृत्तिरूपस्पर्शादिग्रहणेऽपि समर्था: भवन्ति । अत: त्वक्चक्षुषो: द्रव्यग्राहकत्वं गुणग्राहकत्वञ्च भवति । परन्तु घ्राण-रसन-श्रोत्राणां वहिरिन्द्रियद्रव्यग्रहणे नहि सामर्थ्यम् । अपितु तद्वृत्तिगुण-गुणत्वादीनामेव ग्रहणे सामर्थ्यम् ।

एवं मनसः आत्मविशेषगुणानां प्रत्यक्षजनने सामर्थ्यम् । एवं तत् समवेतानां ज्ञानत्वादिधर्माणां प्रत्यक्षजननेऽपि सामर्थ्यम् । मनस्तावदान्तरिन्द्रियम् । तच्चात्मनः आत्मवृत्तिगुणानां च प्रत्यक्षजनने सामर्थ्यं भवति । इत्थं इन्द्रियाणां प्रमेयत्वमुपदर्शितम् ।

अर्थाः रूप-रस-गन्ध-स्पर्श-शब्दाः, सुखादयश्च । ये तत्तदिन्द्रियैर्ग्राह्याः भवन्ति । एवं तत्तदिन्द्रियैः ग्राह्या ये रूपरसादिपदार्थाः सन्ति आत्मादयः घटादयश्च, तेषां प्रमेयाणां भवत्यर्थपदवाच्यता । इन्द्रियविषयत्वेन गृहीतानां पदार्थानां यज्ज्ञानं भवति तदेव बुद्धिपदवाच्यं, तदपि प्रमेयम्, सुखादिज्ञानरूपा । सा च समस्तव्यवहारसाधिका ज्ञानशब्देनोपलब्धिशब्देन च व्यपदिश्यमाना भवति । सर्वविषयकज्ञाने वहिरिन्द्रियाणां नहि सामर्थ्यम् । अतः सर्वविषयकमन्तःकरणं मन अभ्युपेयते । धर्माधर्मादिरूपयागादिक्रिया प्रवृत्तिरित्युच्यते । दोषो राग-द्वेषादिः । प्रेत्यभावस्तावदात्मनः इदं शरीरं पूर्वशरीररहितं न भवति परन्तु एतद्शरीरात् प्रागपि आत्मनः शरीरमासीदित्येवं प्रकारेणेयं शरीरपरम्पराऽनादिः । इदञ्च शरीरं प्रायः उत्तरशरीररहितमपि न भवति । किन्तु एतच्छरीरानन्तरं पुनः शरीरं भविष्यति यावत्कालपर्यन्तं मोक्षो न जायते । अत अस्याः शरीरपरम्पराया अनादित्वादर्थादुत्तरेषां शरीराणामपवर्गान्तं जायमानतया अनादित्वमेव । अतएव भगवता कृष्णेन एवमुक्तम् - 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इति[८] । इत्थं येयं जन्म-मरणपरम्परा सैव प्रेत्यभावपदेन उच्यते । अत्रेदमवधेयम् - न्यायनये जगत्सृष्टिसंहारपालनकर्ता नित्यज्ञानवान् सर्वज्ञः परमात्मा एक एव । यदा सिसृक्षेच्छा जायते तदा संसारस्य सृष्टिः, यदा च संजिहीर्षा जायते तदा संसारस्य लयः । इत्थं परमेश्वरस्य जगत्कारणत्वं तार्किकैः प्रतिपादितम् । स च परमेश्वरः शरीरसम्बन्धीभिः परमाणुस्वरूपैरवयवैरदृष्टसहकारेण तत्तज्जीवान् शरीरविशिष्टान् करोति, एवं तद्भोग्यानामपि पदार्थानां निर्माणं करोति । तत्तन्निर्माणे तत्तज्जीवानां धर्माधर्मात्मकस्य अदृष्टस्यैव सहकारिकारणत्वमभिमतं स्यात् । तच्चादृष्टं धर्माधर्मस्वरूपं पूर्वजन्मकृतकर्मणैव जायते । यस्य साहाय्येन मानवः तत्तच्छरीरसंयुक्तो भवति तददृष्टमेव ।

अत्रेदं विचारणीयं यदि एतज्जन्मनः पूर्वं किञ्चिद्शरीरावच्छिन्नजीवो न स्यात्तदा पूर्वजन्मनि कृतकर्मणामस्मिन् जन्मनि तत्फलं नाप्नुयात् । लभते चास्मिन् जन्मनि पूर्वजन्मकृतकर्मणां फलभोगः । एवञ्च एतज्जन्मनि भुज्यमानं फलं दृष्ट्वा तस्य तस्य जीवस्य पूर्वजन्म इत्यनुभूयते । इत्थं फलेन पूर्वजन्मकृतकर्मणः तत्कर्तुश्चानुमानं जायते । उक्तञ्च भगवता कृष्णेन गीतायाम् -

'वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।

तथा शरीराणि विहाय जीर्णा - न्यन्यानि संयाति नवानि देही'[९] । इति ।

श्लोकेऽस्मिन् भगवता स्वयमेव वर्णितं यत् सर्वेषां मनुष्याणां पूर्वजन्म विद्यते । अत्र च जायमान: मानव: कश्चन दरिद्रगृहे जन्म लभते, कश्चन राजगृहे जन्म लभते, इत्यत्र किं नियामकमित्याकारकजिज्ञासायां पूर्वजन्मकृतकर्मजन्यस्य अदृष्टस्यैव नियामकत्वमकामेनापि सर्वैरभ्युपेयम् । तथा च प्रेत्यभावो नाम मरणोत्तरं जन्म, तच्च भूयो भूय: मरणं जन्म चेत्यर्थ: । तत्र चरम: शरीरप्राणसंयोगध्वंसो मरणम्, आद्य: प्राणशरीरसंयोगो जन्म । तथा चोक्तं महर्षिणा - 'पुनरुत्पत्ति: प्रेत्यभाव:'[१०] इति । सूत्रस्यास्य व्याख्यानं भाष्यकार इत्थं करोति - उत्पन्नस्य क्वचित्सत्त्वनिकाये मृत्वा या पुनरुत्पत्ति: स प्रेत्यभाव: । उत्पन्नस्य सम्बद्धस्य । सम्बन्धस्तु देहेन्द्रियमनो–बुद्धिवेदनाभि: । पुनरुत्पत्ति: - पुनर्देहादिभि: सम्बन्ध: । पुनरित्यभ्यासाभिधानं, यत्र क्वचित्प्राणभृन्निकाये वर्तमान: पूर्वोपात्तान्देहादीन् जहाति तत्प्रैति, यत् तत्रान्यत्र वा देहादीनन्यानुपादत्ते तद्भवति । प्रेत्यभाव: - मृत्वा पुनर्जन्म । सोऽयं जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्त: प्रेत्यभावो वेदितव्य इति[११] । तथा च कस्मिन्नपि शरीरेन्द्रियसंघाते उत्पन्नस्य (सम्बद्धस्य) जीवस्य मरणानन्तरं योत्पत्ति: सा पुनरुत्पत्ति:, स एव प्रेत्यभाव इत्युच्यते ।

एवञ्च प्रेत्यभावशब्देन भवन-प्रायणयो: समानकर्तृकत्वं लब्धं भवति । तत्रेदृश: आक्षेप: प्रसज्यते यत् 'पुनरुत्पत्ति: प्रेत्यभाव:' इत्यत्र सूत्रे प्रेत्यभाव आत्मन एव भवति, इत्यस्य सिद्धत्वादात्मन: नित्यत्वान्न खलु नित्यं किञ्चिज्जायते, म्रियते (भूत्वा म्रियते) वा इति जन्ममरणयो: नित्ये आत्मनि अनुपपत्ति: । यत उत्पत्तिविनाशरूपस्य प्रेत्यभावस्य न्यायसिद्धान्ते अनुत्पत्तिविनाशशाल्यात्मनि कथमप्युपपन्न: भवितुं नार्हति । एतदर्थं महर्षिणा गौतमेन आत्मनित्यत्वे प्रेत्यभावसिद्धि: कृता[१२] । नित्य एव आत्मा प्रैति अर्थात् पूर्वशरीरं जहाति । प्रेत्य च पूर्वशरीरं परित्यज्य शरीरान्तरं गृह्णाति । एतदुभयमेव 'पुनरुत्पत्ति: प्रेत्यभाव' इति सूत्रेण प्रतिपादितम् । पूर्वशरीरं हित्वा नूतनशरीरं स्वीकरोति, इयं व्यवस्था आत्मन: नित्यत्वे एव सम्भवति । आत्मन अनित्यत्वे तु पुनर्जन्मव्यवस्था कथमपि भवितुं नार्हति । एवं यदि पुनर्जन्म न स्यात्तदा आत्मन: नित्यताऽपि न स्यात्, दृश्यते च पूर्वजन्मकृतकर्मणां भोग: जन्मन्यस्मिन् । यत् सर्वैरेवानुभूयते । वदन्ति च जना: यदनेन मानवेन पूर्वजन्मनि उत्तमं कर्म कृतं, तस्य फलमस्मिन् जन्मनि भुङ्क्ते । अन्यश्च कस्यचित् जनस्य दु:खमयं जीवनं दृष्टवा सर्वे जना: एवं व्यवहरन्ति यदनेन मानवेन पूर्वजन्मनि महद्दुष्कर्मकृतं, तस्यैव फलमिदानीं भुङ्क्ते; इत्यादि-व्यवहारदर्शनादवश्यमात्मन: पुनर्जन्म अभ्युपेयम् । अथ च 'पुण्यतीर्थे कृतं पापं कल्पकोटिशतैरपि न नश्यति' अवश्यमेव

भोक्तव्यं कृतं कर्म शुभाशुभम्; इत्यादि आप्तवाक्यादपि पुनर्जन्म व्यवस्थापयितुं शक्यते । किञ्च पूर्वशरीरत्याग उत्तरशरीरग्रहणपरम्परा तदैव सिद्धा भविष्यति, यदि समग्रतत्परम्पराव्यापकः कश्चन स्थिरः पदार्थः स्यात् । स च पदार्थः नित्यस्वरूपः कश्चन ज्ञानेच्छादिमान् 'आत्मा' स्यात् ।

तत्रेयं जन्म-मरणव्यवस्था कथमपि भवितुं नार्हति इत्येतत् वदतां बौद्धानां मते आत्मन मरणे जाते तस्य नितान्तमेव सत्वोच्छेदः जायते । जन्मनि च पुनः सत्वस्योत्पत्तिः । इत्थं यस्य मरणं जातं, तस्यात्यन्तं विनष्टत्वात् यस्य च सत्त्वस्य जन्मजातं तस्य प्रथममेव जातत्वादेकान्ततः भेद एव स्वीकार्यः । अस्यामवस्थायामुत्तरशरीरे ये उपभोगाः जायन्ते, न ते स्वीयपूर्वजन्मकर्मकृताः, कर्मकर्त्तुः भोक्तुश्च भिन्नत्वात् । नह्यन्यकृतकर्मणः फलमन्यस्मिन् पुरुषे सम्भवति । अत उपभोगकर्मणोः सामानाधिकरण्यदर्शनेन नित्ये आत्मन्येव प्रेत्यभावः स्वीकार्यः । अर्थादेकस्मिन्नेवात्मनि शरीरेण सह यः आद्यक्षणसम्बन्धः तदेव जन्म । तादृशसम्बन्धस्य आत्मना सह विच्छेद एव मरणम् । अतो नित्ये आत्मन्येव प्रेत्यभावः जायते इति तु स्वीकार्यमेव ।

यदि च आत्मा उत्पत्ति-विनाशशीलः स्यात् तदा यस्मै आत्मने उपदेशः कृतः तस्योत्तरक्षणे विनाशात् उपदेशाऽऽनर्थक्यप्रसङ्गः स्यात् । भवति च शास्त्रादीनामध्ययनाध्यापने उपदेशः ।

यदि च आत्मा क्षणिकः विनाशी स्यात्तर्हि अध्ययनशीलः आत्मा भिन्नः, परवर्ती च आत्मा भिन्नः, पूर्वं यस्यात्मनः कृते गुरूपदेशः सञ्जातः, तस्यात्मनः अभावादुत्तरक्षणवर्त्ति अपरस्मिन्नात्मन्युपदेशकृत्फलस्याभावः स्यादत आत्मनः न क्षणिकत्वं, न वा ज्ञानस्वरूपत्वम्, अपितु ज्ञानाश्रयीभूत आत्मा जडपदार्थातिरिक्तः कश्चन भिन्नः पदार्थ अवश्यमभ्युपेयः । तत्रैव च जन्ममरणादिव्यवस्थापि साधु संगच्छते । फलात्मकप्रमेयन्तु - साधनसहितयोः सुखदुःखयोरुपभोगस्वरूप एव । सुखस्य-दुःखस्योपभोगस्तावत् तत्तद्साधनेनैव जायते । अतः तदपि प्रमेयमेव । प्रतिकूलवेदनीयत्वमत्र दुःखत्वम् । यद्यपि संसारे दुःखवत् सुखमपि प्रमेयं भवति तथापि सुखस्यापि दुःखानुल्लिख्यतया दुःखमेव । अतः दुःखपदेन सुखस्याप्यवबोधः जायते । केनचित् कारणेन जायमानस्य सुखस्यानुभूतिर्भवति । परन्तु तत्साधनीभूतपुण्यादीनां विनाशे सति तदपि सुखं निवर्तते । अतः सर्वमपि सांसारिकं सुखं दुःखमिश्रितं सदुत्पद्यमानं दुःखानतिरिक्तमेव । अतः सांसारिकसुखस्य दुःखानतिरिक्त- प्रमेयत्वेन प्रतिपादनं न कृतम्, अपितु दुःखपदेनैवानुभूयमानस्य सांसारिकसुखस्य ज्ञानं जायते ।

अपवर्गस्तावत् जन्म-मरणपरम्पराया एकविंशतिदुःखस्योच्छेदस्वरूपा । तच्च

एकविंशति:षडिन्द्रियाणि, षड्विषया:, षड्विधं तत्तद्विषयकं ज्ञानं, सुखदु:खे, शरीरञ्च इत्येकविंशति: । तेषां यो आत्यन्तिकध्वंस: स एव अपवर्गपदवाच्य: । यद्यपि संसारावस्थायामपि दु:खध्वंसो जायते परन्तु सांसारिकजीवे असौ मुक्त इति व्यवहार: न भवतीति कथं दु:खध्वंस अपवर्ग इत्येवं वक्तुं शक्यते । तदाप्याह - अपवर्गस्तावत् - 'स्वसमानाधिकरणदु:खप्रागभावासमानकालीनदु:खध्वंसरूप: । तथा च संसारावस्थायां केषाञ्चिद् दु:खानां ध्वंसे जातेऽपि पूर्वकृतदु:खहेतुकर्मणा किञ्चिद्दु:खनाशानन्तरमपि दु:खान्तरस्योत्पत्तिसम्भवात् नहि आत्यन्तिकदु:खध्वंस: संसारावस्थायां विद्यते इत्येवं न वक्तुं शक्यते । यदा बद्धजीवस्य केषाञ्चिद्दु:खानां ध्वंसो जात:, तद्दशायामप्यग्रे जायमानस्य दु:खस्य प्रागभावोऽप्यस्ति । अत: यस्मिन्नात्मनि केषाञ्चिद्दु:खानां ध्वंस: विद्यते तद्दशायामेवाग्रे उत्पत्स्यमानानां दु:खानां प्रागभावस्यापि तदानीं विद्यमानतया नहि तत्र स्वसमानाधिकरणदु:खप्रागभावासमानकालीनदु:खध्वंस:, अपितु तदानीन्तनो हि दु:खध्वंस: तस्मिन्नेवात्मनि उत्पत्स्यमानदु:खप्रागभावसमानाधिकरण एव । नहि तदानीं दु:खप्रागभावासमानाधिकरणात्यन्तिकदु:खध्वंसो विद्यते । अत: संसारावस्थायां नह्यात्यन्तिकदु:खनिवृत्तिस्सम्भवति । अतो न बद्धजीवस्यात्यन्तिकदु:खध्वंसवत्ता । एवञ्च न सांसारिकबद्धस्य मुक्तत्वसम्भव: । अत एवोक्तम् 'आत्यन्तिकदु:खध्वंसो हि मुक्ति:' । सैव अपवर्गपदवाच्य: । तत्रात्यन्तिकत्वम् - 'दु:खप्रागभावासमानाधिकरणदु:खध्वंसरूप: ।

इदमत्रावधेयम् – पदार्थानां याथार्थत्वेन परिज्ञाने जाते सांसारिकबन्धनकारणीभूतस्याप्रमेयविष- यकभ्रमात्मकमिथ्याज्ञानस्य निवृत्तिर्भवति । तथा च न्यायशास्त्रपरिज्ञानेन पाञ्चभौतिकेऽस्मिन् शरीरे यत् आत्मतत्वज्ञानम्, अर्थात् शरीर एव आत्मा इति ज्ञानं, तस्य निवृत्तिर्भवति । एवञ्च शरीरविषयका: ये रागद्वेषादय: हानोपादानात्मकबुद्धिकारणीभूता:ते निवर्तन्ते । प्रवृत्तेरभावे संजाते तन्मूलकजन्माद्यभाव:, तदभावे च भवति एकविंशतिदु:खध्वंस:, दु:खकारणं जन्मादिरेव, कारणीभूतस्य जन्मादेरभावे सति कार्यभूतस्य दु:खस्य सुतरामेव अभाव: जायते । इयमेवाशयं प्रतिपादयितुमाह-महर्षिसूत्रकार: – ''दु:खजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग:'' इति[१३] न्यायदर्शनस्य द्वितीयेऽस्मिन् सूत्रे महर्षिणा तत्त्वज्ञानस्य मिथ्याज्ञाननिवृत्तिद्वारा नि:श्रेयसप्रयोजकता प्रतिपादिता ।

यद्यप्येतेषां दु:खानां ध्वंस: लौकिकोपायादपि सम्भव:, लौकिकोपायश्च शास्त्रीयोपायापेक्षया सहजा, तत्र किमर्थं न्यायशास्त्राध्ययनं कुर्यात् ? अत्रेदमुच्यते– लौकिकोपायाज्जायमान: दु:खध्वंस आत्यन्तिको न भवति, ऐकान्तिकश्च न भवति ।

अतो नहि लौकिकोपायादात्यन्तिकी दु:खनिवृत्ति: । अथ च लौकिकोपायैर्बहुप्रयासे कृतेऽपि केषाञ्चित् जनानां दु:खनिवृत्तिर्भवति, केषाञ्चिज्जनानाञ्च दु:खनिवृत्तिर्नैव जायते । अत एकान्तत: निर्णयो नास्ति यत् सर्वेषां जनानामात्यन्तिकी दु:खनिवृत्ति: स्यात् । अथ च लौकिकोपायस्थले निश्चयो नास्ति यत् समस्तानामेव दु:खानां ध्वंसो भवेत्, अनागतानाञ्च दु:खानामुत्पत्तिर्न स्यादीदृशी व्यवस्था लोके न दृश्यते । ऐकान्तिकी आत्यन्तिकी च या दु:खनिवृत्ति: तदर्थं न्यायशास्त्रजन्यतत्त्वज्ञानं परमावश्यकम् ।

वस्तुत: यावत्कालपर्यन्तं पदार्थेषु तेषां याथार्थ्यं न गृह्यते, तावत्कालपर्यन्तं ततो भीतिरेव भवति । यतोहि मिथ्याज्ञानमात्मन आरभ्य प्रमेयेष्वपवर्गपर्यन्तेष्वनेकविधं भवति, अनात्मभूतेषु शरीरेन्द्रियादिष्वात्मबुद्धि:, दु:खे च सुखमित्याकारकं मिथ्याज्ञानम्, एवमनित्ये जगति नित्यमितिज्ञानम्, अत्राणे त्राणमितिज्ञानम्, त्याज्ये च पदार्थे अत्याज्यमिति ज्ञानं, प्रवृत्तौ तावत् नास्ति किमपि कर्म, न च कर्मण: फलञ्च किञ्चित्कर्मफलं भवति, दोषेष्वपि नायं दोषनिमित्तक: संसार:, एवं प्रेत्यभावे नास्ति कश्चनैतादृशो जीव आत्मा वा य: म्रियात् मृत्वोत्पद्यते वा, नहि जन्मन: किञ्चिद् निमित्तं, न भवति जन्मनश्चाभाव:, एष प्रेत्यभाव: उत्पत्तिमान् भवति, अनन्तश्च भवति, अपवर्गे तावत् सर्वं भद्रकं लुप्यते । अत: भीषणोऽयमपवर्ग:, एवं भूतेऽपवर्गे यत्र सर्वमपि कार्यं विलुप्यते, तदर्थं को प्रयतेत् । इत्थं जायमानात् मिथ्याज्ञानादनुकूलविषयेषु राग: संजायते, प्रतिकूलविषयेषु च द्वेष: सञ्जायते । रागद्वेषाच्च असत्य–ईर्ष्या–लोभ–मोहादयो दोषा: जायन्ते । दोषेण पुरुष: संयुक्त: हिसादिपरदार-परद्रव्यकामनादिषु प्रवर्तते । प्रवृत्तिरियं पापात्मिका भवति । दानपरित्राणादौ च या प्रवृत्ति: सा शुभा भवति । शरीरेण शाकमात्मन आद्यक्षणसम्बन्धो जन्म, तस्मिन् जन्मनि विद्यमाने बाधना–पीडादय: जायन्ते । इत्थं प्रवर्तमान: पुरुष: सांसारिकबन्धनेन बद्ध: सन् दु:खपङ्कनिमग्नो भवति, अनित्येषु पदार्थेष्वात्मत्वमवगाहमान: दु:खसाधनीभूतेषु संलग्न: सर्वदैव दु:खितो भवति । तत्त्वज्ञानञ्च मिथ्याज्ञानविपरीतमात्मन्यात्मेति ज्ञानम्, अनात्मनि चानात्मज्ञानम्, सभये सभयमिति ज्ञानं, निर्भये निर्भयमिति ज्ञानम्, अस्ति कर्म, कर्मफलञ्चास्ति, आत्मा च शरीरेन्द्रियाणि भिन्न:, नित्य:, विभुर्विद्यते । एवं विधन्यायशास्त्र-प्रतिपादितषोडशपदार्थानां यदा तत्त्वज्ञानं जायते तदा अतद्भूतेषु पदार्थेषु या तत्त्वरूपा भ्रमात्मिका प्रतीति:, मिथ्याज्ञानरूपा सा निवर्तते, तन्निवृत्तौ च रागद्वेषात्मका: दोषा: निवर्तन्ते, दोषनिवृत्तौ च प्रवृत्तेरपायो जायते, प्रवृत्यपाये च जन्मापाय:, जन्मापाये चैकविंशतिदु:खध्वंसो जायते, ततश्च भवति ऐकान्तिकात्यन्तिकदु:खनिवृत्ति:, तादृशैकान्तिकात्यन्तिकदु:खनिवृत्तिरेव मोक्षपदार्थ: । तथा चोक्तं महर्षिणा गौतमेन[१४]–''तदत्यन्तविमोक्षोऽपवर्ग:'' इति ।

यद्यपि संसारावस्थायामपि तत्तत्साधनैः दुःखस्य निवृत्तिर्जायते, तथापि तत्त्वज्ञानातिरिक्तसाधनेन जायमाना दुःखनिवृत्तिरेकान्ततोऽत्यन्ततः न भवति । अतः तादृशैकान्तात्यन्ततः दुःखनिवृत्तिः तत्वज्ञानेनैव सम्भवति ।श्रूयते च ''न स पुनरावर्तते, न स पुनरावर्तते'' इति श्रुत्या तत्वज्ञानेन दुःखनिवृत्तौ सत्यां न पुनः संसारावस्थायां जीवः समागच्छति, न वा कदापि दुःखं जायते ।इत्थं प्रमेयस्य द्वादशविधत्वं न्यायशास्त्रे प्रदर्शितमिति शम् ।।

**सन्दर्भसूची –**


१. न्यायसूत्रम् - १.१.१

२. न्या.सू. - १.१.३

३. न्या.सू. - १.१.९

४. न्या.सू. - ३.१.१

५. तस्य भोगायतनमन्त्यावयवि ''शरीरम्'', तर्कभाषा (डॉ गजाननशास्त्रिमुसलगाँवकर-कृतहिन्दीव्याख्योपेता) पृ.-२८३

६. न्या.सू. - १.१.११

७. तर्कभाषा - पृ.-२८३

८. श्रीमद्भगवद्गीता. अ.८, श्लो.१५

९. श्रीमद्भगवद्गीता. अ. २, श्लो. २२

१०. न्या.सू. - १.१.१९

११. न्या.भा.सू. - १.१.१९

१२. 'आत्मनित्यत्वे प्रेत्यभावसिद्धिः' न्या.सू. ४.१.१०

१३. न्या.सू.-१.१.२

१४. न्या.सू.-१.१.२२


—०—


*वरिष्ठ-सहायकाचार्योऽध्यक्षश्च (नव्यन्यायविभागे)*

*राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)*

*श्रीसदाशिवपरिसरः, पुरी, ओडिशा*

# रामायणेषु रामावतार:

स्नेहलता महापात्र

वेदेषु स्त्रीशूद्रद्विजबन्धुजनानामनधिकारात् वेदस्थज्ञानतत्वं सर्वजनाधिगम्यं नाभूत् तदा स्वयं भगवान् जगत्पालको विष्णु: व्यास: वाल्मीकिरूपेण च वेदान् सरलीकृत्य पुरानेतिहासवाङ्मयं प्रवर्तयामास। तेषु आदिकविना महर्षिवाल्मीकिना संस्कृतभाषां समाश्रित्य आदिकाव्यं रामायणं रचितम्। किञ्च रामायणस्येतिहासेसत्वेऽपि काव्यत्वं प्रसिद्धम्। विश्वेऽस्मिन् विश्वे वाल्मीकिनां सर्वादौ श्लोकवद्धरामायणस्य संप्रकाशनात् रामाद्यनमादिकाव्यं वाल्मीकिश्च आदिकविरिति प्रसिद्धिं गतौ। तत्र भगवत: मर्यादापुरूषोत्तमस्य श्रीरामचन्द्रस्य पवित्रा लीलागाथा वर्णिता । श्रीमद्रामायणस्य सुमहत्त्वमनुभूय संस्कृतभाषावोधे जनानां च काठिन्यं विचार्य परवर्त्तिकाले प्रादेशिकभाषास्वपि रामाद्यणं प्रदेशिककविभि: विरचितम्। तेषु भिन्नभिन्नप्रादेशिकभाषासु रचितानि रामायणानि कुत्र कुत्र वाल्मीकिरामायणस्य भावानुवेदरूपेण कुत्रचिच्च नवीनविषयाणां सन्निवेशात् किञ्चित् भिन्नरूपेणप्राप्यन्ते। तेन तन्मूलभूतं रामायणमवलम्ब्य अनेकानि रामायणानि दृग्गोचरीभूतानि भवन्ति। अत: तेषु मूलकथावस्तुनि आधारीकृत्य किञ्चिन्नूतनतथ्यमुद्घाटनेन कथावस्तुसंयोजनेन च किमपि विचित्रतत्वं विविधरामायणेषु कविभि: प्रतिपादितम्।

प्रसङ्गेऽस्मिन् भगवान् श्रीराम: अस्यां भुवि कथं जन्मग्रहणं कृतवान्? जन्मग्रहण को हेतु: ? इति विषयमनलम्ब्य विविधेषु ये मतभेदा: दृश्यन्ते तदत्र समासेन उपस्थाप्यते।

रामावतारे हेतु: :- प्रथमत: अवतार: इति पदार्थ: ज्ञातव्य: अव उपसर्गपूर्वकात् तृ तरेण इति धातो: **करणाधिकरणयोश्च (पा.सू.३.३.११७)** इति सूत्रेण धञ् प्रत्ययर अवताशब्द: निष्पद्यते। अवतरति आविर्भवति मत्स्यादिरूपैरिति अवतार:। विष्णो: दशावतारकथा शास्त्रे वर्णिता विद्यते। तद्यथा-

वेदानुद्धरते जगन्ति वहते भूगोलमुद्बिभ्रते।
दैत्यात् दारयते बलिं छलयते क्षत्रत्रयं कुर्वते।।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते।
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नम:।।

(श्रीगीतगोविन्द- सर्ग:-१.१२)

पुनरपि-

मत्स्यकुर्मवराहश्च नारसिंहोऽथ वामनः।
रामो रामश्च कृष्णश्च बुद्धकल्किश्च ते दश।।

श्रीमद्भागवते द्वितीयस्कन्धे सप्तमाध्याये श्रीभगवतः अवतारलील वर्णिता। तत्र चतुर्विंशत्यवतारेषु श्रीरामस्य वर्णनं यथा-

अस्मत्प्रसादसुमुखः कलया कलेश
इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे।
तिष्ठन् वनं सदयितानुज आविवेश
यस्मिन् विरुध्य दशकन्धर आर्तिमाच्छत्।।
श्रीमद्भागवते- २.७.२३

अतः भगवतः अवतारग्रहणे किमपि प्रयोजनं विद्यते। विना प्रयोजनेन संसारस्य काऽपि क्रिया न चलति। श्रीमद्भगवद्गीतायामुक्तं यत्-

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मनं सृजाम्यहम्।.
परित्राणांय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंसथापनार्थाये सम्भवामि युगे युगे।।(श्रीमद्भगवद्गीता-४.७-८)

यदा धर्मस्य ग्लानिः अधर्मस्य अभ्युत्थानं च भवति तदा भगवान् अवतरति। अत्र साधूनां परित्राणअय, दुष्कृतां विनाशाय धर्मसंस्थापनाय चेति हेतुत्रयमाश्रित्य भगवान् अवतरति इत्युक्तम्। एतत् समथम् रामचरितमानसे कविकुलचुडामणिः सन्ततुलसीदासः वर्णयति यत्-

जब जब होइ धरम के हानि। बाढहिं असुर अधम अभिमानि।।
तब तब प्रभु धरि बिबिध सरीरा। हरहिं कृपानिधि सज्जन पीरा।।
रामचरितमानस. बालकाण्ड

अवतारग्रहणेन सह भगवान् तस्य लीला लोकशिक्षणाय प्रकाशयति। त्रेतायां भगवान् रामः अस्यां भूमौ अवतीर्य अधर्मं विनाशाय धर्मस्थापनं कृतवान्। विविधेषु रामायणेषु श्रीरामस्य अवतारहेतु र्विविधरूपेण दर्शितः। अयं दशरथनन्दनः कौशल्यासुत श्रीरामः मर्यादापुरूषोत्तमरूपेण परिचितः। श्रीरामस्य जन्मनि हेतु७ः मूलवाल्मीकिरामायणे वर्णितः। यथा-

यदा दशरथः ऋष्यश्रृङ्गऋषिणा पुत्रेष्टियज्ञं सम्पादयति स्म तदा देवाः सगन्ध्र्वाः सिद्धाः ऋषयश्च तत्र समवेताः आसन्। तस्मिन् यज्ञे देवाः ब्रह्माणमुक्तवन्त यत् हे भगवान्!

रावण: नाम राक्षस: ईदानीं सर्वस्मै पीडां ददाति। भवता तस्मै वर: दत्त:। वयं तं वरं मानयन्त: सहामहे। स: दुर्मति: त्रिलोकान् पीडयति। तस्य विनाशाय कोऽपि उपाय: चिन्तनीय: तदा भगवान् विष्णु: चतुर्भुजरूपं धारयन् तत्र आगत:। सर्वे देवा: तमस्तुवन्। ते उक्तवन्त:- प्रभो! भवान् रावणं विनश्य अस्मान् रक्षतु।तद्यथा-

अवध्यं दैवतैर्विष्णो समरे जहि राव्म्। वाल्मीकिरामायणे-१.५.२२

अध्यात्मरामायणेऽपि पार्वतीमहादेवकथोपकथनप्रसङ्गे श्रीमहादेव: पार्वतीं प्रति रामजन्महेतुं कथयति हे देवि।दशवदनभारेण पीडिता पृथिवी गोरूपं धृत्वा देवै: मुनिभिश्च सह ब्रह्मण: समीपं गत्वा रूदन्तप्प्राह। तच्छ्रुत्वा ब्रह्मा सर्वै: देवै: सह पृथिव्या च सह क्षीरसमुद्रतीरमगच्छत्। तत्र भगवान् हरि: शयनं कृतवान्। ब्रह्मा तत्र भगवन्तं निर्वेदितवान् हे भगवन्! पुलस्त्यनन्दन: रावण: अतिदर्पित: सन् त्रिलोकान् बाधते। अत: भवान् मनुष्यरूपां धृत्वा तं हन्तु। तद्यथा-

त्रिलोकीं लोकपालांश्च बाधते विश्वबाधक:।<br>
मानुषेण मृतिस्तस्य मया कल्याणकल्पिता:।।<br>
अतस्त्वं मानुषो भूत्वा जहि देवरिपुं प्रभो।।( अ.रा.सर्ग.२श्मलो.२३-२४)

भगवान् तेषां प्रार्थनां स्वीकृत्य उक्तवान्- अहं पुरा कश्यपस्य तपसा सन्तुष्ट: सन् तस्मै वरं दत्तवान्। तेन पुत्रभावाय याचित:। मया एतत् अग्नीकृतम्।इदानीं स: कश्यप: दशरथ: बुत्वा पृथिव्यां तिष्ठति। अहं शुभदिने कौशल्याया: पुत्ररूपेण जन्मग्रहणं कृत्वा पृथिव्या भारं रावणं निहत्य दूरीकरिष्यामि।तेन भगवान् विष्णु: स्वस्य रूपं चतुर्धा विभज्य दशरथस्य पुत्ररूपेण जन्मग्रहणं कतवान्। अत्र हेतु: रावणविनाश: आनन्दरामायणे भगवत: शीरामस्य अवतारहेतु: पूर्ववत् वर्णित:।

प्रसिद्धभक्तिसाहित्यस्य अमूल्यग्रन्थरत्ने सन्तकविगोस्वामितुलसीदास: रामजन्महेतुं सुन्दरतया वर्णयति।

तत्र भगवान् शङ्कर: पार्वतीं प्रति कथयति यथा-

**रामजनके हेतु अनेका। परम बिचित्र एक तें एका।।**

**रामचरितमानसे-१.१२२.२**

अर्थात् भगवत: श्रीरामस्य जन्मन: अनेकानि कारणानि सन्ति। तेषु पञ्चकारणानि मया क्रमश: उपस्थापयन्ते। प्रथमत: गोस्वामिना तुलसीदासेन जयविजयोपाख्याने रामजन्महेतु: वर्णित: । वैकुण्ठपुरे भगवत: विष्णो: दर्शनार्थं सनकादय: महर्षय: गतवन्त:। तत्र द्वारपालौ जयविजयौ तेभ्य: मार्गं न दत्तवन्तौ। तदा ऋषय: कुपत: सन्त: उभ्यौ द्वारपालौ त्रिषु जन्मसुराक्षसौ भवताम् इति शोपेनोक्तवन्त:। तत्र प्रथमजन्मनि

हिरण्याक्षहिरण्यकश्यपुररूपेण, द्वितीयजन्मनि रावणकुम्भकर्णरूपेण, तृतीयजन्मनि दन्तवक्रशिशुपालरूपेणं बभूवुः। एतदभिशापं श्रृत्वा भगवान् विष्णुः एतयोरूपरि दयां कुर्वन् उक्तवान् यत् अहं युवयोः उद्धरार्थं त्रिषु जन्मसु क्रमशः वराह-नृसिंह- श्रीराम-श्रीकृष्णरूपैः भुवि अवतरिष्यामि। त्रेतायुगे तौ जयविजयौ रावणकुम्भकर्णरूपेण जातौ। तुलसीरामायणे वर्णितं यथा-

भये निशाचर जाइ तेह, महाबीर बलवान्।

कुम्भकरन् रावण सुभट सुर बिजई जन जान्। रामचरितमानसे-१.१२२

सोऽपि भगवान् विष्णुः स्वप्रदत्तवचनानुसारं रावणकुम्भकर्णयोः उद्धारार्थं रामरूपेण अजायत। एवं च कश्यपं वरं दत्तवान् यत् - कश्यपस्य अदितेः च पुत्ररूपेण सः जन्मग्रहणं करिष्यति। तद्वचनमनुसृत्य कश्यपः अदितिश्च अयोध्यायां दशरथकौशल्यारूपेण च अजायताम्। तयोः पुत्ररूपेणापि विष्णुः रामरूपं धृत्वा अजायतेत्ययं रामजन्मनि प्रथमहेतुः।

द्वितीयहेतुः- कस्मिन् कल्पे भगवान् विष्णुः देवकाम्यहेतोः विश्वकल्याणार्थं जलन्धरस्य गर्वविनाशाय च तत्पत्न्याः वृन्दावत्याः सतीत्वं हृतवान्। सती वृन्दावती विष्णुं प्रति शोपेन योजितवती यत् स विष्णुः मनुष्यरूपेण मर्त्ये अवतीर्य मे पत्युः उद्धारं करितु इति। परवर्त्तिकाले रावणरूपेण जातं जलन्धरंस्वयं विष्णुः रामरूपं धृत्वा विनाशाय एद्धृतवान्। अयं तु रामचन्मनि द्वितीयहेतुः।

तृतीयेहेतुः- अन्यस्मिन् कल्पे नारदस्य अभिशापानुसारं भगवान् विष्णुः रामरूपं धृतवान्। श्रीरामचरितमानसे अस्मिन् प्रसङ्गे विस्तृता कथा वर्णिता अस्ति। भक्तशिरोमणि नारदः भगवन्तं शापं प्रदत्तवान् ।यथा-

नारद श्रापदीह्न एक बारा। कल्पक एक तेहि लगि अवतारा।।

नारदः हिमालयस्य समीपे महत् तपः कृतवान्। इन्द्रदेवेन प्रोषिता अप्सरसः तेन पराभूताः। सः कामदेवं जीतवान्। तेन सः अभिमानी भूत्वा भगवतः शङ्करस्य समीपे अत्मनः अभिमानं प्रकटितवान् । भगवान् शङ्करः सर्वं श्रृत्वा कन्तिवान् हे नारद! भवता एतत्कामदेवविजयचरितं विष्णोः समीपे न वक्तव्यम्। किन्तु नारदः अभिमानवशात् विष्णोः समीपे कामचरितं कथितवान्। नारदस्य अहङ्कारविनाशाय भगवान् विष्णुः मायां रचयित्वा सुन्दरनगरस्य रचनां कृतवान्। तत्र शीलानिधि नाम राजा आसीत्। तस्य विश्वमोहिनी नाम्नी एका सुन्दरी कन्या अभवत्। कन्यायाः; स्वयम्वरसमये राजा शीलानिधिः गच्छन्तं सर्वज्ञं ज्योतिर्विदं नारदं स्वकन्यायाः हस्तरेखां दर्शितवान्। हस्तरेखा नारदः ज्ञातवान्यत् इयं कन्या यं वरयिष्यते सः अजरः अमरश्च भविष्यति। एतल्लोभेन स्वयं नारदः कन्यायाः रूपेणाकृष्टस्सन् तस्या : विवाहं कत्तुमैच्छत्। कन्या वरयते रूपमिति न्ययेन सुन्दररूपं

विना सुन्दरीकन्यायाः वरणमसम्भवम् इति विचार्य नारदः विष्णुं ध्यानं कृत्वा प्रार्थितवान्- हे विष्णो ! तव सौम्यरूपं मह्यंदेहि। तदा भगवान् मायाधारः कौतुकलीलया तत्रोपस्थितः सन् भक्तस्य कल्याणाय सुन्दररूपमदत्वा असुन्दररूपं मर्कटमुखं प्रदत्तवान् । मर्कटमुखनारदं दृष्ट्वा विश्वमोहिनी कन्या नारदं न स्वीकृतवती। तत्रो पस्थितं भगवन्तं विष्णु सा कन्या परिणिनाय। मर्कटमुखनारदं दृष्ट्वा शिवस्य द्वौ अनुचरौ उपाहसताम्। एतेन नारदः कुपितः सन् अभिशापं दत्तवान् यत् तौ अनुचरौ राक्षसौ भवताम्। विष्णोरुपरि क्रुध्यन् नारदः अभिशापं दत्तवान् यत् - यथा अहं पत्न्या विरहितः दुःखितः तथा त्वमपि पत्नीविच्छेदेन दुःखं प्राप्स्यसि। मर्कटमुखं दत्वा यन्मम उपहासं कृतवान् तेनैव मर्कटसहाय्येन त्वं पत्न्याः लाभं करिष्यसि। भक्तनारदस्य एतद् अभिषापं शिरसि अवधार्य विष्णुः रामरूपेण जन्म लब्धवान्।द्वौ शिवगणौ रावणकुम्भकर्णौ जातौ। विश्वमोहिनि जगज्जननी सीतारूपेण अजायत।

अस्मिन् प्रसङ्गे श्रीरामचरितमानसे उक्तं कविना यत्-

कपि आकृति तुम्ह कीह्नि हमारी। करिहहिं कीस सहाय तुम्हारी।।
मम अपकार कीह्न तुम्ह भारी। नारी बिरहँ तुम्ह होब दुखारी।।
एक कलप एहि हेतु प्रभु लीन्ह मनुज अवतार,
सुर रञ्जन सज्जन सुखद हरि भञ्जन भुबि भार। रामचरितमानसे-१.१३९

भक्तनारदस्य अभिशापमङ्गीकृत्य भगवान् विष्णुः एकस्मिन् कल्पे रामरूपं धृतवान् इति तृतीयहेतुः अत्र वर्णितः।

चतुर्थहेतुः- गोस्वामी तुलसीदासः प्रकाशयति यत् स्वयमेव मनुः तस्य पत्नी शतरूपा च पुत्राय राज्यभारं समर्प्य तपस्यां कर्तुं वनं जग्मतुः। वासुदेवपरायणो भूत्वा अनन्तवर्षाणि सर्वं त्यक्त्वा महत् तपः आचरितवन्तौ। अस्थिमात्रसारौ तौ दृष्ट्वा बगवान् विष्णुः शून्यवाण्या तौ वरं प्रार्थयितुमुक्तवान्। किन्तु मनुः वरदातारं स्वचक्षुषा र्द्रष्टुमैच्छत्। भगवान् विष्णु भक्तमनुः उक्तवान्- प्रभो ! भवान् अस्माकं पुत्ररूपेण आगच्छतु। भगवान् तयोः प्रार्थनामङ्गीकृत्य स्वयं त्रेतायुगे रामरूपेण अवतारं गृहीतवान्। मनुः शतरूपा च दशरथकौशल्यारूपेण अजायेताम्। तयोः प्रार्थनामङ्गीकृत्य रामः जन्मग्रषणं कृतवान् इति चतुर्थहेतुः।

रामजन्म्नि पञ्चमो हेतुः - प्ुराकाले भानुप्रतापस्याऽनुजः अरिमर्दनश्च द्वौ प्रबलप्रतापिनौ आस्ताम्। अदिशापवलेन रावण कुम्भकर्णरूपेण तौ जातौ। तयोः उद्धारार्थं भगवान् विष्णुः रामरूपेण अवततार। श्रीरामचरितमानसे सविस्तरं एतद् वर्णितम्।

यदा पार्वती एतेषु जन्मकारणेषु मुख्यकारणं पृष्वती तदा भगवान् शङ्करः उक्तवान्

यत् एतानि भगवतः जन्मनि गौणकारणानि । मुख्यकारणं तु भक्तानां हितनिमित्तं श्रीरामस्य अवतारः कल्पितः इति। यथोक्तं कविना तूलसीदासगोस्वामिना-

**सो केवलं भगतन हित लागी। परम कृपालु प्रनत अनुरागी। राम. बाल.**

अतुरामायणस्य तृतीयचतुर्थसस्योळ श्रीरामचन्द्रस्य जन्मकारणं पूर्वोक्तकारणेभ्यः नुतनतया परिलक्ष्यते। अम्बरीषस्य राजसभां नारदः पर्वतश्च अगच्छताम्। अम्बरीषस्य कन्यां श्रीमतीं दृष्ट्वा तौ तां परिणेतुं राजानं उक्तवन्तौ। किन्तु एकएन कन्या ग्रषणीया इति अम्बरीषः न्यवदयत्। ततः नारदः आगत्य एकान्ते विष्णुं प्रस्म्य स्वमनोरथम् उक्तवान् यत् ऋषिपर्वतस्य मुखं वानरवत् भवतु। एवमपि पर्वतः विष्णु समीपे गत्वा एकान्ते स्वाभिलाषम् उक्तवान् यत् नारदस्य मुखं मर्कटमुखमिवक्रियताम्। विष्णुरुभयोः कृते आश्वासनं दत्तवान्। अम्बरीषस्य राजसभायां नारदः पर्वतश्चेति द्वौ मुनिवरौ आगतौ। राजा कन्यां तयोः एकं वररूपेण स्वीकर्तुं कथितवान् । सा कन्या दिव्यमालामादाय यदा तत्र गतवती तदा तौ वानरमुखौ दृष्ट्वा भीता संजाता। तयोः मध्ये षोडशवार्षिकं युवाकं दृष्ट्वा पितरमुक्तवती। ततः तौ मुनिवरौ युवकस्य विषये श्रृत्वा उक्तवन्तौ यत् अयं युवकः नूनं मायावी जनार्दन इति।अनन्तरं मुनिशापभयात् सा कन्यका सहसा मालामादाय तिष्ठन्ती तयोः मुनीवरयोः मध्ये पर्ववत् युवकं दृष्ट्वा तस्मै माल्यं ददौ। भगवान् विष्णु तां कन्यामादाय स्वस्थानं गतः। सा कन्यका हरिं प्राप्तवती। तौ मुनिवरौ दुःखितौ भूत्वा उपविष्णु गतवन्तौ। सर्वमाकर्ण्य विष्णुः कथितवान् अत्र मम दोषं विचार्य तस्मै शापं दातुं चेष्टितवन्तौ। तदा विष्णो सुदर्शनचक्रं द्वौ मुनिवरौ प्रत्यधावत्। तौ भयेन विष्णुलोकं गत्वा सर्वं विष्णो माया इति ज्ञात्वा तस्मै शापं ददतुः। यथा भगवान् रामस्य वृत्या श्रीमतीं हृतवान् तथा कश्चित् राक्षसभगवतः पत्न्याः हरणं करोतु इति शापं स्वीकृत्य भगवान् विष्णुः अम्बरीषस्य वंशे धशरथस्य पुत्ररूपेण जन्म लब्ध्वा रामरूपेण ख्यातिंलब्धवान्। नारदपर्वतयोः अभिशापं स्वीकृत्य तौ मुनिवरौ इव पत्नीविरहेण दुःखितः अभवत्। भक्तस्य शापं ग्रहीतुं तथा रावणविनाशाय भगवत श्रीरामस्य जन्मनि हेतुः अयं कविना परिकल्पितः।

एतस्मादनुशीलनाज्ज्ञायते यत् भगवतः श्रीरामस्य अवतारस्य ये : हेतवः ते केवलं लोकशिक्षणार्थं भवति। वस्तुतः भगवतः अवतारे अधर्मस्य विनाशेन धर्मस्य संसथापनमेव मुख्यं कारणम्।

—०—

*शोधच्छात्रा,*

*पुराणेतिहासविभागः,*

*राष्ट्रियसंस्कृतसंस्थानम्, श्रीसदाशिवपरिसरः,पुरी, ओडिशा*

# कर्पूरमञ्जर्यां बिम्बविधानम्

डॉ० पूनम लखनपाल

कर्पूरमञ्जरी संस्कृतकाव्ये काव्यशास्त्रे च लब्धप्रतिष्ठकविकविराजराजशेखररचितं सट्टकमस्ति। सट्टकं प्राकृतभाषालिखितमुपरूपकाणामेको भेदो वर्तते। वस्तुतः सट्टक-परम्परायाः जनकः राजशेखर एव यतो हि कर्पूरमञ्जरी एव प्रथमा रचना सट्टकरूपा। तेनैव सट्टकस्य स्वरूपमपि सर्वप्रथमं कर्पूरमञ्जर्याः प्रस्तावनायां प्रत्यपादि। तद्यथा-

सो सट्टओ त्ति भण्णई दूरं जो णाडिआइं अणुहरइ।
किं उण एत्थ पबसअबिक्कंभाईं ण केवलं होंति।।[१]

अर्थात् यत्रोपरूपके नाटिकाया अनुकरणं भवति किन्तु प्रवेशकविष्कम्भयोः संञ्योजनं न क्रियते तदेव सट्टकं बुधैः कथ्यते।

कर्पूरमञ्जर्यां चतसृषु जवनिकासु नायकराज -चन्द्रपालस्य नायिका कर्पूरमञ्जर्याश्च प्रणयगाथा वर्त्तते ।अतएव श्रृङ्गारमय्यामस्यां रचनायां पर्याप्तावसराः सन्ति बिम्बविधानस्य।

कोऽयं बिम्बः यस्य विधानं विवेच्यं पत्रेऽस्मिन् । बिम्बः वी-धातोः[२]वन्-प्रत्यये कृते सति सिद्ध्यति, यस्यार्थः प्रतिमा छाया अक्स[३] इति, तस्याः विधानं विन्यासः प्रयोगो वा। बिम्बविधााने कविः स्वानुभूतं वर्णनीयं पदार्थं चमत्कारिशब्दचित्रमाध्यमेन सहृदयानां समक्षं प्रत्यक्षीकारयति । इदं प्रत्यक्षीकरणं दृश्यं श्रव्यं घ्रेयं स्वाद्यं स्पृश्यञ्च भवति। तूलिकानिर्मितं चित्रं चित्रकारस्य भावान् प्रकटयत् द्रष्टृणां चक्षुरिन्द्रियं तोषयति । किन्तु काव्यबिम्बेन प्रस्तुतं चित्रं पञ्च ज्ञानेन्द्रियाणि परितोषयति। लक्षणाव्यञ्जनासादृश्य-मूलकालङ्काराः तस्य उपकरणानि सन्ति। पाश्चात्यकाव्यशास्त्रिभिः Image इति पदेन गृहीतो बिम्बः।

नात्र विवेचनीया बिम्बस्यैतिहासिकशास्त्रीयगवेषणा किन्तु इदमवश्यमेव कथनीयं यत् बिम्बविधानं बिम्बयोजना वा नास्ति आधुनिकी परिकल्पना। काममस्य लक्षणं प्रत्यक्षतो न विद्यते संस्कृतसाहित्यशास्त्रे, किन्तु अस्य प्रायोगिकरूपं वैदिकपरम्परातः प्राचीचलत्। श्रूयते यथा-

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्।

यत्रा नरो देवयन्तो युगानि वितन्वते प्रतिभद्राय भद्रम्।।[४]

अत्र उषःकालान्तरे सूर्योदयवर्णनमस्ति । परन्तु शब्दावल्याम् उदीयमानसूर्यः सुन्दरीमनुगच्छता युवकेनोपमितः। सहृदयानां मस्तिष्के उत्कीर्यते एकं सजीवं चित्रं यस्मिन् कोऽपि विशालोत्सवः, प्रचरमाणाः अनेके जनाः, नृत्यगीतसंगीतमयमायोजनं मनोरञ्जनञ्च विद्यते। तस्मिन्नवसरे कोऽपि युवकः कामपि सुन्दरीमनुगच्छति।

ईदृशी काव्यबिम्बपरम्परा, या अनुकृता राजशेखरेण कर्पूरमञ्जर्याम्। यद्यपि सम्पूर्णसट्टकमेव सुशोभते बहुविधबिम्बयोजनाभिः, किन्तु द्वितीयजवनिका विशेषरूपेण बिम्बैरलङ्कृता जाता। द्वितीयजवनिकायां यदा राजा विचक्षणां पृच्छति- अथान्तःपुरं नीत्वा देव्या किं कृतं कर्पूरमञ्जर्याः ? विचक्षणा निवेदयति- देव! मण्डिता,तिलकिता, भूषिता तोषिता च। किन्तु राजा सन्तुष्टो न भवति। औत्सुक्यं वर्तते तस्य हृदये । तस्य मनसि कीदृशी प्रतिभाति कर्पूरमञ्जरी प्रसाधनक्रियोपरान्तम्। सः विस्तारेण ज्ञातुमिच्छति। अस्मिन् स्थले कविः कर्पूरमञ्जर्याः सौन्दर्यमुद्घाटयति, उपमोत्प्रेक्षानिदर्शनादि-भिरलङ्कारप्रयोगैः सह बिम्बस्य विधानं करोति। द्वादशतमपद्यात् प्रारभ्य द्वाविंशतितमपदीयपर्यन्तमद्भुतप्रयोगाः सन्ति बिम्बानाम्। एकस्मिन्नेव पद्ये पूर्वार्धे विचक्षणायाः कथनं, द्वितीयार्धे राज्ञः उत्प्रेक्षा। शोभते नूतनः प्रयोगोऽयम् । यथा-

मरगअञ्जीरजुअं चरणे से लंभिआ वअस्साहिं।
भ्रमिअमहोमुहपङ्कअज,अलं ता भमरमालाए।।[५]

अस्मिन् पद्ये मरकतमञ्जीरयुतयोः कर्पूरमञ्जर्याः चरणयोः बिम्बो जायते यत् अधोमुखं पङ्कजद्वयं षट् पदपंक्तिभिराक्रान्तमिव स्यात्, परित आवेष्टितमिव जातम्। श्लोकऽयं एकतः चरणयो अधोमुखपङ्कजद्वयस्य बिम्बं प्रस्तौति द्वितीयतः मरकतमञ्जीराणां ध्वनिः नादानुकृतिना षट्पदानां बिम्बं प्रस्फुटयति। एवं श्रव्यचाक्षुषयोः द्वयोः बिम्बयोः सम्मिश्रणमस्ति। अन्यस्मिन् पद्ये-

राअसुअपिच्छणीलं पट्टांसुअजुअलअं णिवसिआ।
कअळीकन्दलिआ ता खरपवणविलोल्लिअदलाग्गा।।[६]

पिच्छनीलपट्टांशुकयुगलधारिणी कर्पूरमञ्जरी तीव्रवायुना कम्पितैः दलैरग्रभागे परिवृत्ता कदल्या कन्दलीव सुशोभिता जाता। अस्मिन् बिम्बे कदल्याः मसृणता, पवनस्य मन्दता, पत्राणां चञ्चलता हरितिमा च चाक्षुषस्पर्शबिम्बं प्रस्तुवन्ति।

अन्यत्र- उभएसु वि सवणेसुं णिवेसिदं रअणकुण्डलजुअं से।
ता बदणमम्महरहो दोहिं व चक्केहिं चङ्कमिओ।[७]

विचक्षणा राजानं वक्ति यत् कर्पूमञ्जर्या: उभयो: कर्णयो: रत्नझटितकुण्डलद्वयं स्थापितम्। एतत् निशम्य नृप: प्राह तदा तु वदनमेव मन्मथस्य रथ: द्वाभ्यां चक्राभ्यां चालितं भवेत्। अस्मिन् श्लोके कुण्डलयुगलस्य चञ्चलता या काचित् इशद्ध्वन्यात्मकता मुख्यस्य प्रभावशालिता च वर्तते ता: सर्वा: संभूय लोकत्रयं विजेतुं रथे प्रारूढस्य कामदवस्य रथस्य गतिशीलतां विद्योत्य भावबिम्बं प्रकटयन्ति। अपि च -

जच्चञ्जणणिअपसाहणाइं जादाइं तीएणअणाइं।
उपपुंखिअ णवकुवलअसिलीमुहे पञ्बाणस्य।।[८]

कर्पूरमञ्जर्या: कज्जलालङ्कृते नयने कामदेवस्य नीलोत्पलबाणाविव प्रतिभासेते। अत्र तस्या: नयनयो: नवकुवलयाभ्याम् अञ्जनस्य भ्रमरेण साम्यं व्यज्यते। शिलीमुखीति रूपकेण कामबाधा प्रोक्ता। नेत्रयोश्च तीक्ष्णत्वं व्यङ्ग्यम्। कर्पूरमञ्जर्या: कटाक्षेण दृष्टो जन: कामासक्त: तीक्ष्णशरेण विद्धो भवति।

बिम्बोऽयं दर्शनीय:- घणसारतारणअणाइ गूढकुसुमोच्चओ चिहुरभारो।
ससिराहुमल्लजुज्झं विअ देसिअमेणणअणाए।।[९]

शोभननेत्राया: नायिकाया: केशपाशे पुष्पाणि गुम्फितानि सज्जितानि इति श्रुत्वा राजा तर्कयति तर्हि तस्यां मृगाक्ष्यां चन्द्रराहो: द्वन्द्वयुद्धमिव दृश्यमभवत्। अत्र श्वेतकुसुमनिचयस्य चन्द्रेण कृष्णचिकुरनिकरस्य च राहुणा साम्यमुक्तम्। मल्लयुद्धमित्यनेन तयो: समबलत्वं तेन च तुल्यशोभाजनकत्वं व्यज्यते। सहृदयनेत्राणां समक्षं मल्लयुद्धक्षेत्रमुपस्थितं भवति यस्मिन् कृष्णवर्ण: गौरवर्णश्च द्वौ योद्धारौ परस्परं मल्लयुद्धं कुरुत:। कदाचित् एक उपरि आयाति कदाचित् द्वितीय:। कदाचित् द्वावपि सुगुम्फितौ भवत:। शोभेनो बिम्ब:।

भोजनप्रियो विदूषको वसन्तसौन्दर्येऽपि खाद्यसामग्रीं पश्यति। अतएव तेन कृते वसन्तवर्णने स्वाद्यबिम्बा: प्राप्यन्ते-

फुल्लक्कुरं कलमकूरसमं बहंति
जे सिंदुबारविडबा मह बल्लभा दे।
जे गालिअस्स महिसीदाहिणो सारिच्छा
ते किं च मुद्धबिअइल्लपसूणपुंजा।।[१०]

द्वितीयजवनिकायामेव कर्पूरमञ्जर्या: हिन्दोलनक्रिया बहुविधबिम्बानां शृङ्खलां प्रस्तौति-

हिन्दोलणलीलालणलंपडं चक्कवत्तुलं रमणं।
किलकिलइ व्व सहरिसं कञ्चीमणिकिङ्किणीरवेण।।[११]

पद्येऽस्मिन् हिन्दोलनलीलाललनलम्पटं चक्रमिव वर्तुलाकारं नितम्बं

मणिझटितक्षुदघण्टिकरवव्याजेन सहर्षं किलकिलायतीव। नितम्बप्रदेशस्योपरि मानवीयभावानामारोपणमत्र। भावबिम्बोऽयं हिन्दोलनस्योपरि तिष्ठत:सहर्षं किलकारयत: बालकस्य चित्रं प्रस्तौति।

ताडंकजुअं गणेसुबहलघुसिणेसु घडणलीलाहिं।
देइ व्व दोलान्दोलणरेहाओ गणणकोदुएण।।[१२]

अस्मिन् पद्ये ताटङ्कयुगलेन कर्पूरमञ्जर्या: सान्द्रकुंकुमरसलिप्तयो: कपोलयो: घर्षणक्रियाभि: निर्मिता: रेखा: बहुश: हिन्दोल्यन्ते अनया इति गणनाकौतूहलेन चिह्निताया: रेखाया: विम्बं प्रस्तुवन्ति । अत्रापि गणनादिमानवीयक्रियाया: जिज्ञासाकौतूहल-मानवीयभावानाञ्च आरोपणं दृश्यते। यत् संख्यातविरहदिवसयक्षिणीव[१३] प्रतिभाति।

अन्यत्र- दोलारअविच्छेओ कहं पि मा होउ त्ति पडइ व्व।
पुट्ठमि वेणिदंडी मम्महचम्मजट्टिआअंतो।।[१४]

दोलान्दोलनरसस्य विच्छेद: कथमपि न स्यादिति हेतोरेव मन्मथस्य चर्मणा विनिर्मिता यष्टिरिवाचरन् वेणीरूपकेशपाश: अस्या: पृष्ठभागे प्रहरतीव प्रतीयते। कर्पूरमञ्जर्या आनन्ददायको दोलनव्यापार: सततं प्रसरेत्तदर्थ: वेणीदण्ड: अस्या: पृष्ठे वारम्बारं पततीव।

एवमेव पद्यमिदं देवकन्याया: विमानस्य बिम्बं प्रस्तौति-

उच्चहिं घोउरेहिं धवलधअवटाडम्बरिल्लावलीहिं
घण्टाहि बिन्दुरिल्लासुरतरुणिविमाणाणुरूयं वहन्ती।
पाकारं लङ्घअन्ती कुणइ रअवसा उण्णमन्ती णमन्ती
एन्तो जन्ती अ दोला जणमणहरणं कट्टनक्वट्टणेहिं।।[१५]

अन्यस्मिन्नपि पद्ये दोलायमितीं नायिकां समग्ररूपेण चित्रयति-

रणन्तमणिणेउरं झणझणंतहारच्छडं
कलक्कणिदकिङ्किणी मुहरमेहलाडम्बरं
विलोलवलआवलीजणितमञ्जुसिञ्जारवं
ण कस्स मणमोहणं ससिमुहीअहिन्दोलणं।[१६]

न केवलं नायिकावर्णने अपितु प्रकृतिवर्णनेऽपि राजशेखरेण बिम्बविधानं कृतम्। उद्दीपनविभावरूपेण वसन्तवर्णने दिवसस्य दीर्घत्वे कवि: बिम्बं प्रस्तौति-

गाअंतगोबअबहुपदपंखिआसु दोलासु बिब्ममबदीसु णिसण्णदिट्ठी।
जं जादि खजिदतुरंगरहो दिणेसो तेणेव्व होंति दिअहा अइदीहदीहा।[१७]

अन्यत्र पश्यत: अन्यत्र गच्छत: परुषस्य स्ववाहने नियन्त्रणं न भवति। अनियन्त्रितस्य गति: अवरुद्धा भवति। इदमेव चित्रणमत्र स्फुरति। गायन्तीनां गोपबधूनां

चरणै: सञ्चालितासु दोलासु स्थितासु विलासवतीषु निषण्णदृष्टि: सूर्य: स्खलिततुरङ्गरथ:सन् यद्याति तेनैव दिनानि दीर्घदीर्घाणि सन्ति।

एवमेव कर्पुरमञ्जर्यां सद्य:स्नाता-नायिकाया:[१८] व्यङ्ग्यरूपेण प्रेमियुगलस्य[१९] नृत्यनिपुणनर्तकीनां[२०] रौद्ररूपिण्या: देव्या:[२१] बिम्बा: पदे पदे दृश्यन्ते। अतएव कर्पूरमञ्जर्यां बिम्बविधानं प्रमाणयति यत् कविराजराजशैखर: वैदिकीबिम्बविधानकलाभि: न केवलं परिचितोस्ति, अपितु तेषां रचनायामपि निपुणोऽस्ति। प्रकृति: भवतु लोकजीवनं वा, भावानां सूक्ष्मक्षेत्रे तस्य काव्यं काव्यबिम्बेन प्राणिति ।

---

**सन्दर्भा:**


१. कर्पूरमञ्जर्याम् -१/६ ।

२. वी-गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (२.४१) ।

३. संस्कृतशब्दार्थकौस्तुभसंस्कृतहिन्दीकोश(आप्टे) ।

४. ऋग्वेदे -१.११५.२ ।

५.कर्पूरमञ्जर्याम्– २/१३ ।

६.तत्रैव २/१४ ।

७.तत्रैव २/१८ ।

८.तत्रैव २/१९ ।

९.तत्रैव २/२१ ।

१०. तत्रैव १/१९ ।

११.तत्रैव २/३४ ।

१२.तत्रैव २/३७ ।

१३. मेघदूते उ. -२७ ।

१४.कर्पूरमञ्जर्याम् - २/३९ ।

१५.तत्रैव २/३१ ।

१६.तत्रैव २/३२ ।

१७.तत्रैव १/२१ ।

१८.तत्रैव १/२६,२७ ।

१९.तत्रैव १/३५ ।

२०.तत्रैव ४/१०-१८ ।

२१.तत्रैव ४/१९ ।


—०—


*एसोसिएट् प्रफेसर एवं अध्यक्षा*

*संस्कृतवभिाग:, आर.जी. पी.जी. कालेज,*

*मेरठ (यू.पी.)*

# धर्मशास्त्रे पुत्रभेदाः

डॉ. दयानिधिमिश्रः

पुन्नाम्नः नरकात् त्रायते इति पुत्रः । वैदिकवाङ्मयोक्त - ''आत्मा वै पुत्रनामासि'' इत्यस्मात् वचनात् विज्ञायते पुत्र एव । गृहस्थस्य आत्मा भवतु स च पुत्रः द्वादशविधो भवति । परन्तु द्वादशविधेषु पुत्रेषु औरसपुत्रस्य प्राधान्यं सर्वे स्वीकुर्वन्ति । औरसपुत्रस्य श्रेष्ठत्वम् । ज्येष्ठस्य औरसपुत्रस्य सुपुत्रस्य प्रशंसापरकाणि वचनानि शास्त्रान्तरेष्वपि प्रतिपादितानि वर्त्तन्ते । एतन्मिन् विषये किञ्चित् मया प्रतिपाद्यते । तत्र सुभाषितेषु नीतिवचनेषु चाणक्येन इदं तावत् प्रतिपादितं यत् -

एकेनाऽपि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्वं सु-पुत्रेण कुलं यथा ।।

पुनश्च -

एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि ।

एवं प्रकारेण गुणशीलयुक्त सु-पुत्रस्य प्रशंसा गुणोत्कृष्टता सर्वेषां मनांसि रञ्जयति । स च पुत्रः जातमात्रेण स्वकीयं पितरं तस्य पितृऋणात् अनृणं करोति । पुनश्च अयं पुत्रः जातमात्रेण पितुः पुन्नामकनरकं प्रति गमनस्य प्रतिबन्धको भवति । अर्थात् पिता पुन्नामकनरकं प्रति नैव व्रजति । तथा च अयमेव पुत्रः यदि ज्येष्ठो भवेत्, तर्हि तस्याऽपि ज्येष्ठस्य पुत्रस्य प्राधान्यं नितरां वर्त्तत एव । यतो हि मनुना उक्तम् -

ज्येष्ठेन ज्ञातमात्रेण पुत्री भवति मानवः ।

अपि च -

एक एवौरसपुत्रः पित्र्यस्य वसुनः प्रभुः । इति

पुनश्च ज्येष्ठस्य प्रशंसायां दाययोगेऽपि तस्य प्राधान्यं सर्वैरेव शास्त्रकारैः स्वीकृतम् । तदर्थं च ज्येष्ठस्य पुत्रस्य कृते ज्येष्ठोद्धारःकल्पना भवति । एकाधिक भागः तस्मै ज्येष्ठाय पुत्राय दातव्येति सर्वेषामभिप्रायः । पुनश्च औरसपुत्रस्य प्राधान्यं तत्रापि धर्मशास्त्रे दरीदृश्यते । यत्र औरसपुत्राभावे पुत्रिकाकरणानन्तरं यदि औरसपुत्रः प्रजायत, तर्हि तत्र सर्वत्रापि पितृधनस्य पुत्रिका-औरसपुत्रयोर्मध्ये समांशकल्पना भवति । तदानीं पुत्रिकायाः ज्येष्ठत्वमेव

स्वीकारयोग्यं न भवति । यतोहि मनुना - ज्येष्ठता नास्ति हि स्त्रिया:'' इति प्रतिपादितम् । अतएव द्वादशविधेषु पुत्रेषु औरसपुत्रस्य प्राधान्यं महत्त्वं च स्वीकार्यं भवति । अस्यैव औरसपुत्रस्याऽभावे क्रमश: अन्येषामेकादशविधानां क्षेत्रजादीनां पुत्राणामावश्यकता वर्त्तते । सु-पुत्रस्य प्रशंसायां मनुना इदं तावत् प्रतिपादितं यत् -

यदि कश्चन जन: नदीपारनिमित्तं कु-प्लवेन एव गच्छति, तर्हि तस्यैव जनस्य यादृशी स्थिति: भवति अर्थात् नदीपारनिमित्तं स यथा असफलो भवति नाम नद्यां जलमग्न: भवति तद्वत् अत्र कुपुत्रेण जन: संसारेऽस्मिन् परजन्मनि च असफलो भवति । अत: उक्तं मनुना च यत् -

यादृशं फलमाप्नोति कुप्लवै: सन्तरन् जलम् ।
तादृशं फलमाप्नोति कुपुत्रै: सन्तरंस्तम: ।। इति

अर्थात् सर्वेऽपि जना: सुपुत्रप्राप्त्यर्थं सम्मार्गेण सर्वदा परिचालयन्त: यथा कालं अध्ययन देवादिपूजनं विधाय यत्नं कुर्य्यु: ।

अधुना के तावत् द्वादशविधा: पुत्रा: तेषां च कानि लक्षणानि तत् सर्वमत्र मया यथाा शास्त्रं प्रतिपाद्यते । द्वादशविधेषु पुत्रेषु दायाद बान्धवा: पुत्रा षट् भवन्ति, षट् च अदायादबान्धवा: भवन्ति । यथा - औरस-क्षेत्रज-दत्त-कृत्त्रिम-गूढोत्पन्न-अपविद्धा: एते षट् पुत्रा: दायादबान्धवा: भवन्ति । कानीन:, सहोढ:, क्रीत:, पौनर्भव:, स्वयंदत्त:, शौद्र: चैते षट् पुत्रा: अदायदा: भवन्ति ।

औरसपुत्रस्य इदं तावत् लक्षणं च यत् विध्यनुसारं संस्कृतायां पत्न्यां स्वयमेव पति: यं पुत्रम् उत्पादयति तमेव पुत्रं औरसपुत्र इति विजानीयात् । स च औरसपुत्र: प्रथमकल्पितोऽपि भवति ।

यदि कश्चित् प्रमितो (मृत) भवेत् क्लीव: व्यधितो वा भवति तस्य पत्न्यां स्वधर्मेण नियुक्तायां जातपुत्र: क्षेत्रजपुत्रो भवति ।

आपदि यं पुत्रम् अद्भि: दानपूर्वकं मात पिता वा दद्यात् एवं सदृशं प्रीति संयुक्तं पुत्रं दत्रिम: इति जानीयात् ।

कृत्त्रिमपुत्रो भवति य: सवर्ण्ण: गुणदोषविचारणशील: पुत्रगुणयुक्त: यदि आगत्य उपस्थितो भवति एवंभूतं पुत्रं मातापिता स्वीकुरुत: तर्हि स: कृत्त्रिमपुत्रो भवति ।

गूढोत्पन्न:-

यस्य गृहे अयं पुत्र: उत्पद्यते परन्तु कस्य चायमिति न विज्ञायते तर्हि स पुत्र:

भवति गूढोत्पन्न: पुत्र: यस्य तल्पज: भवति ।
अपविद्ध:-

मातृपितृभ्यामृत्सृष्टं यं पुत्रमपर: कश्चित् गृह्णाति। स भवति अपविद्ध: पुत्र: ।

कानीन:-

कन्याऽवस्थायां पितृवेश्मनि गोपने सा यं पुत्रमुत्पादयति तं पुत्रं कानीन पुत्रमिति जानीयात् ।

सहोढ: -

ज्ञातगर्भा भवतु अज्ञातगर्भा वा गर्भिणी च येन विवाहं करोति तस्या: उत्पन्नपुत्र: स: सहोढपुत्रो भवति ।

क्रीतक:-

अपत्यनिमित्तं यस्मात् पिता माता वा यस्य क्रयं करोति स क्रीतकपुत्रो भवति ।

पौनर्भव: -

या स्त्री पतिद्वारा परित्यक्ता अथवा विधवा भवति सा यदि स्वेच्छया अन्यस्मात् कस्माच्चित् सवर्णपुरुषात् यं पुत्रमुत्पादयति स पुत्रो भवति पौनर्भव: ।

स्वयंदत्त: -

य: पुत्र: मातृपितृ विहीन: ताभ्यां वा अकारणात् परित्यक्त: स पुत्र: आत्मानं यत्र प्रदर्शयति निवेदयति वा पुत्रार्थं स एव स्वयंदत्तपुत्रो भवति ।

शौद्र: -

अयं शौद्र: पुत्र: अस्य अपरमपि एकं नाम भवति पारशव: - य: ब्राह्मण: कामात् शूद्रायां पुत्रं जनयति स पुत्र: शौद्र: पुत्रो भवति । एतेषां द्वादशविधानां पुत्राणां नामानि मन्वादिग्रन्थोक्तदिशा प्रतिपादितानि । परन्तु एतेष्वपि औरस: मुख्य: । अपरे क्षेत्रजादय: पुत्रा: तस्य औरसपुत्रस्य प्रतिनिधिभूता: भवन्ति -

क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् ।
पुत्रप्रतिनिधीनाहु: क्रियालोपानमनीषिण: ।। इति मनुस्मरणादिति ।

—०—

*अध्यापक:, धर्मशास्त्रविभाग:,*
*श्रीश्री अनन्तनारायणसंस्कृतमहाविद्यालय:,*
*आयतपुरम्, केन्द्रापडा , ओडिशा*

# वैदिकसाहित्ये सूर्यः

डॉ. शत्रुघ्नपाणिग्राही

ॐ "धियो यो नः प्रचोदयात्" इति श्रुतिः । आचार्यः यास्क निरुक्तग्रन्थे प्रतिपादयति "तिस्र एव देवताः, अग्निः पृथिवीस्थानःवायुर्वेन्द्रो वान्तरिक्षस्थानः सूर्यो द्युस्थानः"[१] इति । त्रिषु देवस्वरूपेषु सूर्यः परा प्रसिद्धं लभते । अस्य अपरं नाम सविता। एतदर्थं श्रूयते[२]- वायुरेव सविता चन्द्रमा एव सविता इति । सविता भवति प्रेरणाशक्तिदाता उत्तेजकः गतिदाता उद्बोधनकर्ता देवः। मनोरूपेण अस्य प्रसिद्धिः अपि श्रूयते "मनो वै सविता"[३] इति । चराचरसंसारस्य सकलशक्तिभूतः सूर्यः । श्रूयते यथा[४] -

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरीक्षं सूर्य आत्मा जगतस्तस्थुषश्च ।। इति ।

विना सूर्यं चराः अचराश्च सर्वे निर्जीवाः भवन्ति । सूर्यं विना संसारः अस्तित्वहीनः। अयं देवः पुरो दृश्यमानं प्रत्यक्षं ब्रह्म । सर्वेषां देवानां मुख्याङ्गवत् मुख्यः, अथवा किरणसमूहरूपः, मित्रदेवस्य, वरुणदेवस्याग्नेश्चापि प्रकाशकः एतेषां सर्वेषां देवानां प्रकाशनशक्तिरूपेण सूर्य एव तिष्ठतीति भावः । एतादृग्विशेषणविशिष्टः सूर्यः उदितो जातः स्वनियतनियमानुरोधेन तथा च स्वरश्मिभिरयं त्रीन् लोकान् व्याप्नोति यतो हि सूर्य एव जंगमानां स्थावराणां चात्मस्वरूपः । प्राणशक्तिः चेतना शक्तिदाता सूर्यः । अतएव महत्त्वपूर्णः इति प्रश्नोपनिषदि श्रूयते, यथा - प्राणः प्रजानामुदयत्येष सूर्यः[५] इति । सर्वरोगनाशकः सूर्यः रसं संगृह्णति चराचरेभ्यश्च रसं प्रददाति इति निरुक्तोक्तिः[६] । सूर्यस्य किरणाः सर्वेषां रोगाणां शमनकारिणः भवन्ति । उदयकालीनसूर्यस्य किरणदर्शनेन सर्वे रोगाः विशेषतः हृदयरोगः, रक्तहीनतादिरोगाः च अपगच्छन्ति । श्रूयते तद्यथा -

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ।
हृद्रोगं मम सूर्यगमन्म ज्योतिरुत्तमम् ।।[७] इति ।

अतएव सूर्यः सर्वदुःखहरः सर्वकल्याणकरश्चेति दृशा उपास्यते । श्रूयते तद्यथा -

"विश्वानि देव सवितर्दुरितानि परा सुव ।
यद्भद्रं तन्न आ सुव ।।[८] इति ।

अथर्ववेदे सूर्यकिरणानां चिकित्साशास्त्रदृष्ट्या अत्यन्तं महत्त्वं दृश्यते । तदुक्तं यथा -

शीर्षक्तिं शीर्षामयं कर्णशूलं विलोहितम् ।
सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ।।
सं ते शीर्ष्णः कपालानि हृदयस्य च यो विधुः ।
उद्यन् आदित्य रश्मिभिः शीर्ष्णो रोगमनीनशोऽङ्गभेदमशीशमः[९] ।। इति ।

सूर्यकिरणेभ्यः अमृतं, तेजः ऊर्जा च मिलन्ति । सूर्यकिरणेषु पवित्रतां मिलति। पतनस्य निवारणायापि सूर्योपासना कर्तव्येति श्रुतिः उपदिशति -

अद्या देवाः उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः[१०] ।। इति ।

अर्थात् हे दिव्यकिरणाः ! यूयमद्य प्रातःकालीनसूर्योदयवेलायामुदिते सूर्ये पतनमूलकात् गर्हितकर्मणश्चास्मान् निस्तारयत रक्षत । अस्य रक्षणस्यानुमोदनं मित्रादयो देवा अपि कुर्वन्त्विति । सूर्यदेवः सन्ध्योपासनंसूर्यबन्दनंप्रातःसवनेत्यादिभिः परिचीयते । सावित्रीमन्त्रविशेषं बारम्बारमभ्यसन् पुरुषः पापमुक्तो भवति । अतः सूर्यवन्दनं सावित्रीमन्त्रेण सम्पाद्यते । स एव मन्त्रः श्रूयते यथा - ॐ भूर्मुवः स्वस्तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। धियो यो नः प्रचोदयात्[११] ।। इति । प्रातःसवनेन द्युलोकः प्रसीदति, द्युलोकश्च वर्षाभिः पृथिवीं तर्पयति । यज्ञेन मेघाः निर्मीयन्ते, मेघैश्च वृष्टिर्भवति[१२] । अस्मिन् प्रसङ्गे श्रूयते यथा-

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम्[१३] ।। इति ।

अर्थात् यस्मिन् प्रातःकाले सूर्यः उषसमनुगच्छति तस्मिन्नेव काले सूर्येणोपकृताः मनुष्याः सूर्यं प्रति यज्ञानुष्ठानमाध्यमेन प्रत्युपकारं विधातुं अथवा सूर्यं प्रति कर्म फलाय यज्ञकर्मणि कृषिकर्मणि वा वितन्वन्ति । यतोहि यज्ञकर्म एव भद्रं कर्म भवति - "सविता प्रापयतु श्रेष्ठतमाय कर्मणे"[१४] इति श्रुतिनिर्देशात् । यद्भद्रं कर्म तदेव श्रेष्ठतमं कर्म[१५] भवति। यज्ञो वै श्रेष्ठतमं कर्म वैज्ञानिकदृष्ट्या यज्ञोपवीतपरिधानकाले सूर्यदर्शनम् अनिवार्यं भवति। यज्ञोपवीतं च सूर्याय संदर्शनीयं भवति । सूर्यस्य उपासना अत्यन्तं महत्त्वपूर्णा श्रूयते -

सवितुस्त्वा प्रसवौत्पुनाम्याच्छिरेण पवित्रेण सूर्यस्य रश्मिभिः ।
सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि[१६] ।। इति ।

सूर्यदर्शनेन आयुर्वृद्धिर्भवति । श्रूयते एतत् यथा-

उदीर्ध्वं जीवो असुर्न आजादप प्रागात्तम आ ज्योतिरेति ।

आरैक्पन्थां यातेव सूर्यायागन्म यत्र प्रतिरन्त आयुः [१७]।। इति ।

नित्यं समृद्धये सूर्यसहितौ इन्द्र-बृहस्पती सेव्यौ । यतोहि सूर्योपासनाद्वारा इन्द्रलोकप्राप्तिः बृहस्पतिलोकप्राप्तिश्च भवति । श्रूयते एतद्यथा-

देवस्याहं सवितुं सवे सत्यसवसो बृहस्पतेरुत्तमं नाकं रुहेयम् ।

देवस्याहं सवितुः सवे सत्यसवस इन्द्रस्योत्तमं नाकं रुहेयम् ।

देवस्याहं सवितुः सवे सत्यसवसो बृहस्पतिरुत्तमं नाकमरुहम् ।

देवस्याहं सवितुः सवे सत्यसवस इन्द्रस्योत्तमं नाकमरुहम् [१८]।।इति ।

यजुर्वेदे सूर्यः गरुत्मान् सुपर्णः कथ्यते । अस्य विराङ्रूपं वर्णितम् अस्ति । ऋग्वेदे परमात्मा दिव्यपक्षिरूपेण सुपर्णरूपेण वा प्रसिद्धो भवति । सूर्यस्य पक्षद्वयम् अस्ति। एकः पक्षः उत्तरायणम्, अपरश्च पक्षः दक्षिणायनम् । एतेन पक्षद्वयेन सुपर्णः सूर्यः प्रचलति। अत्र धनात्मकपक्षः ऋणात्मकपक्षश्च इति गरुत्मतः सूर्यस्य द्वौ पक्षौ प्रसिद्धौ । श्रूयते यथा-

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।

एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः [१९]।। इति ।

ब्राह्मणग्रन्थेष्वपि गरुत्मान् सुपर्णः कथ्यते । यथा पुरुषस्य पक्षद्वयं प्राण- अपान शक्तिभूतं तथैव सूर्ये एवं शक्तिद्वयं प्राप्यते । महाभारतेऽपि एवंभूतस्य सुपर्णस्य प्रशंसा प्राप्यते [२०]। ऋग्वेदे पुरुषः समुद्रजीवनशक्तिरूपेण सुपर्णभूतः वर्णितः । शरीररूपिणि समुद्रे अग्नितत्त्वस्य प्रतिनिधिभूतः अयं सुपर्णः राजते । श्रूयते एतद्यथा -

एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनंवि चष्टे ।

तं पाकेन मनसापश्यमन्तितस्तं माता रेळिह स उ रेळिह मातरम् [२१]।।

वैदिकवाङ्मये सूर्यः वैशिष्ट्येन आलोचितः । सौर-ऊर्जाविषयः असाधारणसामग्रीरूपेण अधिगतः । सूर्यः अनेकः । सूर्यस्य शक्तिः असीमा । चराचरसंसार-सूर्ययोर्मध्ये सम्बन्धः विस्तृतभावेन उपन्यस्तः ।

सूर्यः सौरमण्डलान्तर्गतग्रह- उपग्रहादीनां नियन्ता भवति । सौरमण्डलं सौर-ऊर्जया उद्भासितं भवति । स्वस्य आकर्षणेन सूर्यः पृथिव्यादिसर्वान् ग्रहान् नियमयति । सूर्यद्वारा संसारे जीवनीशक्तिः वर्तते । अतः “सूर्य आत्मा जगतस्तस्थुषश्च” इति श्रूयते। सूर्यः अनेक इति अपि श्रूयते[२२]। अथर्ववेदे विचार्यते यत् केन्द्रियः सूर्यः कश्यपः भवति।

अपरे सप्त सूर्याः तस्य अङ्गभूताः भवन्ति । तैत्तिरीयारण्यके[२३] सप्तानां सूर्याणां नामानि श्रूयन्ते यथा - आरोगः, भ्राजः, पटरः, पतङ्गः, स्वर्णरः, जयोतिशिमानः विभाषः च । एते सप्त अथर्ववेदेऽपि श्रूयन्ते यथा -

यत्ते चन्द्रं कश्यप रोचनावद्यत्संहितं पुष्कलं चित्रभानु ।
यस्मिन्त्सूर्या अर्पिताः सप्त साकम् ।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रतिमुञ्च पाशान्[२४] ।। इति ।

अथर्ववेदे विचारितं यत् सौर - ऊर्जायाः आधारः सोमः भवति । सोमात् सूर्याय शक्तिः मिलति, यथा- सोमेनादित्या बलिनः सोमेन पृथिवी मही[२५] ।। इति ।
अन्यत्र तु अयं भिन्नरूपेण श्रूयते । सूर्ये द्विविधं तत्त्वं मिलति । तद्यथा -

अपां रसमुद्वयसं सर्ये सन्तं समाहितम् ।
अपां रसस्य यो रसस्तं वो......... योनिरिन्द्राय त्वा जुष्टतमम्[२६] ।।इति ।

आधुनिकविज्ञानानुसारं सूर्ये नवति प्रतिशतं उद्जानवाष्पः वर्तते । अष्टप्रतिशतं हिलियं वाष्पः, द्विप्रतिशतम् अन्यद्रव्यं च वर्तते । सूर्यस्य तापमात्रा सर्वाधिका । परिमापयितुं सा च अशक्या भवति । तत्र वाष्पानां निरन्तरं रूपान्तरेण सूर्ये अत्यधिका ऊर्जा प्राप्यते। अस्माभिः परिलक्ष्यते यत् सौरमण्डले एताषाम् ऊर्जाणां समाहारः अत्यधिकम् औष्ण्यं जनयति । सूर्यं परितः विशालः वाष्पपरिसरः प्राप्यते । अत्यधिकशक्तिमयवाष्पकारणात् शकमयं धूमम् इति शब्दस्य प्रयोगः तत्र भवति । यथा -

शकमयं धूममारादपश्यं विषूवता पर एनावरेण[२७] ।। इति ।

अर्थात् सौरमण्डले अवस्थानुसारं सर्वा गतिः प्राप्यते । सूर्यस्य चक्षुः रजस्यैवावृतम्[२८] । सूर्यदर्शनं महार्घम् । किन्तु उदीयमानः अस्तगामी वा सूर्यः न द्रष्टव्यः इति मनुना प्रोक्तम्, यथा- नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन[२९] ।। इति ।

अर्थववेदे वर्णितं यत् ब्रह्मणि सप्त सूर्याः मिलिताः सन्तः तिष्ठन्ति[३०] । सूर्याकिरणाः अत्यन्तं तीव्रगामिनः भवन्ति । अनेकेषु स्थलेषु परिलक्ष्यते यत् सूर्यकिरणं विना जीवजातं सर्वदा च अपुष्टं भवति ।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् मानसिकसुस्थताप्राप्तये सूर्योदयात् प्राक् शय्यात्यागः कर्तव्यः । सूर्यः अपि प्राणः तथा च अपानः इति शक्तिद्वयभूतः वर्तते । सूर्यः उद्जानम् अग्निमयं करोति । निरन्तरं तस्मिन् वाष्पपरिमाणपरिवर्तनात् सूर्यः अत्यधिकवेगगामी सुस्थश्च भवति । सूर्यः प्रदूषणनाशकः भवति । यदि तस्य किरणाः

भपष्ठोपरि न मिलन्ति तर्हि अनेकेषां दोषाणां जननं सम्भवति । "उत्पुरस्तात् सूर्य एति"[३१] इत्यादि मन्त्रविशेषः सूर्यस्य महत्त्वपूर्णाम् आवश्यकतां सूचयति । सूर्योदयात् प्राक् यदि शय्यात्यागः क्रियते तर्हि प्राणवायुः नियन्त्रितः भवति । एतेन जीवजगत् सुस्थं स्यात् इति।

---


**सन्दर्भाः**

१. निरुक्ते - ७.२ ।
२. गोपथब्राह्मणे - १.१.३३ ।
३. शतपथब्राह्मणे - ६.३.१.१३ ।
४. ऋग्वेदे - १.११५.१, शुक्लयजुर्वेदे - ७.४२, तैत्तिरीयसंहितायाम् - २.४.४३.१. अथर्ववेदे - १३.२.३५ ।
५. प्रश्नोपनिषदि - १.८ ।
६. निरुक्ते - ७.७ ।
७. ऋग्वेदे १.५०.११ ।
८. तत्रैव - ५.८२.५ ।
९. अथर्ववेदे -१.८.१-२२ ।
१०. ऋग्वेदे - १.११५.६ ।
११. तत्रैव - ३.६२.१०, शुक्लयजुर्वेदे - ३.४३ ।
१२. ऋग्वेदे - १.१६४.५१ ।
१३. तत्रैव - १.११५.२ ।
१४. शुक्लयजुर्वेदे - १.१ ।
१५. शतपथब्राह्मणे - १.३.१.५ ।
१६. शुक्लयजुर्वेदे -१.३१ ।
१७. ऋग्वेदे -१.११३.१६ ।
१८. शुक्लयजुर्वेदे -१.१० ।
१९. ऋग्वेदे -१.१६४.४६, शुक्लयजुर्वेदे -१२.५ ।
२०. महाभारते शान्तिपर्वणि - ४७.३० ।
२१. ऋग्वेदे - १०.११४.४ ।
२२. तत्रैव - १.११४.३ ।
२३. तैत्तिरीयारण्यके - १.७.१ ।
२४. अथर्ववेदे - १३.३.१० ।
२५. तत्रैव - १४.१.२. ।
२६. शुक्लयजुर्वेदे -९.३ ।
२७. ऋग्वेदे - १.१६४.४३ ।
२८. तत्रैव - १.१६४.१४ ।
२९. मनुस्मृतौ - ४.३७ ।
३०. अथर्ववेदे -१३.३.१० ।
३१. तत्रैव - ५.२३.६ ।


—o—


*सहायकाचार्यः, वेदविभागः,*

*श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, गुजरातराज्यम् ।*

# सुवर्णस्तेयप्रायश्चित्तम्

डॉ. मानसीरथः

धर्मशास्त्रोक्तेषु पञ्चसु महापातकेषु सुवर्णस्तेयमन्यतमं भवति । सुवर्णस्तेयमहापातकं तु ब्राह्मणस्वामिकं सुवर्णपरिमाणसुवर्णापहरणेन भवति । तत्सुवर्णपरिमाणान्न्यूनसुवर्णापहरणेन महापातकं भवति । क्षत्रिय-वैश्य-स्वामिक-सुवर्णापहरणेन न महापातकम्, तत्र लघुप्रायश्चित्तदर्शनात् । सुवर्णस्य लक्षणं तत्रभगवता योगीश्वरेणाभिहितम् -

जालसूर्य्यमरीचिस्थं त्रसरेणू रजःस्मृतम् ।
तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ।।
गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः ।
कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडश ।। इति ।
(या.स्मृ.आ.१-३६२-६३)

अर्थात् पञ्च कृष्णला एको माषः । ते षोडशमाषा एकः सुवर्णः । एवमुक्तसुवर्णपरिमाणविशिष्टं ब्राह्मणस्वाभाविकसुवर्णं योऽपहरति स महापातकी भवति । स्वस्य पापनिराकरणार्थं स राजसमीपं गत्वा राजकर्तृकं मरणं सम्पादयितुं प्रहारसाधनं लौहं खादिरमौदुम्बरं वा मुसलमादाय स्वकर्माख्यायन् राज्ञे मुसलं प्रदाय मां प्रहरेति निवेदयेत् । ततो राजा मुसलेन सकृत् प्रहारं कुर्यात् तेनायं विशुद्धो भवति । राज्ञा मुक्तोऽपि वा शुचिरिति नियमात् । प्रहारजनितमरणेन स विशुद्ध्यति । प्रहारेण स यदि वा जीवति तथापि शुद्धो भवति । अत्र सुवर्णापहरण-शब्देन समक्षं परोक्षं बलाच्चौर्य्येण वा क्रयादिस्वत्वहेतुं विना ग्रहणमुच्यते । सुवर्णस्तेयस्य निष्कृतिं योगीश्वरो याज्ञवल्क्यो निर्दिशति -

ब्राह्मणस्वर्णहारी तु राज्ञे मुसलमर्पयेत् ।
स्वकर्म ख्यापयंस्तेन हतो मुक्तोऽपि वा शुचिः ।। इति । (या.स्मृ.प्रा.२५७)

राज्ञे मुसलमर्पयेत् इति यद्यपि सामान्येनोक्तम्, तथापि तस्य हननार्थत्वात् तत् समर्थस्यायोमयादेर्ग्रहणम् । मनुनाप्युक्तम् -

स्कन्धेनादाय मुसलं लकुडं वापि खादिरम् ।
असिं चोभयतस्तीक्ष्णमायसं दण्डमेव वा ।। (मनु.८/३१५)

तेन दण्डेन राजा सकृत्हन्यादिति । एवं सकृत्ताडनेन राज्ञा हतो मृतः शुद्ध्येत् । मुक्तो वा, मरणाज्जीवन्नापि विशुद्ध्येत् । यथाह मनुः -

गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम् ।। (११/१००)

राजद्वारगमनविषये शंखेनाप्यत्र विशेष उक्त: -

सुवर्णस्तेन: प्रकीर्णकेश आर्द्रवासा आयसं मुसलमादाय राजानमुपतिष्ठेत् ''इदं मया पापं कृतमनेन मुसलेन मां घातयस्व'' इति । राज्ञा शिष्ट: सन् पूतो भवति । इदं च मरणान्तिकं प्रायश्चितं सार्वर्णिकस्यापहर्तुर्न तु ब्राह्मणस्यैव । ब्राह्मणस्य वधदण्डाभावो मनुना व्यवहाराध्याये प्रदर्शित: । यथा -

न जातु ब्राह्मणं हन्यात् सर्वपापेष्वपि स्थितम् ।
राष्ट्रादेनं बहिष्कुर्य्यात् समग्रधनमक्षतम् ।। (म.स्मृ.८/३८०)

ब्राह्मणस्वर्णहारीति नैमितिकवाक्ये विशेषानुपादानात् क्षत्रियादीनां च महापातकित्वाविशेषात् प्रायश्चित्तान्तरस्यानान्मानाच्च । अतो ब्राह्मणस्य सुवर्णपरिमितसुवर्णापहरणं महापातकं यत: दण्डस्य दमनार्थत्वाद्दमनस्य च परिमाणविशेषान्तरेणापि सिद्धेर्नातीव परिमाणमुपयुज्यते । शब्दैकसमधिगम्ये तु महापातकित्वादावेकान्तत: स्मरणमुपयुज्यते । अत: षोडशमाषात्मकसुवर्णपरिमितहेमहरणे एव महापातकित्वं, तन्निमित्तं मरणान्तिकादि- प्रायश्चित्तविधानं च । द्वित्रादिमाषात्मक-हेमहरणं तु क्षत्रियादिहेमहरणवदुपपातकमेवेति युक्तम् । बालाग्रमात्रेऽपहृते सुवर्णे प्राणायाम: हि प्रायश्चित्तम् । लिक्षामात्रे हेमहरणे प्राणायामत्रयमेव प्रायश्चित्तम्। राजसर्षपमात्रे च प्राणायामचतुष्टयम् । गौरसर्षपमात्रे दिनं यावत् सावित्रीं जपेत् । सुवर्णस्य यवमात्रेऽपहृते दिनद्वयं सावित्रीं जपेत् । कृष्णलपरिमिते सुवर्णापहृते सान्तपनं कृच्छ्रं व्रतं कुर्य्यात् । माषपरिमितसुवर्णापहरणे मासत्रयं यावद् गोमूत्रयावकाहारो भवेत् । सुवर्णपरिमाणात् किञ्चिन्न्यूनसुवर्णापहरणे वत्सरं यावद्यावकाशनं कुर्य्यात् । अत: परं प्राणान्तिकं प्रायश्चित्तमथवा द्वादशवार्षिकं ब्रह्महत्याव्रतम् । एतत् सर्वमपि प्रायश्चित्तमपहृतधनं तत्स्वामिने दत्त्वैव कार्य्यम् । बलात्कारपूर्वं कामकारेण ये नराधमा: परस्वं गृह्णन्ति, तेषां कृते प्राणान्तिकमेव प्रायश्चित्तम् । सुवर्णपरिमाणान्न्यूनसुवर्णापहरणे मरणान्तिको दण्ड: ।
वसिष्ठेन प्रायश्चित्तान्तरमपि प्रतिपादितं यत् -

निर्गतकेशश्मश्रुलोमपूर्वकं निष्कालको भूत्वा गो-घृताक्तो गोमयाग्निना पादप्रभृत्यात्मानं प्रमापयेन् मरणात्पूतो भवतीति, तथा अश्वमेधेन गोसवेन वा इष्ट्वा विशुद्ध्येद् इति ।

योगीश्वरेणापि प्रायश्चित्तान्तरं प्रकलल्पितम् । तत्र स्वीयं स्तेयं राजन्यनिवेद्य सुरापव्रतं द्वादशवार्षिकं यावत् समाचरन् शुद्ध्येत् । सुरापव्रतकथनेन ब्रह्महत्याव्रतस्य शवशिरोध्वजे तत् कपालधारणनिराकरणमेव भवति । एतत्तु अकारमकार-विषयमेव प्रायश्चित्तम् । यतो हि मनुनामुक्तम् -

इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ।। इति । (११/८९)

अपहारविषयेऽकामत एव न संभवति कथं वा तद् विषयमित्याकांक्षायां विज्ञानेश्वरेण प्रतिपाद्यते यत् यदा वस्त्रप्रान्तग्रथितं सुवर्णादिकमज्ञानादपहरति रजतादिद्रव्यान्तरबुद्ध्या वा हृत्वाऽननन्तरमेवान्यस्मै दत्तं नाशितं वा न पुनः स्वामिने प्रत्यर्पितं तदा सम्भवति एवाकामतोऽपहारः । वस्तुताम्रादिकस्य रसवेधाद्यापादित-सुवर्णरूपस्यापहारो न तत्रेदं प्रायश्चित्तम्,मुख्यजातिसमवायाभावात् । अपि च न मुख्यसादृश्यमात्रेण गौणे मुख्यधर्मा भवन्ति । यद्यपीदृशमेवासुवर्णं सुवर्णभ्रान्त्या कश्चिदपहरति, तथापि नेदं प्रायश्चित्तम् । असुवर्णापहारित्वादेव अतो नेदृशमज्ञानतः स्वर्णापहारः । अस्मिन्नेव विषये यदाऽपहर्त्ताऽत्यन्तमहाधनः तदात्मतुलितं सुवर्णं दद्यात् । यदि तावद्धनं नास्ति तपश्चर्य्यया चाशक्तस्तदा विप्रतुष्टिकृद् विप्रस्य यावज्जीवं कुटुम्बभरणपर्य्याप्ततया तुष्टिकरं धनं दद्यात् । यदा तु निर्गुणस्वामिकं द्रव्यमपहरति तदा द्वादशवार्षिकव्रतस्य पादन्यूनं नववार्षिकंव्रतं कुर्य्यात् । यदापहर्ता तादृशमेव क्षुत्क्षामकुटुम्बपरिरक्षणार्थमपहरति तदा षड्वार्षिकं व्रतं स्वर्जिदादिं वा क्रतुं कुर्य्यात्तीर्थयात्रां वा कुर्य्यात् ।

षडब्दं वा चाचरेत् कृच्छ्रं यजेद् वा क्रतुना द्विजः ।
तीर्थानि वा भ्रमन् विद्वांस्ततः स्तेयाद्विमुच्यते ।।

यदा तु अपहार-समनन्तरमेव हा कष्टं मया कृतमिति जातानुतापः प्रत्यर्पयति त्यजति वा तदापस्तम्बीयं चतुर्थकालमिताशनेन त्रिवर्षमवस्थानम् आङ्गिरसं वा वज्राख्यं त्रैवार्षिकं भाव्यम् । प्रायश्चित्तस्याल्पत्वविषये विज्ञानेश्वरेणाभिहितं यथा- अपहारस्योपभोगा-दिफलपर्य्यन्तत्वादुपभोगात् प्राङ्निवृत्तौ च पुष्कलस्यापहारार्थस्याभावाद् युक्तमेव प्रायश्चित्ताल्पत्वं, पीतवन्न इवापेयद्रव्ये ।

यस्तु रजतताम्रादिसंसृष्टसुवर्णापहारी न तत्रेदं लघुप्रायश्चित्तं यतः संसर्गेऽपि सुवर्णत्वं नापैति आज्यत्वमिव पृषदाज्ये । अतस्तत्र द्वादशवार्षिकमेवेति युक्तम् । अत्रापि स्त्रीबालबृद्धादिष्वप्यर्द्धमेव प्रायश्चित्तं वेदितव्यम् । यानि च ''अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा'' इत्यादिना सुवर्णस्तेयसमत्वेन प्रतिपादितानि तेष्वर्धमेव कार्य्यम् ।

सुवर्णस्तेयी द्वादशरात्रीः वायुभक्ष्य सन् पुतो भवति इति यद् स्वल्पप्रायश्चित्तं तन्मनसापहारे प्रवृत्तस्य स्वत एवोपरतापजिहीर्षस्य वेदितव्यम् । यद्यपि रत्नापहारे चान्द्रायणमुक्तं तत्र सहस्राद्धीनमूल्यरत्नापहारे विचारणीयम् । अत ऊर्ध्वं पुनः सुवर्णस्तेयसमं प्रायश्चित्तमिति दिक् ।

—०—

*अध्यापिका:, धर्मशास्त्रविभाग:,*
*वाग्देवीसंस्कृतमहाविद्यालय:*
*डालिजी, केन्द्रापडा, ओडिशा*

# वैदिकसमाजे नारीणां स्थानम्

*सत्येन्द्रनाथ आदकः*

सुखशान्तिप्रदायकः ज्ञानलोकप्रसारकः हि वेदः। मानवजातिविकाशस्य मूलस्रोतः वेद एव। सः झीवनस्य अन्तरङ्गस्वरूपमेव प्रकाशयति। विश्वसाहित्ये भाषागतप्राचीनग्रन्थेषु वेदः प्राचीनतमः। वेदः हि भारतीयानां पथप्रदर्शकः। ज्ञान - विज्ञान-धर्म-दर्शन-राजनैतिक-सामाजिकाचारः-विचारप्रभृतयः-वेदेषु वर्तन्ते। अतः श्रूयते सा प्रथमा संस्कृतिर्विश्ववारा[१]। वेदे अर्थव्यवस्थायाः स्वरूपं यथा- अर्थ आदान- प्रदानस्य क्रियविक्रयस्य -वाणिज्यस्य च विषयाः वर्त्तते-

देहि मे ददामि ते, नि मे देहि नि ते दधे।
निहारं न हरासि, मे निहारं नि हराणि ते[२]।।

अत्र सुष्ठुराजतन्त्रस्य आदर्शनीतीनां प्रयोगः दृश्यते- विश्वास्त्वा सर्वा वाञ्छन्तु[३], महते जानरायाय[४]। अपि च काव्यशास्त्र- चिकित्साविद्या- आधुनिकविज्ञान विश्वबन्धुत्वाभावना प्रभृतिषु वेदमहत्त्वं सुविदितमेव। वर्णानाम् आश्रमाणां पुरूषाणां नारीणां च स्थनम् अत्रैव वर्णितम्। एतएषु समाजे धर्मादिचतुर्वगेषु नारीणां भूमिका सर्वादौ परिलक्षिता। नारयति पालयति पुमान् इति नारी। नारी गृहिणी- कामिनी - रमणी-कान्ता- ललना- इत्यादिभिः विशैषणैः भूषिता। अमरकोषे यथोच्यते-

स्त्री योषिदवला योषा नारी सीमन्तिनी बन्धूः।
प्रतीपदर्शिनी वामा वनिता महिला तथा।।
विशेषस्त्वङ्गना भीरूः कामिनी वामलोचना।
प्रमदा भाविनी कान्ता ललना च नितम्बिनी।।
सुन्दरी रमणी रामा कोपना सैव भामिनी।
वररोहा मत्तका शिन्युत्तमा वरबर्णिनी।।
कृताभिषेका महिषी भोगिन्योऽन्या नृपास्त्रियः।

पत्नी पाणिगृहीता च द्वितीया सहधर्मिणी।।[५]

वैदिककालतः इदानीं यावत् समाजे नारीणां स्थानं सम्मानास्पदम्। नारी देवदूतस्वरूपा । सृष्टिकर्ता विराट्पुरुषः सृष्टिवैचित्र्योपलब्ध्यर्थं नार्यम् असृजत्। वेदे उक्तं च आत्मा वेदमग्र आसीदेक एव, सोऽकायत जाया मे स्यात्[६]। प्रकृतिकसृष्टिविषयस्य उपादानद्वयं भवति। विज्ञानमतानुसारं इदं सृष्टितत्त्वं वेदे परिलक्षितम्- (१) जैवोपादानम (२)अजैवोपादनम्। अजैवोपादनम् हि जडोपादानम्। इदं जडत्व इति भेदेन द्विधा। तदेव पुरुषत्वम्, स्त्रीतत्त्वमिति। उभयोः संयोगक्रियया सृष्टिकर्म भवति।( अक्सिजेन), (हाइड्रोजेन्) इति उपादानद्वयं मिलित्वा जलम् भवति। जले ( अक्सिजेन), (हाइड्रोजेन्) पुरुषतत्त्वम्। एवमपि वायौ (अक्सिजेन)स्त्रीतत्त्वम्, (नाइट्रोजेन) पुरुषतत्त्वम्। पश्नोपनिषदि श्रूयते-

तस्मै स होवाच प्रजाकामो वै प्रजापतिः सः
तपोऽतप्यत स तपत्सप्त्वा स मिथुनमुत्पादयते।
रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत[७]।।

अत्र रयिः स्त्रीतत्त्वम्, प्राणाः पुरुषतत्त्वम् इति। प्राणाः हि चेतनम्। रयिः प्राणरूपजीवनशक्तिः धात्री च।

नारिणाम् एवं महत्त्वे परिलक्षितेऽपि दृश्यते काचित् कुसंस्कारपूर्णा उक्तिः समाजे। यथा नारी मिथ्याचारिणी , दुर्भाग्यस्वरूपिणी, कन्या अभिशापम्,अबला च। ईदृशानि वाक्यानि शोश्रूयन्ते। तर्हि अत्र मनसि पश्नः समुदेति। का अबला ? का नारी ? एतत् तु न वाच्यम्। वास्तवतः नार्यः कोमलाङ्गत्वात् अबला। वेदे नारी अबला नास्ति। सा सुवीरा,शूरपत्नी, तेजस्विनी इत्यादि पदैः विशिष्टा आसीत्। अथर्ववेदे उक्तम्- आवीरामिव मामयं शरारूभि मन्यते[८]। सा विश्वस्य प्राणस्वरूपा। नारी हि आद्यशक्तिरूपा ,सौन्दर्यलीला भूमिः। ईश्वरस्य अर्धशरीरेण नारी अर्धशरीरेण च पुरस्योत्पत्तिः भवति। तदुक्तम् - अथो अर्धो वा एष आत्मनः, यत् पत्नी[९]।

अतः सा वेदस्य सखी, ज्ञानलक्ष्मी, गीतलक्ष्मी, सुषमालक्ष्मी च। वस्तुतः नारी ईश्वरी महालक्ष्मी च।

नारी नरश्च समाजरथस्य चक्रद्वयम्। यथा एकेन चक्रेण रथस्य गतिः न सम्भवति, तथैव नारीं विना समाजसंसाररथः न प्रचलति। जीवनं विना देहः, जलं विना नदी, वृक्षं विना लता, नारीं विना विश्वपरिमण्डलं क्षणमपि स्थातुं न शक्यते। सा संसारस्य हितसाधिका आधारशीला च। नारी जन्मनः परं पितृगृहे कन्यापदम् अलंकरोति। विवाहात् परं

पत्नीरूपेण सा साम्राज्ञीपदं अधिकरोति। वेदे श्रूयते यथा-

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रवां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु[१०]।।

नारी पतिश्वशुरश्वश्रूगां सुखदात्री सेविका च भवति। सा मातृरुपेण सन्ततीनां सुखशान्तिरक्षणाय संबर्धनाय च सर्वस्वमपि समर्पयति। अत: नारी गृहकार्येषु मन्त्रिणी, भोजनेषु माता, शयनेषु रम्भा, धर्मकर्मसु अनुकूला च। सा परिवारस्य गतिदायिका, सञ्चालिका,विद्यादात्री च भवति। वङ्गभाषयां प्रवाद: प्रचलति- संसार सुखेर हय रमणीर गुणे। एवमपि समाजे परिवारस्य समग्रभार: नारीणामुपरि वर्तते। वेदे दृश्यते -जायेदस्तम् जाया एव अस्तं गृहमित्यर्थ:[११] इति।

वैदिकसमाजे नारीशिक्षा दृश्यमाना आसीत्। तासामपि पुत्राणमिव उपनयनादि संस्कारा: सम्पादिता: आसन्। वेदाध्ययनेऽपि नारीणामधिकार: दृश्यते। तस्मिन् युगे अनेका: नार्य: न केवलं शिक्षिता अपितु वेदज्ञा:, शास्त्रनिपुणाश्च आसन्। गार्गी-मैत्रेयी-लोपामुद्रादीनां नारीणां नामानि उल्लेखयोग्यानि। न केवलमेतत् राष्ट्रसञ्चालने नारी वैदिकयुगे निपुणा आसीत्। वाङ्नाम्नी ब्रह्मविदुषी सर्वस्य जगत: अधीश्वरी। सा धनानाम् अभीष्टानाम् अग्रगण्या जाता। तदुक्तम्- अहं राष्ट्री संगमनी वसुनां[१२]। युद्धक्षेत्रेऽपि नारीणां महत्त्वं पुरुषापेक्षया न्यूनं न दृश्यते। सा पुरुषवत् आत्मविश्वासेन युद्धक्षेत्रे साफल्यं लभते स्म। अत: सा शूरपत्नी, इन्द्रपत्नी च नाम्ना भूषिता। श्रूयते च -उताहमस्मि वीरिणीन्द्रपत्नी[१३]। धर्माचरणे नारीणां महत्त्वमनस्वीकार्यम्। सा पुरुषस्य सहयोगिनीरूपेण यज्ञकर्माणि सम्पादयति स्म। ब्राह्मणे श्रूयते यथा - अयज्ञियो वा एष योऽप्रत्नीक:[१४]। न केवलं धर्मविषये अपितु कलाशास्त्रेषु अपि तासां दानं स्पष्टं परिलक्ष्यते। ब्राह्मणे ग्रन्थे उक्तम् - तद् वा एतत् स्त्रीणां कर्म यद् ऊर्णासूत्रं कर्म[१५]।

वैदिकयुगे पितरौ शिक्षितकन्यां कामयेते । उक्तं च -अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्रीयाताम्[१६]। कन्या: ब्रह्मवादिन्यस्तु विद्यां समाप्य विवाहं कुर्वन्ति स्म। श्रुतिषु -ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्[१७] इति परिलक्ष्यते । पतिनिर्वाचने अपि तासां स्वाधीनता आसीत् वैदिककाले। श्रुतं यथा- स्वयं सा मित्रं वृणुते जने चित्[१८]। अपि च विधवानारीणां कृते सम्मानं तथैव प्रदर्शितम्। श्रूयते च -

उदीर्ष्वा नार्यभि जीवलोकं गतासुमितमुप शेष एहि।
हस्तग्राभस्य दीधिषोस्तवेदं पत्युर्जनित्वमभि सं वभूथ[१९]।।

नारी मातृरूपेण पूज्यते। श्रूयते- बन्धुर्मे माता पृथ्वी महीयम्[२०]। माता भूमि: पुत्रोऽहं पृथिव्या:[२१]। मातृदेवो भव[२२] इत्यादिभि: श्रुत्युक्तिभि: वैदिककाले नारीणां स्थानं स्पष्टमेव प्रतिभाति।

वैदिकयुगादारभ्य रामायण-महाभारत-स्मृतिकालेष्वपि नारीणां स्थिति: गौरवोज्ज्वला दृश्यते । रामायणे कौशल्या-तारा- सीतादयो यज्ञान् स्वयं सम्पादयन्ति स्म। तदुक्तं यथा- सा क्षौमवसना हृष्टा नित्यं व्रतपरायणा।

आग्निं जुहोति स्म तदा मन्त्रवित्कृतमङ्गला[२३]।।

रामायणे कौशल्या तारा च मन्त्रप्रयोगकारिण्यौ मन्येते। संसाररक्षणाय राजरक्षणाय च सुपरामर्शं नार्य: ददति स्म। भरतमातु: कैकेय्या: रणकौशलं सुविदितमेव। राजनीतिशास्त्रे द्रौपद्या: विचारशक्ति: अतुलनीया। यदा दुर्योधनच्छलेनैव युधिष्ठिर: राज्यभ्रष्ट: अभूत् तदा दुर्योधनं प्रति शठताऽऽचरणार्थं परामृशति स्म द्रौपदी-

व्रजन्ति ते मृढधिय: पराभवं भवन्ति मायाविषु ये न मायिन:[२४]।

अपि च - व्रजन्ति शत्रूनवधूय निस्पृहा: शमेन सिद्धिं मुनयो न भूभृत:[२५]।

भार्या प्राणेभ्य: गरीयसी। महाभारते युधिष्ठिर: द्रौपदीं प्रति कथयति- इयं हि न प्रिया भार्या प्राणेभ्योऽपि गरीयसी[२६]। अपि च नार्येव साक्षात् लक्ष्मी: भवति। तथाहि -गृहे लक्ष्म्यो मान्या: सततमवला मानविभवै:[२७]। इति ।

स्मृतिग्रन्थेषु नारीणां बहुमहत्त्वं स्वीकृतम्। ब्रह्म स्वदेहं द्विधा विभज्य अर्धेन पुरुषम् अर्धेन च नारीं सृष्टवान्। मनुना उक्तम्- अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभु:[२८]। नारीरत्न- विद्या-धर्म-शौचं- हितवाक्यं- विविधशिल्पकर्माणि सर्वेभ्य: ग्रहणीयानि।

यथोक्तम्- स्त्रियो रत्नान्यथो विद्यां धर्मं शौचं सुभाषितम्।

विविधानि च शिल्पानि समादेयानि सर्वत:[२९]।।

नारी कुलं दीपयति। नारीं विना कुलं श्मशानमिव भवति। मनुना उक्तम्-

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता: ।

यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफला: क्रिया:[३०]।। इति ।

इतिहासग्रन्थेषु नारीणां गौरवम् अत्युत्कृष्टत्वेन प्रतिपाद्यते। राज्ञी दुर्गावती राज्यसञ्चालने निपुणा आसीत्। विप्लविनी झाँसीराज्ञी लक्ष्मीवाई भारतवर्षे जातीयवीराङ्गना इति ख्याता। भारतीयसंस्कृतौ देवानां नामपूर्वं देवीनां ग्रहणं वर्त्तते। यथा लक्ष्मीनारायणौ, सीतारामौ,राधाकृष्णौ, पार्वतीपरमेश्वरौ इत्यादिरूपेण दरीदृश्यते।

एवं सम्यक् परिशीलनेन ज्ञायते यत् समग्रचराचरविश्वस्य सृष्टिस्थितिपालनाय

नारीणां भूमिका अनस्वीकार्या। अत: अस्माकं सर्वेषाम् उत्तरदायित्वम् इदं यत् समाजे पुरुषाणामिव समानरूपेण नारीणाम् अपि सम्मानरक्षणं सामाजिकस्त्रोतसि संस्थापनं च इति अलं विस्तरेण।

---

सन्दर्भा:-

| | |
|---|---|
| १. यजुर्वेदे-७/१४ । | २. तत्रैव-३/५० । |
| ३. अथर्ववेदे-६/८७/१। | ४.यजुर्वेदे-९/४० । |
| ५. ऋग्वेदे-१/४/७ । | ६. प्रश्नोपनिषदि। |
| ७. अथर्ववेदे-२०/१२६/९। | ८.तैतरीयब्राह्मणे-२/२/२१३ । |
| ९. ऋग्वेदे-१०/८५/४६। | १०.ऋग्वेदे-३/५३/४ । |
| ११.तत्रैव१०/१२५/३ । | १२.अथर्ववेदे/२०/२६/९ । |
| १३. शतपथभ्राह्मणे । | १४. तत्रैव-१२/७/२/११ । |
| १५.बृहदारण्यकोपनिषदि-६/४/१७। | १६. अथर्ववेदे-११/७/१८ । |
| १७.ऋग्वेदे-१०/२७/१२ । | १८.तत्रैव-१०/१८/५। |
| १९.तत्रैव-१/१६४/३३ । | २२.वा. रामायणे-२/२०/१५ । |
| २३. किरातार्जुनीये-१/३० । | २४.तत्रैव-१/४२ । |
| २५.सुभाषितरत्नावलीग्रन्थे । | २६. मनुसंहितायाम् -१/३२ । |
| २७.तत्रैव–२/२४० । | २८. तत्रैव-३/५६ । |

—०—

*शोधच्छात्र:,साहित्यविभाग:,*

*राञ्ची विश्वविद्यालय:, राञ्ची, झारखण्ड:*

# भारतीयसम्प्रदाये सर्जनात्मकता

डॉ. सिङ्गराजु दक्षिणामूर्तिशर्मा

संस्कृतवाङ्मये वैदिकसाहित्यादारभ्य वर्तमानपर्यन्तमुपलभ्यमानासु कृतिषु तत्र तत्र सर्जनात्मकताया: उल्लेख: उपलभ्यते । वेदेषु बहुत्र गुरुशिष्ययो: संवादरूपेण कथानका: उपलभ्यन्ते । तेषु शिष्याणां सर्जनात्मकताविकासार्थं गुरूणां प्रश्नकरणशैली मनोहारिणी वर्तते। कुत्रचित् सर्जनात्मकताम् उपायत्वेन उपनिषत्सु प्रश्ना: उपयुक्ता: सन्ति । तैत्तिरीयोपनिषद्प्रभृतिषु ग्रन्थेषु क्रियाद्वारा सर्जनात्मकताया: विकास:" इति सिद्धान्त: दृश्यते। छान्दोग्योपनिषदि सत्यकामस्य कथा उपवर्णिता वर्तते । तत्राश्रमस्थशिष्य: गोसंरक्षणं कुर्वाण आसीत् । स अल्पीयसि काले स्वीयसर्जनात्मकताया: अपूर्वां प्रतिभां दर्शयन् चतुश्शतसंख्यापरिमिता: गा: सहस्रसंख्यापरिमिता अकरोत् । इदञ्च गुरुप्रदत्तेन स्वान्त्र्येण, गुरुणा प्रदर्शितेन आदर्शेन, प्रोत्साहनेन समुचितवातावरणेन एव साध्यम् आसीत् । एवं रामायणमहाभारतादिषु गुरुकुलवासे रामादीनाम् अर्जुनादीनामभूतपूर्णा प्रतिभा अवलोक्यते यां वयं सर्जनात्मकतारूपेण व्याख्यातुं शक्नुम: । एवं कह्वोपनिषदि नचिकेता ब्रह्मज्ञानं स्वीयसर्जनात्मकशक्त्या प्राप्नोत् । एवं महाभारते एकलव्यास्यापि सर्जनात्मकता लोकविदिता एव । तया सर्जनात्मकशक्त्या स: साफल्यमलभत् । तथैव अर्जुनस्यापि सर्जनात्मकता सुप्रसिद्धा एव ।

परवर्तिनि काले साहित्यशास्त्रस्य विकासानन्तरम् अलङ्कारशास्त्रेषु तत्र तत्र काव्यलक्षणकथनमाध्यमेन विलक्षणप्रतिभाया: उल्लेखो दृश्यते । प्रायेण साहित्याचार्याणामिदमेव मतं यत् प्रतिभा नाम सर्जनात्मकते"ति । अत एव ते प्रतिभा सर्वोत्कृष्टता इति मन्नते । हेमचन्द्र: काव्यानुशासने अवदत् –

प्रतिभैव कवीनां काव्यकरणकारणम् ।
व्युत्पत्त्यभ्यासौ तस्या एव संस्कारकौ न तु काव्यहेतू ।। इति

अर्थात् सर्जनात्मकता एव काव्यसर्जने हेतुर्भवति । व्युत्पत्तिरभ्यास इत्येतद्वयं चोपद्बलकमेव भवितुमर्हति,, न तु साक्षात् करणम् इति । अपि च आचार्य: मम्मट: काव्यप्रकाशे साग्रहं निर्दिशति– "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मताह्ल इति । यत्र मम्मट: प्रतिभाया: अर्थात् सर्जनात्मकताया: लक्षणं कथयति । प्रतिभा प्रतिक्षणं नवतामुपैति, प्रज्ञया सम्बद्धा च भवतीति तदीयं मतम् । एष: प्रतिभाया: स्वतन्त्रम् अस्तित्वं नाङ्गीकरोतीति प्रतीयते । यत: बुद्ध्या सम्बद्धा भवति प्रतिभा इति स अभिप्रैति ।

चन्द्रालोके 9प्रतिभैव श्रुत्यभ्याससहिता कवितां प्रति" इति वदन् प्रतिभाया: प्रामुख्य काव्यहेतुत्वेन निरूपयति । परन्तु साहित्यशास्त्रे वर्णितेयं प्रतिभा सर्वमानवेषु विद्यमानप्रतिभाया: भिन्ना एव भवति । संस्कृतक्षेत्रे शिक्षणाधिगमप्रक्रियायां परम्परया एव चाटुश्लोकै: सर्जनात्मकताया: (प्रतिभाया:) परीक्षणं क्रियमाणमासीत् । तद्वारा सर्जनात्मकताया: विकास: आसीत् । प्रतिभा मानवानाम् आन्तरिकव्यक्तित्वस्य स्वाभाविकस्वरूपिणी, सा शक्तिनाम्ना ज्ञायते । प्रतिभा एषा द्विप्रकारिका, कारयित्री, भावयित्री भेदेन इति काव्यमीमांसायाम्। किञ्च इयं प्रतिभा कविषु कारयित्रीरूपेण, सहृदयेषु च भावयित्रीरूपेण दृश्यते। अनया प्रतिभया कवि: स्वकाव्यजगत् सृजति। प्रतिभा न मानवमात्रेषु वर्तते अपि तु इयं सर्वप्राणिसाधारणी । अत: भर्तृहरि: वाक्यपदीये निगदति–

प्रमाणत्वेन तां लोक: सर्व: समनुपश्यति ।<br>
समारम्भा: प्रतीयन्ते तिरश्चामपि तद्वशात् ।।[१] इति ।

अयमाशय: – प्रतिभां सकलसंसार: प्रमाणत्वेन अभ्युपगच्छति । यत: तया एव सर्वव्यवहाराणां प्रतीतिर्जायते । अपि च –

यथा द्रव्यविशेषाणां परिपाकैरयत्नजा: ।<br>
मन्दादिशक्यतयो: दृष्टा: प्रतिभास्तद्वतां तथा ।।[२]

इत्यत्र यथा द्रव्यविशेषाणां परिपाकेन केनापि प्रयत्नेन विना मन्दादिशक्तय: दृश्यन्ते तद्वत् प्राणिषु प्रतिभा सहजतया विविधा: दृश्यन्ते इत्यर्थ: । मम्मट: प्रतिभां शक्तित्वेन व्याख्याति । कवित्वबीजरूपसंस्कार: शक्तिरिति तस्य आशय: । अत एव तेन काव्यप्रकाशे व्यलेखि –"शक्ति: कवित्वबीजरूप: संस्कारविशेष:।"[३]। आचार्य: आनन्दवर्धन: वैशिष्ट्येन व्यङ्ग्यार्थावगमनशक्ति: प्रतिभा इति मनुते । ध्वन्यालोके निम्नरीत्या स्पष्टयति – "प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा, तस्या विशेष: रसवेशवैशद्यसौन्दर्यं काव्यनिर्माणक्षत्वम् । ... अभिव्यक्तेन स्फुरता प्रतिभाविशेषेण निमित्तेन महाकवित्वगणनेति यावत्‌ह्न इति । अर्थात् प्रतिभा संस्काररूपत्वे प्रतिव्यक्तिसु कार्यानुसारं विविधरूपेण दृश्यते । अत एव काव्यजगति प्रतिभाविशेष: कार्यकारी वर्तते । इयमेव कवे: अपूर्ववस्तुनिर्माणक्षमता, यया सहृदयेषु रसावेशवैशद्यत्वेन अवलोक्यते । यत: शक्त्यतिरिक्तौ द्वौ घटकौ विद्येते । तौ घटकौ बुद्धिं निर्मियेते । प्रतिभा तु आन्तरिकशक्ति:।

डॉ. राधाकृष्णमहाभाग: निगदति यत् – सर्जनात्मकता प्रगतिशीलमानवतायै एकमनुपमं साधनं भवति । अत एव प्रायेण शतकस्यास्य चरमावधौ सर्जनात्मकताया: विषये सर्वत्र अनुसन्धानं क्रियमाणं वर्तते । भारतेऽपि बहुभि: सर्जनात्मकताया: अन्यासां मानसिकयोग्यतानां च मध्ये सहसम्बन्धस्याध्ययनं निर्वर्तितम् । इदं सुस्पष्टं यत् स्वकीयसर्जनात्मकचिन्तनकारणेन अनेकै: मनुजै: पुरस्कारा: सम्पादिता:, विकासश्च साधिता: । अत: सर्जनात्मकताया: प्रशिक्षणस्य, विकासस्य, विशेषतया अवधानस्य

चास्ति आवश्यकता । सर्जनात्मकतायाः विकासे विस्तारकरणे च विद्यालयः महतीं भूमिकां निर्वहति । वैपरित्ये च समाजस्य विध्वंसनम् अहितं च साधितं भवति । विद्यालयस्य पाठ्यक्रमः, शैक्षिकविषयाः, सर्जनात्मककार्यक्रमाः शिक्षा च विशेषतः विद्यालयीयाध्यापकैः विद्यालयीयवातावरणैः सौविध्यैश्च प्रभाविताः भवन्ति ।

एवं परिशील्यमाने ज्ञायते यत् भारतीयपरम्परायां सर्जनात्मकता नाम काचित् नवनवोन्मेषशालिनी अपूर्वा प्रज्ञा, या च अभ्यासजन्या, पूर्वजन्मसंस्कारजन्या, समाधिजन्या, भगवत्कृपाजन्या इत्यादिरूपा । इयं च प्रतिभा लोके विजयं प्रापयति ।

---

**सन्दर्भाः -**

१. वाक्यपदीयम् - २.१४
२. वाक्यपदीयम् - २.१८
३. काव्यप्रकाशः - १.१३

सहायकग्रन्थसूची –

१ काव्यमीमांसा, राजशेखरः, चौखम्बाप्रकाशन, १९६४
२ काव्यप्रकाशः, मम्मटाचार्यः, चौखम्बाप्रकाशन, बनारस-१, १९५५
३ काव्यादर्शः, दण्डी, चौखम्बाप्रकाशन, वाराणसी, १९७२
४ काव्यालङ्कारसूत्राणि, वामन, चौखम्बाप्रकाशन, वाराणसी, १९७१
५ वाक्यपदीयम्, श्रीभर्तृहरिः, वामदेव आचार्यः, चौखम्बा कृष्णदासअकादमी वाराणसी, २०००
६ संस्कृतसाहित्येतिहासः, आचार्य रामचन्द्रमिश्र, चौखम्बा-वाराणसी, १९७०
7 **Language,** Leyonard Blookfield, Motilal Banarsidas, Delhi, 1963
8 **A companion to Sanskrit Literature,** S.C.Banerji, Motila Banarsidas, 1971.

—०—

*सहाचार्यः, शिक्षाशास्त्रविभागः*
*राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः*

ISSN 2249 - 2313

# पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य प्रतिष्ठातृसदस्याः

२य पृष्ठाङ्कस्य अवशिष्टांशः....................

**क्र.सं. सदस्यानां नामानि, सङ्केताश्च**

३७. डॉ.प्रभातकुमारमहापात्रः, रा.सं.सं. श्रीरणवीरपरिसरः, जम्मु, जम्मु एवं कश्मीर
३८. पं.हरिहरदासः, रामाधीनसंस्कृतमहाविद्यालयः, ब्रह्मपुरम्, गञ्जाम, ओडिशा
३०. प्रो.अर्चना दुवे, सोमनाथसंस्कृतयुनिवर्सिटी, वेरावल, गुजरात
४०. डॉ.पराम्बा योगमाया, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा
४१. डॉ. द्वारिकानाथत्रिपाठी, धर्मसमाजस्नातकोत्तरमहाविद्यालयः, अलीगढ, (यु.पी)
४२. प्रो. गोपबन्धुमिश्रः, कुलपतिः, सोमनाथसंस्कृतयुनिवर्सिटी, वेरावल, गुजरात
४३. पं.श्रीराधारमणदासमहाराजः, सम्पर्कः - महन्तः श्रीकृष्णचैतन्यदासः, पुरी
४४. प्रो. हरिहरमिश्रः, प्राचार्यचरः, एस्.सि.एस्. स्वयंशासित महाविद्यालयः, पुरी, ओडिशा
४५. डॉ.शमितानागधरः, काछाडमहाविद्यालयः, शिलचर, आसाम
४६. श्री अरुणकुमारनाथशर्मा:, कृष्णदासपुर, याजपुरम्, ओडिशा
४७. डॉ.विघ्नेश्वरमिश्रः, कृष्णचन्द्रगजपति स्वयंशासित महाविद्यालयः, पारलाखेमुण्डि, ओडिशा
४८. डॉ.देवीप्रसादरथः, प्राचार्यः, कलिआचक विक्रमकिशोर आ.सं.महाविद्यालयः, पश्चिमवङ्गः
४९. डॉ.पारमितपण्डा, पुराणविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आ.प्र.
५०. डॉ. कीर्त्तिवल्लभ शक्टा, संस्कृत व्याख्याता चम्पावत, उत्तराखण्डः
५१. प्रो.सुरेन्द्रमोहनमिश्रः, संस्कृतविभागः, कुरुक्षेत्रविश्वविद्यालयः, हरियाणा
५२. प्रो. उजागरपटेल, प्राचार्यचरः, सर्वकारीयस्वंयशासितमहाविद्यालयः, भवानीपाटणा, कलाहाण्डि
५३. डॉ. योगेश्वरमहान्त, शिक्षाशास्त्रविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा
५४. डॉ. महेशझा, राष्ट्रियसंस्कृतसंस्थानम्, श्रीसदाशिवपरिसरः, पुरी, ओडिशा
५५. डॉ. लक्ष्मीनारायणवेहेरा, शिक्षाशास्त्रविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा
५६. डॉ.भारतभूषणरथः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आ.प्र.

—०—

IMPACT FACTOR : 2.735 PRACI SUDHA ISSN 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

# DECLARATION

| | |
|---|---|
| Name of the Jounal | PRACI SUDHA |
| Language | Sanskrit |
| Period of Publication | Half-Yearly |
| Time of Publication | March(October - March)<br>September (April - September) |
| Name of the Publisher | Prof. Biswanath Swain |
| Address | General Secretary,<br>Purusottam Research Academy<br>of Indology, Puri, Odisha<br>Email : biswanathpuri@yahoo.com<br>pracisudha2013@gmail.com |
| Name of the Printer | Prof. Biswanath Swain |
| Nationality | Indian |
| Owner | Prof. Biswanath Swain, General Secretary,<br>Purusottam Research Academy of Indology,<br>Sarvodaya Nagar, Puri - 752002, Odisha |
| Name of the Editor | Prof. Biswanath Swain, (Retd.Principal)<br>General Secretary, Purusottam<br>Research Academy of Indology,<br>Sarvodaya Nagar, Puri - 752002, Odisha<br>Mob.: +91 9438134700<br>E.Mail : biswanathpuri@yahoo.com<br>pracisudha2013@gmail.com |
| Nationality | Indian |
| Printing Press | Sri Narayan Press, Bali Sahi, Puri-752001 |
| Annual Subscription | Rs. 100/- |
| Price of the each issue | Rs. 50/- |

The above particulars are true to the best of my knowledge and belief.

**Dt - 31.03.2019** **Sd - Biswanath Swain**